
श्री खण्डदेवविरचिता

भाट्टदीपिका

तृतीयं संपुटम्



प्रधान संपादकः
डॉ. मण्डन मिश्रः, निदेशकः

संपादकः
पं. श्री. संपन्नारायणाचार्यः
न्यायमीमांसा, वेदान्त विद्वान्
उपनिदेशकः



प्रकाशकः
राष्ट्रिय संस्कृत संस्थानम्
जी. एन. ४, विशाल एन्क्लेव, राजा गार्डन
नई दिल्ली-११००२७

प्रकाशक:

डॉ. मण्डन मिश्र:

राष्ट्रिय संस्कृत संस्थान

जी. एन. ४, विशाल एन्क्लेव, राजा गार्डन,

नई दिल्ली-११००२७

मुद्रक:

अमर प्रिंटिंग प्रेस

८/२५, विजय नगर

दिल्ली-११०००९.

भाट्टदीपिका तृतीयसम्पुटस्थ विषयाः.

अष्टमाध्यायस्य विशेषलक्षणस्य प्रथमः पादः—

अधिकरणानि.		पुटसख्या.
1.	विशेषकर्मणो धर्मातिदेश	1
2.	सोमे ऐष्टिकधर्मानतिदेश.	,,
3.	ऐन्द्राग्नादावैष्टिकादिधर्मातिदेश	3
4.	फलादीनामनतिदेशः	6
5.	गुणकामानां गोदोहनादीनामनतिदेशः	8
6.	सौर्ये चरौ अभिमर्शनद्वयस्य विकल्पः	10
7.	आग्नेयधर्मातिदेशः	7
8.	द्रव्यदेवतयोस्सन्निपाते द्रव्यस्य बलीयस्त्वम्	12
9.	शतकृष्णले औषधधर्मातिदेशः	14
10.	मधूदके उपांशुयाजीयाज्यधर्मातिदेशः	16

अष्टमाध्यायस्य द्वितीयः पादः—

अधिकरणानि.		
1.	ऐष्टिकसौत्रामण्योरैष्टिकधर्मातिदेशः	17
2.	पशौ सांनाय्यधर्मातिदेशः	19
3.	,, पयोधर्मातिदेशः	20
4.	आमिक्षायां पयोधर्मातिदेशः	,,
5.	द्वादशाहे सत्राहीनयोर्यस्थया धर्मातिदेशः	22
6.	पञ्चदशरात्रादिषु सत्रधर्मातिदेशः	23

अष्टमाध्यायस्य तृतीयः पादः—

अधिकरणानि.		पुटसंख्या.
1.	आग्नावैष्णवादेरग्नीषोमीयधर्मातिदेशः	24
2.	जनकसप्तरात्रे त्रिवृत्स्वहस्सु द्वादशाहधर्मातिदेशः	25
3.	षट्त्रिंशद्रात्रे षडहधर्मातिदेशः	26
4.	संस्थागणेषु द्वादशाहिकधर्मातिदेशः	27
5.	शतोक्थ्यादौ ज्योतिष्टोमात् स्तोत्रोपचयः	29
6.	गायत्रीषु दाशतयीभ्य एवोत्पन्ना गायत्रयः आनेयाः	30

अष्टमाध्यायस्य चतुर्थः पादः—

अधिकरणानि.		
1.	दर्वीहोमस्य कर्मनामधेयत्वम्	32
2.	दर्वीहोमानामपूर्वत्वम्	34

नवमाध्यायस्य ऊहनिरूपणपरस्य प्रथमः पादः—

अधिकरणानि.		
1.	अग्निहोत्रादिधर्माणामपूर्वप्रयुक्तत्वम्	38
2.	उलूखलमुसलप्रोक्षणस्यापूर्वप्रयुक्तत्वम्	43
3.	फलदेवतासम्बद्धधर्माणामपूर्वप्रयुक्तत्वम्	47
4.	कर्मणामदेवताप्रयुक्तत्वम् (देवतानिराकरणम्)	50
5.	व्रीह्यादिप्रोक्षणादीनामपूर्वप्रयुक्तत्वम्	53
6.	अग्निष्टोम उपांशुत्वस्य पदार्थप्रयुक्तत्वम्	56
7.	प्रणीतावाग्यमस्य पदार्थप्रयुक्तत्वम्	59
8.	इष्टकासु सकृद्विकर्षणप्रोक्षणानुष्ठानम्	61
9.	उत्तमवर्जं पत्नीसंयाजसंस्था	63
10.	सामिधेनीनामभ्यासः स्थानधर्मः	65

अधिकरणानि.		पुटसंख्या.
11.	आरम्भणीयेष्टिविचारः	67
12.	निर्वापमन्त्रे सवित्रादिपदानामनूहः	72
13.	,, अग्न्यादिपदानामूहः	75
14.	इडोपाह्वानादिमन्त्रे यज्ञपत्यादिशब्दस्यानूहः	78
15.	सुब्रह्मण्याह्वाननिगदे हरिवच्छब्दस्यानूहः	82
16.	सारस्वत्यां मेष्यामाधिगुवचनानूहः	85
17.	यज्ञायज्ञिये गिराशब्दस्थाने इराशब्दस्य प्रयोगः	89
18.	इरापदं प्रगीतं प्रयोक्तव्यम्	92

नवमाध्यायस्य द्वितीयः पादः—

अधिकरणानि.		
1.	ऊहग्रन्थस्य पौरुषेयत्वम्	95
2.	साम्नामृचं प्रति गुणत्वम्	96
3.	तृचे प्रत्यृचं साम्नस्समापनम्	99
4.	तिसृषु प्रत्येकं गीयमानं सोमं समास्वेव गेयम्	102
5.	उत्तराग्रन्थपठितयोरेवोत्तरयोः ऋचोर्ग्रहणम्	,,
6.	बृहत्तीपङ्क्त्योरेव प्रगाथेन रथन्तरस्य गानम्	104
7.	शाखाभेदेन सामप्रकारभेदानां विकल्पः	111
8.	उत्तरादावेकार एव आईभावः	115
9.	उत्तरयोः स्तोभातिदेशः	117
10.	स्तोभलक्षणम्	118
11.	नीवारादिषु प्रोक्षणावघातादिधर्माः	119
12.	परिधौ यूपधर्माः	123
13.	शृतादौ प्रणिताधर्माः	126

अधिकरणानि.		पुटसंख्या.
14.	बृहद्रथन्तरयोर्धर्मव्यवस्था	127
15.	कण्वरथन्तरे बृहद्रथन्तरधर्मसमुच्चयविकल्पौ	129
16.	द्विसामके बृहद्रथन्तरयोर्व्यवस्था	130
17.	सौर्यादौ पार्वणहोमाद्यननुष्ठानम्	132
18.	दर्शपूर्णमासयोः होमद्वयस्य व्यवस्था	136
19.	समिदादीनां यागनामधेयता	,,

नवमाध्यायस्य तृतीयः पादः—

अधिकरणानि.		
1.	विकृतौ मन्त्रे सूर्पनीवारादिपदानामूहः	138
2.	पौण्डरीकेषु बर्हिष्षु स्तरणमन्त्रस्योहः	141
3.	अग्नीषोमीयपशौ लौकिकयूपस्पर्शप्रायश्चित्तम्	142
4.	द्विपशुकयागे पाशमन्त्रे द्विवचनोहः	144
5.	अग्नीषोमीयपशौ एकवचनान्तबहुवचनान्तपाशमन्त्रयोर्विकल्पः	146
6.	द्विपत्नीके प्रकृतिप्रयोगे पत्नीशब्दे द्विवचनानूहः	148
7.	,, विकृतियागेऽप्यनूहः	149
8.	सवनीयपशूनामग्नीषोमीयसमानविधानत्वे प्रास्मा इत्यत्रानूहः	150
9.	नीवाराणां व्रीहिप्रतिनिधित्वे व्रीहिशब्दस्यानूहः	,,
10.	द्विपशुकयागे सूर्य ते चक्षुरित्यादिषु मन्त्रेष्वनूहः	152
11.	,, अध्रिगुप्रैषे एकधा इत्यस्याभ्यासः	154
12.	द्विपशुविकृतौ देवतानुसारेण मेधपतिशब्दस्योह	156
13.	बहुदैवत्ये पशावप्येकवचनान्तमेधपतिशब्दस्य विकल्पः	158
14.	एकादशिन्यामेकवचनान्तमेधपतिशब्दस्योहः	159

नवमाध्यायस्य तुरीयः पादः—

अधिकरणानि.		पुटसंख्या.
1.	षड्विंशतिरस्य वङ्क्रय इत्यादौ समस्योहः	161
2.	अश्वमेधे चतुस्त्रिंशद्वङ्क्रिरूपविशेषवचनम्	165
3.	अग्नीषोमीयपशावुरूकशब्देन वपाभिधानम्	170
4.	अध्रिगौ प्रशंसाशब्दस्य प्रशंसापरत्वम्	171
5	,, श्येनादिशब्दानां कात्स्न्यर्चपरत्वम्	172
6.	दर्शार्थाग्निलोपे ज्योतिष्मत्या नानुष्ठानम्	174
7.	धार्योद्वानेऽपि ज्योतिष्मत्या नानुष्ठानम्	175
8.	दर्शार्थाग्निप्रणयनस्यामन्त्रकत्वम्	177
9.	प्रायणीयचरौ प्रदानधर्माननुष्ठानम्	178
10.	अभ्युदयेष्टौ दधिशृतयोः प्रदेयधर्मानुष्ठानम्	179
11.	पशुकामेष्टौ दधिशृतयोः प्रदेयधर्माननुष्ठानम्	180
12.	ज्योतिष्टोमे शृयणानां प्रदेयधर्माननुष्ठानम्	181
13.	'ईशानाय परस्वतः' इत्यत्र यागान्तरविधिः	,,
14.	'आज्येन शेषं संस्थापयति' इत्येनेन कर्मान्तरविधिः	183

दशमाध्यायस्य बाधनिरूपणपरस्य प्रथमः पादः—

अधिकरणानि.		
1.	विकृतावतिदिष्टानां प्राकृतानामर्थलोपादिना बाधः	185
2.	दीक्षणीयादिष्वारम्भणीयाबाधः	193
3.	अनुयाजादिष्वारम्भणीयाबाधः	195
4.	अन्वारम्भणीयायामारम्भणीयाबाधः	196
5.	खलेवाल्यां यूपाहुतिबाधः	197
6.	,, स्थाण्वाहुतिबाधः	198

अधिकरणानि.		पुटसंख्या.
7.	उत्तमप्रयाजस्य संस्कारकर्मता	200
8.	आज्यभागस्यारादुपकारकत्वम्	201
9.	पशुपुरोडाशयागस्य देवतासंस्कारकत्वम	202
10.	चरुशब्दस्योदनवाचित्वम्	206

दशमाध्यायस्य द्वितीयः पादः—

अधिकरणानि.

1.	कृष्णलचरौ पाकानुष्ठानम्	210
2.	,, उपस्तरणाभिघारणबाधः	211
3.	,, भक्षसद्भावः	214
4.	,, सहोपहारविधानम्	215
5.	,, ब्रह्मणे सर्वभागार्पणम्	,,
6.	,, भक्षणे न प्राकृतकालबाधः	216
7.	,, चतुर्धाकरणाय भावः	,,
8.	ऋत्विग्भ्यो दक्षिणादानमानत्यर्थम्	217
9.	शेषभक्षः प्रतिपत्त्यर्थः	218
10.	सत्रे ऋत्विजां न वरणम्	,,
11.	उदवसानीये दक्षिणायाः परिक्रयार्थता	219
12.	उदवसानीयः सत्रिभिरेकैकश्येन कार्यः	220
13.	उदवसानीये सत्रिभ्योऽन्य एव ऋत्विजः	,,
14.	सारस्वतसत्रे कामेष्टौ दक्षिणादानमदृष्टार्थम्	223
15.	दर्शपूर्णमासयोः द्वेष्याय दानमदृष्टार्थम्	225
16.	अस्थियागे जीवतोऽधिकारिकः	227
17.	,, वपनादिशारीरसंस्कारलोपः	229
18.	,, शाखामानशुक्रस्पर्शालोपः	,,

अधिकरणानि.		पुटसंख्या.
19.	अस्थियागे जीवदधिकारपक्षे सत्रव्रताश्रिता गुणकामाः कार्याः	230
20.	,, सूक्तवाकगताशासनाभावः	231
21.	,, होतृकामाभावः	,,
22.	सर्वस्वारयागे यजमानमरणेऽपि समापनमस्ति	232
23.	,, कार्यबाध्यव्यवस्था	233
24.	,, यजमानस्य दिष्टगतावप्यायुराशंसनम्	,,
25.	सत्रे ऋतुयाज्यावरणमात्रेयदानं च कर्तव्यम्	234
26.	पवमानेष्टौ निर्वापानुष्ठानम्	,,
27.	वाजपेये मुष्टिलोपः	236
28.	धेन्वादिशब्दानां गोवाचित्वम्	239
29.	'वायव्यं श्वेतम्' इत्यत्राजस्यैव ग्रहणम्	,,
30.	खलेवालीतण्डुलयोः खादिरत्वेहत्वानियमः	240
31.	खलेवाल्यां तक्ष्णाद्यनुष्ठानम्	242
32.	,, पर्यूहणादिसंस्कारानुष्ठानम्	,,
33.	महापितृयज्ञे धानास्ववघातानुष्ठानम्	243

दशमाध्यायस्य तृतीयः पादः—

अधिकरणानि.

1.	पश्वादौ प्रयाजादीतिकर्तव्यतानुष्ठानम्	245
2.	हिरण्यगर्भमन्त्रस्योत्तराधारगुणता	246
3.	सौमिकचातुर्मास्येष्वासादननियोजनयोर्गुणविधित्वम्	248
4.	अग्निचयने प्राकृतवैकृतदीक्षाहुतीनां समुच्चयः	249
5.	पुनराधाने दक्षिणानां निवृत्तिः	251
6.	आग्रयणे वासोवत्साभ्यामन्वाहार्यस्य बाधः	252
7.	,, वासोवत्सयोरन्वाहार्यधर्मानुष्ठानम्	253

अधिकरणानि.		पृष्ठसंख्या.
8.	आग्रयणे वत्से पाकाभावः	253
9.	,, वाससि पाकाभावः	,,
10.	,, वासोवत्सयोरभिधारणाभावः	,,
11.	ज्योतिष्टोमे गवामेव द्वादशशतसङ्ख्यान्वयः	254
12.	गोदक्षिणायाः विभज्यदानम्	256
13.	समाख्यानुसारेण दक्षिणाविभागः	258
14.	भूनाम्नि धेन्वा निखिलदक्षिणाबाधः	,,
15.	'एकां गाम्' इत्यादेना गोगतसङ्ख्यामात्रबाधः	260
16.	सायस्के त्रिवत्सेन कृत्स्नसोमक्रयसाधनबाधः	261
17.	अश्वमेधे प्राकाशेनाध्वर्युभागबाधः	262
18.	उपहव्ये श्यावाश्वेन निखिलदक्षिणाबाधः	264
19.	ऋतपेये सोमचमसेन निखिलदक्षिणायाः पुरुषान्तरस्य च बाधः	265
20.	,, एकवाक्यतापक्षे ब्रह्मभागबाधः	266
21.	वाजपेये यजुर्युक्तरथेन न कस्यापि बाधः	267

दशमाध्यायस्य चतुर्थः पादः —

अधिकरणानि.

1.	नक्षत्रेष्टौ नारिष्टहोमैरुपहोमानां समुच्चयः	269
2.	अभिचारविशेषे शरमयबर्हिषा कौशबर्हिषो बाधः	271
3.	बृहस्पतिसवे बार्हस्पत्यग्रहादिभिरैन्द्रवायवादिग्रहाणां समुच्चयः	275
4.	वाजपेये प्राजापत्यपशुभिः क्रतुपशूनां समुच्चयः	277
5.	सांग्रहणीष्टौ आमनहोमैरनुयाजानां समुच्चयः	,,
6.	महाव्रते पत्न्युपगानेन ऋत्विगुपगानस्य समुच्चयः	278
7.	अञ्जनाभ्यञ्जनाख्ये सत्रे गौगुलवाद्यभ्यञ्जनेन नावनीताभ्यञ्जनस्य समुच्चयः	280

अधिकरणानि.		पुटसंख्या.
8.	स्वतन्त्रे महाव्रते तार्प्यादिभिरहतवासस्समुच्चयः	281
9.	श्लोकादिसामभिः रथन्तरादिसाम्नां समुच्चयः	282
10.	विकृतिविशेषे कौत्सादिसामभिः प्राकृतसाम्नां बाधः	283
11.	वृद्धस्तोमकक्रतुषु प्राकृतसाम्नां बाधः	284
12.	पवमाने वितृद्धावितृद्धस्तोमकक्रतुषु सामावापोद्वापौ	,,
13.	यागादौ विधिगतशब्देनैव देवताभिधानम्	288
14.	अतिदेशस्थलेऽपि विधिगतशब्देनैव देवताभिधानम्	291
15.	आधाने सविशेषणेनाग्निपदेनैव देवताभिधानम्	293
16.	आज्यभागयोः निर्विशेषणेनाग्न्यादिपदेनैव देवताभिधानम्	294
17.	गवानुबन्ध्यपृषदाज्यहोमयोरुखावनस्पतिशब्दाभ्यामेवाभिधानम्.	296
18.	अवभृथे अग्निवरुणयोः सस्विष्टकृच्छब्देनाभिधानम्	298
19.	अग्नीषोमीयपशौ निर्विशेषणेनाग्निपदेनाभिधानम्	300
20.	अनुयाजेषु स्विष्टकृद्यागस्य संस्कारकर्मता	301
21.	विकृतौ प्राकृतयाज्यानुवाक्ययोर्बाधः	302
22.	मनोतामन्त्रस्य विकृतावनूहः	303
23.	वैश्यस्तोमे कण्वरथन्तरस्य स्वयोनौ गानम्	305
24.	अभिष्टुति स्तुतशस्त्रयोरविकारः	306
25.	पशौ आवाहनादिषु पृषदाज्यपपदोहः	307

समाप्ता तृतीयसम्पुटस्थसूची.

अथ पूर्वमीमांसादर्शने
अष्टमस्याध्यायस्य प्रथमः पादः

(१)–अथ विशेषलक्षणम् ॥ १ ॥ यस्य लिङ्गमर्थसंयोगादभिधानवत् ॥ २ ॥

तदेवं त्रिविधोऽतिदेशो निरूपितः । तत्रापि प्रत्यक्षवचनामातिदेशयोः कात्स्र्येन चिन्ता वृत्ता । चोदनालिङ्गातिदेशस्य तु सामान्यतो निरूपितस्य प्रकृतिविशेषनिरूपणार्थमष्टम आरभ्यते । तत्रैकस्मिन् सौर्यादौ एकविध्यन्तेनैव निराकांक्षत्वात् सर्वविध्यन्तसमुच्चययोगेऽपि नियामकाभावादनियमेनानेकप्रकृतिविध्यन्तप्राप्तिरिति प्राप्ते—

अष्टदोषदुष्टविकल्पापत्तेः । यस्यैव सादृश्यविशेषेण शीघ्रोपस्थितिस्तत एव धर्मातिदेशः । तच्च सादृश्यं शब्दघटितमर्थघटितं च उत्तरत्र प्रपञ्चयिष्यते । अत एव यत्र कथमपि न सादृश्यस्य नियामकता यथा द्यावापृथिव्य एककपाले । तत्राग्नीषोमीयैन्द्राग्नयोर्विकल्पेनैव प्रकृतित्वम् ॥ १ ॥

(२)–प्रवृत्तित्वादिष्टेस्सोमे प्रवृत्तिस्स्यात् ॥ ३ लिङ्गदर्शनाच्च ॥ ४ ॥ कृत्स्नविधानाद्वाऽ-

पूर्वत्वम् ॥ ५ ॥ स्रुगभिधारणाभावस्य च नित्यानुवादात् ॥ ६ ॥ विधिरिति चेत् ॥ न वाक्यशेषत्वात् ॥ ८ ॥ शङ्कते चानुपोषणात् ॥ ९ ॥ दर्शनमैष्टिकानां स्यात् ॥ १० ॥

यत्र द्रव्यदेवतादिसन्निपत्योपकारकाङ्गसामग्रीसाकल्यस्याम्नानरूपं कृत्स्नविधानं तत्राग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादौ न परस्परं धर्मातिदेशः स्वसन्निधौ यावदाम्नातैरङ्गैरेवेतिकर्तव्यताकांक्षाशान्तेः सादृश्यस्यापि तादृशस्य नियामकस्याभावाच्च । ज्योतिष्टोमे तु 'तस्यैकशतं प्रयाजानूयाजाः' इति प्रकृतिप्राप्तप्रयाजाद्यनुवादेन शतसङ्ख्याविधानलिङ्गाद्दीक्षणीयादिषु दार्शिकधर्माणां प्रवृत्ततया तन्मध्यवर्तिने सोमेऽपि दार्शिकविध्यन्तप्राप्तिं मन्यमानस्योत्तरम्—

दीक्षणीयादिषु विद्यमानानामेव प्रयाजादीनां परम्परया सोमसम्बन्धात् 'वाजपेयस्य यूपः' इतिवत् तस्येति षष्ठ्यनुवादोपपत्तेः । प्रवृत्तत्वस्य हेतोराकाङ्क्षानिबन्धनत्वेन तदभावेऽसाधकत्वान्न सोमऽतिदेशः । अत एव 'घृतं वै देवा वज्रं कृत्वा सोममघ्नन् स्रुचौ बाहू तस्मात् स्रुचि सोमहविर्नासाद्यते नाज्येनाभिघारयति' इति दार्शिकासादनाद्यभावानुवाद उपपद्यते । न ह्यत्र पर्युदासविधिः यदाह 'अंशुरंशुस्ते देव सोमाप्यायताम्' इत्येतद्विध्येकवाक्यत्वेन तदर्थवादस्य स्वतन्त्रविधित्वानुपपत्तेः । किञ्च 'यदनुपोष्य प्रयायाद्वज्रोवबद्धमेनमसुष्मिन् लोके

नेनीयेरंस्तस्मादुपोष्य प्रयायात्' इत्युपोषणविधिरप्यनतिदेशे उपपद्यते । अन्यथाऽतिदेशादेव तत्प्राप्तिसिद्धेर्विधिवैयर्थ्यात् । तस्मान्न कस्याप्यतिदेशस्तोभे ॥ २ ॥

(३)—इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिस्स्यात् । पशौ च लिङ्गदर्शनात् ॥ १२ ॥ दैक्षस्य चेतरेषु ॥ १३ ॥ ऐकादशिनेषु सौत्यस्य द्वैरञ्यस्य दर्शनात् ॥ १४ ॥ तत्प्रवृत्तिर्गणेषु स्यात्प्रतिपशु यूपदर्शनात् ॥ १५ अव्यक्तासु तु सोमस्य ॥ १६ ॥ गणेषु द्वादशाहस्य ॥ १७ ॥ गव्यस्य च तदादिषु ॥ १८ ॥ निकायिनां च पूर्वस्योत्तरेषु प्रवृत्तिस्स्यात् ॥ १९ ॥

सोर्यादेषु इष्टिसमाख्यातेषु इष्टिसमाख्याकत्वसामान्यात् निर्वपतिधातुमद्धाक्रयसम्बन्धित्वात् तद्धितपदविहितदेवताकत्वाच्च दर्शपूर्णमासविकारत्वमेव । अत एव 'प्रयाजे प्रयाजे कृष्णलं जुहोति' इति लिङ्गम् । एवं पशावप्यग्नीषोमीये दैक्षसंज्ञके तद्धितपदविहितदेवताकत्वादेव । न च तत्र यूपादिबहुतरधर्मविधानादेव निराकांक्षत्वादनतिदेशः। तथाऽप्यावाहनासादनकुम्भथादिबहुतरदृष्टार्थधर्मानाम्नानेन साकांक्षत्वात् । किञ्च क्रयसन्निधावाम्नातो निर्धर्मको दैक्षः प्रथमं तावदतिदेशं कल्पयत्येव। ततश्च प्राकृतैर्धर्मैर्निराकांक्षस्य 'स एष औपसथ्येऽहनि' इत्यनेन

औपसथ्येऽहन्यनुष्ठानेऽवगतेऽनुष्ठानसादेश्यादुपहोमन्यायेन यूपादिग्रहणेऽपि नातिदेशकल्पनाप्रतिबन्धः। 'एकादश प्रयाजान् यजति जौहवमाघारमाघार्य पशुमनक्ति' इत्यादि लिङ्गमप्येवमुपपद्यते। अन्येषु तु पशुषु सवनीयादिषु दैक्षस्यातिदेशः आलभतिचोदनाकत्वपशुद्रव्यकत्वाद्यधिकतरसादृश्याद्यूपाद्यधिकधर्मलाभाच्च। अत एव 'वपया प्रातस्सवने चरन्ति, औदुम्बरो यूपः' इत्यादि लिङ्गम्॥

ऐकादशिनेषु तु सुत्यादिनस्थत्वस्याधिक्यात् प्रचारविप्रकर्षादिरूपधर्माधिक्याच्च सवनीयपशुविकारत्वम्। 'अग्निष्टात् द्वेद्वे रशने आदाय द्वाभ्यां द्वाभ्यां रशनाभ्यामेकैकं यूपं परिव्ययति' इत्येतदपि द्वैरशन्यरूपसवनीयधर्मानुवादकमुपपद्यते। न ह्ययं विधिः 'अग्निष्टाद्वेद्वे' इत्यस्याविधेयत्वात् विध्यन्तरैकवाक्यत्वाद्वा लिङ्गत्वोपपत्तेः। पशुगणेषु तु सौत्येष्वसौत्येषु वा पशुगणान्तर्गतत्वसादृश्याद्गणधर्माधिक्यलाभाच्च ऐकादशिनविकारत्वम्। अत एवासौत्येषु प्रचाराविप्रकर्षप्राप्तावपि गणधर्मान्तरप्राप्तिरविरुद्धा।

अत एव सौत्रामण्यां प्रतिपशु वैकल्पिके यूपानेकत्वे प्राप्ते तत्प्रतिषिध्य यूपैकत्वनियमविधिः 'एकयूप आलभेत' इत्ययमुपपद्यते। उद्भिदादिषु तु अव्यक्तत्वसादृश्याज्ज्योतिष्टोमविकारत्वम्। अव्यक्तत्वं च स्वाङ्गतया अविहितदेवताकत्वम। ग्रहणाङ्गभूताया ऐन्द्रवायवादिदेवतायाः प्रसङ्गेन सोमयागोपकारकत्वेऽपि ज्योतिष्टोमाङ्गत्वाभावात्। अतश्चाव्यक्तत्वेन तदतिदेशे सिद्धे आतिदेशिकग्रहणाद्यङ्गभूतदेवताया उद्भिदाद्युपकारकत्वकल्पनेन [illegible]पलाभस्सुलभः। अत एव श्येने दीक्षणीयादिप्राप्तौ 'दीक्षणीया[illegible]द्वादशमानं हिरण्यं दक्षिणा चतुर्विंशतिमानं प्रायणीयायाम्'

इति दक्षिणादानावधिस्सङ्गच्छते। एवं गवामयनादिसत्रेषु द्विरात्राद्यहीनेषु च सुत्यागणेषु द्वादशाहविकारत्वम्। अहोरात्रसाध्यकर्मवाचिपदवाच्यत्वसामान्यात्। अत्र हि रात्रिशब्दोऽहश्शब्दश्चाहोरात्रसाध्यकर्मविशेषपरः। सुत्यागणान्तर्गतत्वसादृश्याच्च द्वादशाहविकारत्वम्।

अत एव गवामयनादौ 'द्वाभ्यां लोमावद्यति' इत्यादिना द्वादशोपसत्त्वानुवादो विध्यन्तरस्तुत्यर्थस्सङ्गच्छते। स्थिते च द्वादशाहविकारत्वे प्रथमोत्तमौ वर्जयित्वा दशाहस्यैव प्रवृत्तिरिति वक्ष्यते। तत्रापि सत्रेषु सत्रात्मकस्याहीनेषु अहीनात्मकस्य द्वादशाहस्यावान्तरसादृश्यादित्यपि वक्ष्यते। सत्रेष्वपि यानि संवत्सरसाध्यानि सत्राणि तेषु संवत्सरसत्रत्वसामान्यादयनशब्दवत्त्वसामान्याच्च संवत्सरनियमादिधर्मलाभाय गवामयनस्य विध्यन्तः। अत एव गवामयनान्तर्गतमाहाव्रातिकं 'पत्नय उपगायन्ति' इति धर्मं विध्यन्तरस्तुत्यर्थं संवत्सरसत्रान्तरेऽनुवदति। ये तु 'साहस्रास्साद्यस्काः' इत्येवं एकसंज्ञायोगिनो यागास्ते सङ्घातरूपनिकाययोगान्निकायन उच्यन्ते। तेषां य एवैको धर्मवान् तस्याधर्मकेषु प्रवृत्तिः एकसंज्ञायोगित्वसादृश्यात्। न चात्र नाम्नैवातिदेशः, सर्वेष्वपि मुख्यत्वेन तदसम्भवात्। एकत्र मुख्यस्य हि नाम्नोऽपरत्र गौणत्वे नामातिदेशः, न तु सर्वत्र प्रवृत्तिनिमित्तसत्त्वेन मुख्यत्वेऽपि। न चैवं प्रायणीयस्थलेऽप्येकसंज्ञायोगादातिदेशापत्तिः। तस्य प्राथम्यसिद्ध्यर्थत्वेन द्वादशाहिकद्वितीयाहधर्मदर्शनेन चानतिदेशकत्वात्। अत एव प्रयोजनान्तररहित एवैकसंज्ञायोगोऽतिदेशसाधकः। अत्र च य एव धर्मवान् तस्याधर्मकेषु प्रवृत्तिः। स पूर्वो वा उत्तरो वा युक्तिसाम्यात्। प्रायशः पूर्व एव तादृश इति सूत्रादौ तथोक्तिः।

अत एव पूर्वपूर्वस्य किञ्चित्किञ्चिदधिकधर्मवत्त्वे उत्तरोत्तरेषु प्रवृत्तिः। अत एव पूर्वस्मिन् साहस्रे सहस्रं विधायोत्तरस्मिन् 'यावदस्य सहस्रस्य उत्तरा गौस्समाहिता भवति तावदस्माल्लोकादसौ लोकः' इति सहस्रं दाक्षिणां दर्शयति। साद्यस्के च पूर्वस्मिन् साण्डं सोमक्रयणं विधायोत्तरस्मिंस्तत्प्राप्तौ 'स्त्री गौस्सोमक्रयणी व्यावृत्ता ह्यषां स्पर्धिता' इत्यनेन स्त्रियो विधानं स्पर्धिताव्यावृत्त्यनुवादश्च सङ्गच्छते ॥ ३ ॥

(४)—कर्मणस्त्वप्रवृत्तित्वात्फलनियमकर्तृसमुदायस्यानन्वयस्तद्बन्धनत्वात् ॥ २० ॥ प्रवृत्तौ चापि तादर्थ्यात् ॥ २१ ॥ अश्रुतित्वाच्च ॥ २२ ॥

एवं प्रकृतिविशेषे निरूपिते फलनियमकर्तृसमुदायांशे तेषां न प्रकृतित्वम्। यतस्तेषामनतिदेशः। तथा हि—प्रकृतेः फलं तावत् प्रकृतेरनतिदेशादेव नातिदिश्यते। न हि प्रकृतिरप्यतिदेष्टुं शक्या विकृतिभावनाया विकृतिकरणेनैव निराकांक्षत्वात्। न च सौर्यादिवाक्ये द्रव्यदेवतामात्रविशिष्टभावनाविधौ कृते सादृश्येन प्राकृतभावनोपस्थितौ तत्सम्बन्धिकरणस्यैव प्रयाजादिवदतिदेशोपपत्तिरिति वाच्यं, अनुमितिसामग्र्या बलवत्त्वेन सूर्यादिदेवतया यागानुमानस्याप्यावश्यकतया शाब्दबोधे विजातीययागस्यापि भावनाविशेषणतया विधेरावश्यकत्वेन करणाकांक्षाभावादतिदेशानुपपत्तेः। न च तथाऽपि तद्वैजात्ये आग्नेयत्वभेदकल्पने गौरवात्तद्यागे आग्नेयत्वापत्तिः। विनि-

गमनाविरहसहकृताविधिपुनश्श्रवणेन वैजात्यानां भेदसिद्धेः । अन्यथा आग्नेयेऽपि सौर्यत्वापत्तौ सौर्यादीनां साङ्कर्यापत्तेश्च । अतस्सौर्यादीनां भिन्नानामेव करणानां लाभान्न तेषामतिदेश इति सिद्धम् । अतश्च तदभावात् न तज्जन्यफलातिदेशः । न च तदभावेऽप्यङ्गवत् विकृतेः फलाकांक्षाऽस्ति । ब्रह्मवर्चसादिश्रुत-फलेनैव निराकांक्षत्वात् ।

यत्रापि विश्वजिदादौ न फलश्रवणं, तत्रापि न तदतिदेशः । स हि अङ्गातिदेशकेन प्रकृतिवच्छब्देन भवेत् भिन्नेन वा नाद्यः—एकेनैव 'प्रकृतिवद्विकृतिः कार्या' इति वाक्येन विकृत्युद्देशेनाङ्गविधानं फलोद्देशेन विकृतिविधानमिति वैरूप्यापपत्तेः । यद्यपि च प्रकृतिवच्छब्दमात्रस्य विकृतिविधिवाक्यशेषत्वकल्पनयांऽशत्रयविशिष्टविकृतिभावनाविधानेनावैरूप्यमित्याशङ्क्येत । तथाऽप्येकस्यैव प्रकृतिवच्छब्दस्याङ्गांशे विधेयसमर्पकत्वं फलांशे उद्देश्यसमर्पकत्वमिति वैरूप्यापत्तिस्तदवस्थैव ।

नान्त्यः—स्वविध्युपस्थापितविश्वजिन्न्यायेनैव फलकल्पनोपपत्तावतिदेशकल्पने प्रमाणाभावात् । अतो न फलस्यातिदेशः । नियमोनिमित्तम् । तस्य विकृतिभावनयाऽनपेक्षितत्वादेवानतिदेशः । न हि निमित्तमङ्गं येन प्रयाजादिवदतिदेशो भवेत् प्रमाणाभावात् कारकत्वाभावाच्च न तस्याङ्गत्वम् । एवं सत्यपि यदि प्रकृतिवदिति स्यात् ततो भेदनवद्विकृतावेव निमित्तसन्निपाते नैमित्तिकं विकृत्यङ्गतया प्रकृत्यनुष्ठानं प्रसज्येत भेदनहोमानुष्ठानवत् न त्वेतदस्ति । सर्वथा न निमित्तातिदेशो नैमित्तिकत्वं वा विकृतेः । कर्ता अधिकारी । तस्यापि प्रकृतावनङ्गत्वात् । अतश्च तद्विशेषणानां स्वर्गकामत्वाहिताग्नित्वादीनामनातिदेशः । अत

एव स्थपतीष्ट्यादावाहिताग्नित्वस्यानतिदेशः। राजत्वादेस्तु कर्तृविशेषणत्वात् तस्य च प्रकृतावङ्गत्वात् विकृतावतिदेश इष्ट एव। न हि तत् प्रकृतावधिकारिविशेषणम्। अधिकारिणश्शाब्दविधिबोध्यत्वपक्षे उद्देश्यविशेषणस्य राजत्वादेरविवक्षापत्तेः।

वस्तुतस्तु—प्रथमापेक्षितत्वेन स्वाराज्यकामपदस्य फलपरत्वादधिकारिपरत्वानुपपत्तेराधिकारी आर्थिकविधिबोध्य एवेति तत्र न शाब्दस्य राजत्वादेरन्वयसम्भव इति राजत्वादेः कर्तृविशेषणत्वमेव। अत एवाहिताग्नित्वादेर्यौक्तिकस्यार्थिकेऽधिकारिविधौ विशेषणत्वकल्पनम्। याज्ञिकास्तु राजत्वादेराधिकारिविशेषणत्वमङ्गीकृत्यानतिदेशं मन्यन्ते। समुदायः अग्नीषोमीयादिप्रधानान्तरसाहित्यम्। तस्य प्रकृतावङ्गत्वेऽपि परप्रयुक्ताग्नीषोमीयादिप्रतियोगिकत्वात्तदभावे विकृतौ नातिदेशः॥ ४॥

(५)—गुणकामेष्वाश्रितत्वात्प्रवृत्तिस्स्यात् ॥२३ निवृत्तिर्वा कर्मभेदात् ॥ २४॥ अपि वाऽतद्विकारत्वात् क्रत्वर्थत्वात् प्रवृत्तिस्स्यात् ॥ २५ ॥

ये प्रकृतौ गोदोहनादिगुणजन्याः कामास्तेषामनङ्गत्वादनुपकारकत्वाच्च यद्यपि नातिदेशः, तथाऽपि तज्जनकीभूतगोदोहनादिगुणानां प्रणयनोपकारकत्वेनातिदेशे विकृतावपि कामनायां सत्यां फलोत्पत्तौ न किञ्चिद्बाधकम्। न चाङ्गमेव विकृतावातिदेष्टव्यमिति नियमे प्रमाणमस्ति. करणोपकारसाकांक्षाया विकृतिभावनायास्तज्जनकापेक्षायामुपकारकमात्रस्यैवातिदेशात्। न हि

विकृतिभावनाऽङ्गमपेक्षते प्रमाणाभावात्। अतः खादिरत्वादिवदेव गोदोहनादीनामप्यतिदेशः फलोत्पत्तिश्चेति प्राप्ते—

सत्यं, विकृतिभावनोपकारकमेवापेक्षते। तथाऽपि सादृश्यात्प्रकृतिचोदना तदर्थ एव वा प्रथमत उपतिष्ठते पश्चाच्च तदन्वितमुपकारकम्। तदत्र चोदनार्थभूतायां प्रकृतिभावनायां यदन्वितं तदतिदिश्यते अनन्वितस्योपस्थित्यभावेनातिदेशायोगात्। अन्वितं चापशुकामप्रयोगे चमसविशिष्टं प्रणयनं पशुकामप्रयोगे प्रणयनमात्रम्। तत्प्रयोगे प्रणयनस्य परप्रयुक्तगोदोहनोपजीवित्वेन द्रव्यानपेक्षत्वेन स्वरूपेणैव प्रधानभावनान्वयात्। अङ्गमेव प्रधानभावनायामन्वेतीत्यभिप्रायेण तस्यैवातिदेश इति प्रवादः। अतश्च फलार्थगुणानामनतिदेशः। न चातिदेशाभावेऽप्याश्रयस्य प्रणयनस्य विकृतावपि सत्त्वात् तत्रैव कामनायां सत्यां गोदोहनानुष्ठानोपपत्तिः। प्रकरणपाठवैयथर्यापत्तेर्गुणफलसम्बन्धाविधेराश्रयप्रयोजकत्वशक्तिकल्पनागौरवप्रसङ्गाच्च। प्रणयनमात्रस्याश्रयत्वानुपपत्तेरवश्यं दर्शपूर्णमासापूर्वसाधनीभूतप्रणयनत्वेनैवाश्रयत्वात् विकृतौ तदभावेन गोदोहनानुष्ठानानुपपत्तेः। अत एव खादिरत्वादेस्संयोगपृथक्त्वन्यायेन क्रत्वर्थत्वस्यापि सत्त्वादतिदेशोपपत्तावप्यग्नीषोमीयापूर्वसाधनीभूतयूपाभावान्न तेन वीर्यादिफलोत्पत्तिः।

भाष्यकारस्य तु एतादृशविषये फलोत्पत्तिं मन्यमानस्याभिप्रायं न विद्मः। यत्र तु नाश्रयापेक्षा विजातीयप्रस्तरप्रहरणत्वादिनैव चायुरादिफलं प्रति साधनत्वं आयुरादिप्रकाशनमन्त्रस्य च स्वप्रकाश्यफलजनकत्वेन प्रहरणाङ्गत्वं तत्र भवत्येव विकृतावपि तस्मात् फलोत्पत्तिः ॥ ५ ॥

(६)-एककर्मणि विकल्पोऽविभागो हि चोदनैकत्वात् ॥ २६ ॥

सौर्यादिरौषधद्रव्यकत्वैकदेवताकत्वाभ्यामाग्नेयविकार इति वक्ष्यते। आग्नेयवाक्ये चाग्नेयद्वयं पौर्णमास्यमावास्याकालमित्युक्तं कौस्तुभे पौर्णमास्याधिकरणे। सौर्यश्च विनिगमनाविरहात् उभयविकार इत्यप्याविवादम्। सौर्ये च 'य इष्ट्या' इति वचनाद्वैकल्पिकः पौर्णमास्यमावास्याकालः। तदत्राग्नेययोः किं पौर्णमासीकालीनसौर्यप्रयोगे पौर्णमासीकालीनाग्नेयस्यामावास्याकालीनसौर्यप्रयोगे चामावास्याकालीनस्य व्यवस्थितं प्रकृतित्वं उताव्यवस्थितं विकल्पेनेति चिन्तायाम्—

तत्तत्कालकत्वरूपावान्तरसादृश्याद्व्यवस्थितम्। एवं च 'चतुर्होत्रा पौर्णमासीमभिमृशेत्पञ्चहोत्रामावास्याम' इति विहिततत्तदङ्गमन्त्रयोरपि व्यवस्था। अत्र हि पौर्णमास्यादिसंज्ञकप्रधानसम्बन्धिहाविरेव पौर्णमास्यादिपदेन लक्षयित्वा तदुद्देशेन मन्त्रमात्रविधिः। अभिमर्शनं तु 'आसन्नानि हवींष्यभिमृशति' इति वाक्यान्तरप्राप्तमाश्रयत्वेनानूद्यते इति साधितं तृतीये। अतश्च मन्त्रयोरपि व्यवस्थोपपत्तेः प्रकृतित्वव्यवस्थेति प्राप्ते—

भावनाया विजातीययागत्वावच्छिन्नस्य वाऽनुग्राहकरूपेतिकर्तव्यताकांक्षा न तु प्रयोगविशेषस्य। अतश्चैकजातीयस्य सौर्यस्य वैकल्पिकोभयकालकत्वाद्वैकल्पिकोभयविकारत्वावगतेरव्यवस्थयैव तत्तदाग्नेयप्रकृतित्वं मन्त्राणां चाव्यवस्थेति सिद्धम्।

यत्तु पार्थसारथिना वार्तिकस्वारस्यादाग्नेयैकत्वमभ्युपगम्य मन्त्रयोः दृष्टार्थत्वेन विकल्पादेकस्मिन्नाग्नेये प्रधानान्तरसाहित्या-

नुरोधेन प्रकृतौ व्यवस्थायामपि विकृतौ तदभावेन व्यवस्थाकारणाभावादव्यवस्थितविकल्पो मन्त्रयोरिति सिद्धान्तितं, तत् मन्त्रविकल्पचिन्तायाः द्वादशे सङ्गततया अतिदेशाविचाराभावेनाभ्यायसङ्गत्यभावापत्तेराग्नेयभेदस्य च स्थापितत्वेनैक्यानुपपत्तेरुपेक्षितम् ॥ ६ ॥

(७)—लिङ्गसाधारण्याद्विकल्पस्स्यात् ॥ २७ ॥ ऐकार्थ्याद्वा नियम्येत पूर्ववत्त्वाद्विकारो हि ॥ २८ ॥ अश्रुतत्वादिति चेत् ॥ २९ स्याल्लिङ्गभावात् ॥ ३० ॥ तथा चान्यार्थदर्शनम् ॥ ३१ ॥

इष्टिषु दर्शपूर्णमासयोः प्रवृत्तिरित्युक्तम्। तत्रापि सौर्यादिषु औषधद्रव्यकत्वाविशिष्टैकदेवताकत्वरूपविशेषसादृश्यादाग्नेयविकारत्वम्। अत्र च साम्नाय्यस्यैकदेवताकत्वेऽपि औषधद्रव्यकत्वाभावादाद्यं विशेषणम्। अग्नीषोमीयादेः औषधद्रव्यकत्वेऽप्यनेकदेवताकत्वादपरम्।

अत्र यद्यप्येकदेवताकत्वं नाम नैकदेवतात्वकत्वं अग्नीषोमीयादावपि व्यासज्यवृत्तिदेवतात्वस्यैकत्वेनातिप्रसङ्गात्। नाप्येकदेवतात्वाधिष्ठानकत्वं देवतात्वस्य शब्दनिष्ठत्वेन देवतात्वीयस्वरूपसम्बन्धेन प्रत्येकाक्षराणामेव तदधिष्ठानतया आग्नेयेऽप्यव्याप्तेः। पर्याप्तिसम्बन्धावच्छिन्नाधिष्ठानत्वविवक्षायामग्नीषोमीयेऽप्यतिव्याप्तेश्च। सम्बन्धद्वयातिरेकेण पदमात्राधिष्ठानत्वस्य वक्तुमशक्यत्वाच्च। तथाऽपि देवतात्वाश्रयप्रातिपदिकैकार्थकत्वमेवैकदेवताकत्वम्। एकत्वं एकत्वसङ्ख्याकत्वम्। अथेस्य देवता-

त्वपक्षे तु एकदेवतात्वाधिष्ठानकत्वमेवैतत्। अस्ति चेदमाग्नेये सौर्ये च। प्रथमातिक्रमे कारणाभावेनैकवचनान्तेनैव तद्धितावग्रहात्। 'अग्निमेव स्वेन भागधेयेन समर्धयति, अमुमेवादित्यं स्वेन भागधेयेनोपधावति' इत्यर्थवादाच्च। 'अग्निर्मूर्धा, उदुत्यं जातवदसम्' इति मन्त्रवर्णाच्च। अग्नीषोमीयैन्द्राग्नयोस्तु तदभावान्नैकदेवताकत्वम्। अत एव 'मारुतं सप्तकपालम्' इत्यादौ 'मरुतो यस्य हि क्षये' इति मन्त्रवर्णादनेकदेवत्यत्वावगतेः सत्यपि पदैक्ये नाग्नेयविकारत्वम्।

'अग्नये क्षामवते चरुम्' इत्यादौ च सत्यपि पदभेदे प्रमाणान्तरेणार्थैकत्वावगमादाग्नेयविकारत्वम्। अनेकदेवताकेषु तु अग्नीषोमीयैन्द्राग्नयोः। तत्राप्यग्नीषोमदेवत्यस्य सोमपदघटितानेकदेवत्यस्य चतुरक्षरानेकदेवत्यस्य वा अग्नीषोमीयविकारत्वमेव। इन्द्राग्निदेवत्यस्य इन्द्रपदघटितानेकदेवत्यस्य त्र्यक्षरानेकदेवत्यस्य ऐन्द्राग्नविकारत्वमेवेति व्यवस्था। तथा ऐन्द्राग्ने शाखाभेदेनैकादशकपालत्वद्वादशकपालत्वयोर्विकल्पात् द्वादशकपालायां तदधिकसङ्ख्याककपालायां वा विकृतौ ऐन्द्राग्नविकारत्वमेव। तन्नूचनसङ्ख्याककपालायामष्टाकपालभिन्नायां तु विकल्प एव व्यवस्थापकसामान्याभावे। अष्टाकपालायां तु सत्यप्यनेकदेवताकत्वे द्रव्यघटितसादृश्यस्य बलवत्त्वादाग्नेयविकारत्वमेवेत्याद्यूह्यम्। आज्यद्रव्यकायामुपांशुयाजस्य। दधिपयोरूपसाम्नाय्यद्रव्यकायां तत्तद्द्रव्यकस्येत्यादि विशेषतः प्रकृतित्वं बोध्यम्॥ ७॥

(८)–विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वात्॥ ३२॥ तेन च कर्म-

संयोगात् ॥ ३३ ॥ गुणत्वेन देवता-श्रुतिः ॥ ३४ ॥

एवं सादृश्यस्य नियामकत्वे निरूपिते अधुना तयोर्विरोधे बलाबलं चिन्त्यते । तत्रापि द्रव्यघटितदेवताघटितसादृश्ययोः यत्र विप्रतिपत्तिः यथा 'ऐन्द्रः पुरोडाशः, आग्नेयं पयः' इत्यादौ तत्र कस्य बलवत्त्वमिति चिन्तायां—

देवतायाः प्रथमोपस्थितत्वेन मुख्यत्वात् प्रधानत्वाच्च तत्सादृश्यमेव बलवत्। 'तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति' इत्याद्यर्थवादवशाद्धि यागो देवताराधनार्थः आराधिता च सा फलं ददातीति तस्याः प्रधानत्वम। देवतासादृश्यं च यद्यपि निरुक्तैकदेवताकत्वरूपं द्रव्यसादृश्याविरोधि। तथाऽपि समानशब्दार्थकत्वरूपं तद्विरोधीति तस्य बलवत्त्वमिति प्राप्ते—

प्रथमोपस्थितत्वेऽपि कर्मविध्युत्तरकालमतिदेशकल्पनात् तदा च द्रव्यस्यैव प्रत्यासन्नत्वेन शीघ्रोपस्थितेस्तत्सादृश्यस्यैव बलवत्त्वम्। यागो हि वृद्धव्यवहाराद्देवतोद्देशविशिष्टद्रव्यत्यागरूपः। तत्र द्रव्यस्य प्रधानभूते त्यागे विशेषणत्वम् । देवतायास्तु विशेषणीभूते उद्देशे, अतो द्रव्यं यागे प्रत्यासन्नम् । यद्यपि च देवताप्रसादस्यैवार्थवादवशात् यागस्य फलसाधनत्वे द्वारत्वं कल्पयते। तथाऽपि देवतायाश्शाब्दबोधे यागं प्रति द्रव्यं प्रति वा प्राधान्ये प्रमाणाभावात् प्रत्युत द्रव्यस्यैव पार्ष्ठिकान्वये विशेष्यत्वेन प्राधान्यावगतेः न देवतासामान्यस्य बलवत्त्वाशङ्का।

वस्तुतस्तु—न देवताप्रसादस्य द्वारत्वमिति जैमिनिमतं वक्ष्यत एव। अतोऽन्तरङ्गत्ववशादेव द्रव्यसादृश्यस्य बलवत्त्वम्।

एवं धर्मानुग्रहोऽप्याङ्गस्येन सङ्गच्छते। इतरथा पुरोडाशे शाखाच्छेदनादीनां बाधापत्तेः। एवमन्यत्राप्यन्तरङ्गत्वादिना सर्वत्र सादृश्ययोः बलाबलं द्रष्टव्यम्। यत्र तु न्यायेनान्यादृशं बलाबलं कल्पसूत्रयाज्ञिकाचाराश्च अन्यादृशाः तत्र तन्मूलभूतश्रुतिरूपवचनातिदेशेन न्यायकल्प्यातिदेशस्य बाध इत्येवं द्रष्टव्यम्। अत एव 'सौम्यश्चरुः' इत्यादौ शब्दार्थगतसमानत्वरूपसादृश्यस्य निरुक्तैकदेवताकत्वरूपसादृश्यापेक्षयाऽन्तरङ्गत्वेऽपि नाग्नीषोमीयविकारत्वं, अपि त्वाग्नेयविकारत्वमेव।

एवं 'आग्नेयमेकादशकपालम्' इत्यदौ देवतासामान्यस्य कपालसङ्ख्यासादृश्याद्यपेक्षयाऽन्तरङ्गत्वेऽपि नाग्नेयविकरित्वं. अपि त्वग्नीषोमीयादिविकारत्वमेव। केचित्तु एतादृशविषये कपालैकादशत्वादीनां द्रव्यनिष्ठसाधनतावच्छेदककोटिप्रविष्टत्वात् द्रव्यसादृश्यघटकत्वमेवेत्यग्नीषोमीयविकारत्वं समर्थयन्ते॥ ८॥

(९)–हिरण्यमाज्यधर्म तेजस्त्वात् ॥ ३५॥ धर्मानुग्रहाच्च ॥ ३६॥ औषधं वा विशदत्वात् ॥ ३७॥ चरुशब्दाच्च ॥ ३८॥ तस्मिंश्च श्रपणश्रुतेः ॥ ३९॥

द्रव्यनिष्ठसादृश्ययोः परस्परविरोधे तु देवतासादृश्योपष्टब्धस्यापि द्रव्यसादृश्यस्य श्रौतलिङ्गोपष्टब्धद्रव्यसादृश्यापेक्षया दुर्बलत्वम्। यथा 'प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः' इत्यत्र कृष्णलानां दीप्तिमत्त्वलक्षणतेजस्वित्वसादृश्यस्य प्रजापतिदेवताकत्वसादृश्योपष्टब्धस्यापि कठिनत्वापरपर्यायाविशदत्वसादृश्यापेक्षया दुर्बलत्वम्। तेन नायं यागस्तेज-

स्वित्वसादृश्यादुपांशुयागविकारः, अपि तु कठिनत्वसादृश्यादाग्नेयविकार एव। चरुशब्दप्रयोगात्। 'घृते श्रपयति' इति श्रपणविधानाच्च। यद्यपि नायं विक्लृत्त्यभावेन मुख्यश्चरुः। तथाऽपि अचरौ चरुशब्दानुवादश्चरुधर्मयोगादुपपद्यत इति औषधधर्मप्रापकं भवति लिङ्गम्। न चाग्नेये चरोरभावात् आग्नेयधर्माणां चरुगतत्वाभावेन कथं चरुशब्दस्तत्रौषधधर्मप्रापक इति वाच्यम्। सौर्यचरोराग्नेयविकारत्वेनाग्नेयधर्माणामपि चरुगतत्वाच्चरुशब्दस्य तत्प्रापकत्वसम्भवात्। एवं श्रपणवाक्येऽपि। यद्यपि न श्रपणानुवादेन घृतविधिः श्रपणस्याग्नेयविकारत्वेऽपि विक्लृत्तिरूपप्रयोजनाभावेन बाधात्। घृतस्योत्पत्तिवाक्ये प्राप्तत्वाच्च। तथाऽप्यग्निसंयोगमात्ररूपश्रपणं शक्त्या लक्षणया वा प्रतिप्रसवविधया विधीयते, तच्च घृतविशिष्टं शुद्धं वेत्यन्यदेतत्। क्व विशिष्टविधित्वमित्यत्र नियामकाभावात्। उत्पत्तिवाक्ये घृतस्य परम्परासम्बन्धेन यागान्वये तस्य विलम्बोपस्थितिकत्वादत्रैव विशिष्टविधिरिति तु युक्तमुत्पश्यामः।

यद्यपि च श्रपणस्योपांशुयाजविकारत्वेऽपि प्रतिप्रसवविधित्वं युज्यत एव। आज्येऽप्यग्निसंयोगसद्भावात् तथाऽपि द्रव्यान्तरसंयोगस्यात्यन्ताप्राप्तस्योपांशुयाजविकारत्वे विधेयत्वापत्तेराग्नेयविकारत्व द्रव्यान्तरस्य जलस्य प्राप्तौ तत्र घृतविधाने लाघवमिति लिङ्गत्वोपपत्तिः। एतदस्वरसेनैव वा भाष्यकारेण 'तस्मिंश्च श्रपणश्रुतेः' इति सूत्रस्य घृतद्रव्यकत्वसादृश्यादुपांशुयाजविकारत्वमाशङ्क्य घृतस्याधिकरणत्वश्रुतेः प्रदेयत्वाभावादिति व्याख्यानान्तरं कृतम्।

सर्वथा श्रौतलिङ्गोपष्टब्धस्य सादृश्यस्य बलवत्त्वात् हिरण्ययाग औषधविकार एव। एवं च यत्र हिरण्ययागान्तरे

लिङ्गाभावस्तत्र देवतासादृश्यात्तद्भावेऽपि वाऽऽज्यधर्माणां भूयसामनुग्रहात्तेजस्वित्वसादृश्येनाज्यविकारत्वमेव। चरुशब्दस्य वा स्थालीपुलाकन्यायेन गमकत्वादौषधविकारत्वं कृष्णलोष्टिविकारत्वं वा ॥ ९ ॥

(१०)—मधूदके द्रवसामान्यात्पयोविकारस्स्यात् ॥ ४० ॥ आज्यं वा वर्णसामान्यात् ॥ ४१ ॥ धर्मानुग्रहाच्च ॥ ४२ ॥ पूर्वस्य चाविशिष्टत्वात् ॥ ४३ ॥

चित्रेष्टौ अनेके यागा इत्युक्तं चित्राधिकरणे कौस्तुभे। तत्र दधिघृतपयोधानातण्डुलयागानां निर्णीतैव प्रकृतिः। मधूदकयोस्तु वर्णसाम्यादुपांशुयाजविकारत्वं प्रकृतोदाहरणे देवतासामान्यस्याधिक्याच्च न तु स्वाभाविकद्रवत्वसादृश्यात्पयोयागविकारत्वम्। सत्यपि सादृश्यद्वये लिङ्गविशेषस्य निर्णायकत्वाभावे बहुतराज्यधर्मानुग्रहस्यैव नियामकत्वात्। नैमित्तिकद्रवत्वस्याज्येऽपि सत्त्वाच्च। अतश्च सर्वयागानामेकफलकत्वेनैकतन्त्रत्वाद्भूयसामनुग्रहाय त्रयाणां मधुघृतोदकयागानामुपांशुयाजधर्मास्तत्रानुष्ठीयमानाविरुद्धधर्मविषये कार्याः। आवृत्त्याऽनुष्ठीयमानद्रव्यसंस्कारविषये तु तत्तद्यागीयधर्मास्तत्र द्रव्येषु कार्याः ॥ १० ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
अष्टमस्याध्यायस्य प्रथमः पादः.

अथाष्टमस्याध्यायस्य द्वितीयः पादः.

(१)—वाजिने सोमपूर्वत्वं सौत्रामण्यां च ग्रहेषु ताच्छब्द्यात् ॥ १ ॥ अनुवषट्कारात्च॥ समुपहूय भक्षणात्च ॥ ३ ॥ क्रयणश्रयणपुरोरुगुपयामग्रहणासादनवासोपनहनं च तद्वत् ॥ ४ ॥ हविषा वा नियम्येत तद्विकारत्वात् ॥ ५ ॥ प्रशंसासोमशब्दः ॥ ६ वचनानीतराणि ॥ ७ ॥ व्यपदेशश्च तद्वत् ॥ ८ ॥ पशुपुरोडाशस्य च लिङ्गदर्शनम् ॥ ९ ॥

वाजिनयागस्यामिक्षाऽनुनिष्पन्नवाजिनप्रतिपादितकर्मणोऽप्यङ्गापेक्षायां किं सौमिकातिदेशः उत दार्शिक इति चिन्त्यते। सौत्रामण्यङ्गदेवतासंस्कारार्थसुराग्रहेषु चैवमेव चिन्ता। तत्र 'सोमो वै वाजिनं सुरा सोमः' इत्यसोमे सोमशब्दस्सोमधर्मातिदेशार्थः। न च 'उपशयो यूपो भवति' इतिवत् अर्थवादस्थत्वादनतिदेशकत्वं, तद्वदिह सिद्धसादृश्याभावेन नामातिदेशावश्यकत्वात्। अत एवानुवषट्कारमन्त्रौ समुपहूय भक्षणमुभयत्र दर्शयति। सुरायां सीसेन क्रयणं, कुवलयसक्तुभिश्श्रयणं, एका पुरोरुत् 'उपयाम' इति मन्त्रः, गृहीत्वाऽऽसादनं, क्षौमे वाससी

उपनहनं दर्शयति । ग्रहशब्दश्चैवं सति सुतरामुपपद्यते इति प्राप्ते—

आर्थवादिकस्य सोमशब्दस्य प्रकृष्टफलत्वरूपसिद्धसादृश्येनोपपत्तौ वाक्यभेदापादकविधिपरत्वे प्रमाणाभावात् ग्रहशब्दस्य प्रायणीयवत् ग्रहणस्यौपदेशिकत्वेनैवोपपत्तेः । लिङ्गानां च वाचनिकतयाऽप्युपपत्तावप्रतिबद्धेन चोदनालिङ्गातिदेशेन दार्शिकविध्यन्त एव । तत्रापि वाजिने पशुप्रभवत्वसादृश्यात्पयोयागविध्यन्तः । सुरायां पौरोडाशिकः औषधद्रव्यकत्वात् । अत एव 'शिष्टैरेव दीक्षणीयामाप्नोति' इति दीक्षणीयाप्राप्तिवचनं सङ्गच्छते । इतरथा हि तस्याः प्रत्यक्षत्वेन प्राप्तिवचनेन स्तुतिरसङ्गतैव स्यात् । तथा 'नैतेषां पशूनां पुरोडाशा विद्यन्ते ग्रहपुरोडाशा ह्येते पशवः'[1] इति ग्रहेषु पुरोडाशशब्दानुवादस्तद्धर्मकत्वे सङ्गच्छते । यद्यपि चैतेषां ग्रहयागान्तराणां वार्तिककारमते पशुपुरोडाशकार्यापन्नत्वस्य दशमे वक्ष्यमाणत्वात् स्थानापत्तयैव पुरोडाशशब्दोपपत्तिः । तथाऽपि स्थानापत्त्याऽपि तावत् पशुपुरोडाशधर्मप्राप्तेर्लिङ्गोपपत्तिः ।

वस्तुतस्तु अङ्गापेक्षायामङ्गघटितसादृश्यस्यैव पुरस्स्फूर्तिकत्वेन स्थानापत्त्यतिदेशापेक्षया चोदनालिङ्गातिदेशस्य बलवत्त्वादौषधद्रव्यकत्वेन सर्वप्रकृतिभूतदर्शपूर्णमासविकारत्वमेव । अत एव 'एषामसम्भवे कुर्यादिष्टिं वैश्वानरीं बुधः' इत्यादौ 'त्रेधातव्या दीक्षणीया' इत्यादौ च न ज्योतिष्टोमादिधर्माः । यदा तु दाशमिकसूत्रभाष्यकाररीत्या प्राकृतपशुपुरोडाशयाग एव सुरादिद्रव्यान्तरमात्रविधिरित्याश्रीयते तदा सोमादिशब्दस्य नामातिदेशनिराकरणमात्रार्थमिदमधिकरणं, न तु औषधद्रव्य-

कत्वलिङ्गकातिदेशसिद्ध्यर्थं. एतदलाभेऽपि पशुपुरोडाशस्य दर्शपूर्णमासविकारत्वसिद्धेरिति ध्येयम् ॥ १ ॥

(२)—पशुः पुरोडाशविकारस्स्याद्देवतासामान्यात् ॥ १० ॥ प्रोक्षणाच्च ॥ ११ ॥ पर्यग्निकरणाच्च ॥ १२ ॥ साम्नायं वा तत्प्रभवत्वात् ॥ १३ ॥ तस्य च पात्रदर्शनात् ॥ १४ ॥

दैक्षः पशुर्दर्शपूर्णमासविकार इत्युक्तम् । तत्रापि किं अग्नीषोमीयपुरोडाशविकारः उत साम्नाय्यविकार इति चिन्तायां घनत्वसादृश्यात्पुरोडाशविकारः । न च पशुप्रभवत्वसादृश्यस्य द्रव्यगतस्य साम्नाय्ये सत्त्वात् नियामकाभावः, घनत्वस्य लिङ्गोपपृक्तत्वात् । 'अद्भ्यस्त्वौषधीभ्योऽग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामी इति पशुं प्रोक्षति' इति हि प्रोक्षणं पुरोडाशधर्मः । तथा 'पशुं पर्यग्निकरोति' इति पर्यग्निकरणं पुरोडाशविकारत्वे लिङ्गम् । न च पशुप्रभवत्वसादृश्यस्यापि उष्मादर्शनरूपलिङ्गोपपृक्तत्वान्नियामकाभावः । तथात्वेऽपि देवतासादृश्यस्यैवाग्नीषोमीयविकारत्वे नियामकत्वादिति प्राप्ते

देवतासामान्योपपृक्तस्यापि द्रव्यसादृश्यस्यान्यथासिद्धलिङ्गोपपृक्तत्वेनानन्यथासिद्धलिङ्गोपपृक्तद्रव्यसादृश्यापेक्षया दौर्बल्यात् साम्नाय्यविकार एव पशुः । तथा हि नात्र प्रोक्षणानुवादेन मन्त्रो विधीयते, येनेदं लिङ्गं भवेत् । तस्य तु लिङ्गादेव प्राप्तत्वात् प्रोक्षणभावनैवात्रापूर्वं विधीयत इति विपरीतसाध-

कत्वम्। पर्याग्निकरणं तु प्रदेयपुरोडाशधर्मत्वेन प्रकृतौ कल्पं नेह प्रदेयप्रकृतिभूतपशुसंस्कारकतया दृश्यमानं प्राकृतम्। अपि त्वपूर्वमेवेति न तदपि लिङ्गम्। अतो घनत्वसादृश्यं न लिङ्गोपष्टब्धम्। 'यदि पशुरुखायां पच्यमानस्स्कन्देत्' इत्युखादर्शनं तु अनूद्यमानत्वादनन्यथासिद्धं लिङ्गम्। अतस्तदुपष्टब्धं पशुप्रभवत्वमेव बलीयः ॥ २ ॥

(३)–दध्नस्स्यान्मूर्तिसामान्यात् ॥ १५ ॥ पयो वा कालसामान्यात् ॥ १६ ॥ पश्चानन्तर्यात् ॥ १७ ॥ द्रवत्वं चाविशिष्टम् ॥ १८ ॥

तत्रापि दधिविकारः पयोविकारो वेति चिन्तायां–घनत्वसादृश्यादधिविकारत्वमेव। न च साक्षात् पशुप्रभवत्वसादृश्येन पयोविकारत्वशङ्का। कारणत्वस्य व्याप्तिरूपतया अतीन्द्रियस्यानुमानिकत्वेन प्रत्यक्षगम्यघनत्वापेक्षया दौर्बल्यादिति प्राप्ते–

हृदयादीनां पयसश्चैकदिनान्तरितानां विकारदर्शनादेकदिनस्थायित्वसादृश्यं स्वतोगतिमत्त्वसादृश्यं च प्रत्यक्षगम्यमेवेति तत्सहकृतेन साक्षात्पशुप्रभवत्वेनैकस्य घनत्वस्यैव बाधात् पयोविकारत्वमेव ॥ ३ ॥

(४)–आमिक्षोभयभाव्यत्वादुभयविकारः स्यात् ॥ १९ ॥ एकं वा चोदनैकत्वात् ॥ दधि सङ्गतसामान्यात् ॥ २१ ॥ पयो

वा तत्प्रधानत्वाल्लोकवत् दध्नस्तदर्थत्वात् ॥ धर्मानुग्रहाच्च ॥ २३ ॥

आमिक्षा तावन्नार्थान्तरं अपि तु दधिपयोऽन्यतररूपमिति साधितं चतुर्थे। अतश्च तदन्यतरविकार इति तावदविवादम्। तत्रापि तु विशेषचिन्तायां 'तप्ते पयसि' इत्यत्र द्वितीयानिर्दिष्टदध्न एव 'सा वैश्वदेवी' इति तच्छब्देन परामर्शः न तु सप्तम्यन्तपदनिर्दिष्टस्य पयसः गुणभूतत्वात्। न च 'आनयति' इति द्विकर्मकत्वात्पयसो व्याप्यत्वानत्वेन दध्यपेक्षयाऽपि प्राधान्यावगतिः। द्विकर्मकधातुस्थले अधिकरणत्वादिकारकान्तरविवक्षायां सम्बन्धमात्रविवक्षायां च सम्बन्धसामान्ये षष्ठीप्राप्तौ 'अकथितं च' इति सूत्रेण कर्मसंज्ञाकरणात् द्वितीयाविधानावगतावपि प्राधान्ये प्रमाणाभावात्। प्रकृते सप्तमीश्रवणेनाधिकरणत्वविवक्षाऽवगतेर्द्वितीयकर्मप्रसक्त्यभावाच्च। अतश्च दधिरूपत्वादामिक्षाया दधियागविकारत्वमेवेति लौकिकस्य पयसोऽधिकरणत्वामिति प्राप्ते—

मधुररसभूयस्त्वात् दध्यभावेऽपि च अम्लान्तरेणामिक्षासम्पत्तेरन्वयव्यतिरेकाभ्यां 'जुषन्तां युज्यं पयः' इति मन्त्रवर्णाच्च पयस एवावस्थाविशेषापन्नस्यामिक्षापदवाच्यत्वावगतेस्तदनुरोधेन तच्छब्दस्यापि सप्तम्यन्तपदनिर्दिष्टपयःपरामर्शित्वस्यैवावगतेः पय एवामिक्षा। अतश्च तद्यागविकारत्वमेव। एवं च 'तप्ते पयसि' इत्यत्र सप्तम्या प्राधान्यलक्षणा, द्वितीयया च सक्तुन्यायेन करणत्वलक्षणेत्यपि ध्येयम।

अवस्थाविशेषरूपामिक्षा च न तापं विनेति न तस्यापि विवक्षा। यदि तु तापं विनाऽप्यामिक्षा लोके सम्भाव्यते

तदा न सप्तम्या प्राधान्यलक्षणाऽपि तप्तपयोधिकरणत्वविशिष्टदध्यानयनस्यैवावस्थाविशेषविशिष्टपयोरूपामिक्षोद्देशेन विधेयत्वादुद्देश्यवाचकपदकल्पनया च वाक्यार्थपूर्तिः । तस्यैव च तच्छब्देन परामर्शात् सुतरां लिङ्गोपपत्तिः । अधिकरणत्वस्यैव च दध्यानयनं प्रत्यङ्गत्वेऽपि पयसो नाङ्गत्वं क्लप्तप्रयोजनत्वादिति ध्येयम् । अत आमिक्षाया अवस्थाविशेषविशिष्टपयोरूपत्वात् पयोयागविकारत्वम् । तेन पयस्येव प्रातर्दोहादिधर्माः । दधि तु लौकिकमेव संस्कारकम् ॥ ४ ॥

(५)—सत्रमहीनश्च द्वादशाहः तस्योभयथा प्रवृत्तिरैककर्म्यात् ॥ २४ ॥ अपि वा यजतिश्रुतेरहीनभूतप्रवृत्तिः स्यात् प्रकृत्या तुल्यशब्दत्वात् ॥ २५ ॥ द्विरात्रादीनामैकादशरात्रादहीनत्वं यजतिचोदनात् ॥ २६ ॥ त्रयोदशरात्रादिषु सत्रभूतस्तेष्वासनोपायिचोदनात् ॥ २७ ॥ लिङ्गाच्च ॥ २८ ॥

अहर्गणेषु द्वादशाहस्य प्रवृत्तिरित्युक्तम् । द्वादशाहे चास्ति सत्रत्वमहीनत्वं चेति धर्मद्वयम् । तत्र 'आसीरन्, उपेयुः' इत्यादिचोदनाचोदिते सत्रत्वमखण्डोपाधिः, अनियतस्वामिके यजतिचोदनाचोदिते चाहीनत्वमखण्डोपाधिः । वृद्धव्यवहारात् । तत्तद्धर्मकत्वे निमित्ते च तत्र धर्मविशेषा विहिताः तथा अन्येऽपि सत्रसंज्ञका अहोनसंज्ञकाश्च अहर्गणा अधर्मकास्समाम्नाताः । तत्र द्विविधेष्वपि द्वादशाहस्यैकस्य धर्मप्रवृत्तिः ।

अतोऽविरुद्धास्समुच्चीयन्ते विरुद्धाश्च विकल्प्यन्ते । न ह्यत्र द्वादशाहभेदोऽस्ति येनावान्तरसामान्यात् 'तत्तद्वादशाहवत्' इत्यतिदेशवाक्यं कल्प्येत । भेदे प्रमाणाभावात्तु 'द्वादशाहवत्' इत्येवातिदेशवाक्यकल्पनेऽव्यवस्थैव युक्तेत्येवं प्राप्ते —

सत्यपि द्वादशाहत्वेनैवातिदेशे सत्रत्वरूपनिमित्ताभावात् तन्नैमित्तिकधर्मा नाहीने, अहोनत्वरूपानिमित्ताभावाच्च तन्नैमित्तिका धर्मा न सत्रे प्रवर्तन्ते भेदे नाभाव इव होमस्तण्डुलयागादा-विति फलतो व्यवस्थितं प्रकृतित्वं सत्रात्मकेष्वहर्गणेषु सत्रात्म-कस्य द्वादशाहस्य अहीनात्मकेषु अहोनात्मकस्येति । द्विरात्रा-दारभ्यैकादशरात्रान्तमहीनाः । द्वादशाह उभयात्मा, त्रयोदश-रात्रादारभ्य सर्वे सत्रभूता एव । तथैवाकृतलक्षणसत्त्वात् वृद्ध-व्यवहाराच्च । अतस्तेषु तेषु तत्तद्रूपस्य द्वादशाहस्य प्रवृत्तिः ॥ ५ ॥

(६)—अन्यतरतोऽतिरात्रत्वात् पञ्चदशरात्र-स्याहीनत्वं कुण्डपायिनामयनस्य च तद्भूतेष्वहीनत्वस्य दर्शनात् ॥ २९ ॥ अ-हीनवचनाच्च ॥ ३० ॥ सत्रे वा उपायि-चोदनात् ॥ ३१ ॥ सत्रलिङ्गं च दर्श-यति ॥ ३२ ॥

पञ्चदशरात्रस्य कुण्डपायिनामयनस्य च न सत्रत्वं 'यद-न्यतरतोरात्रस्तेनाहीनः' शति श्रुत्या अन्यतरतोरात्रत्वस्याहीन-लक्षणकरणादर्थाच्चोभयतोरात्रत्वस्य सत्रलक्षणत्वेन पञ्चदशरा-त्रादौ अहीनलक्षणसत्त्वेन तदनुपपत्तेः । अत एव न सत्राही-

नयोर्भवदुक्तलक्षणम्। न वैकादशरात्रान्तमेव शुद्धाहीनत्वम। अतश्च पञ्चदशरात्रादौ अहीनात्मकद्वादशाहस्यैव प्रवृत्तिरिति प्राप्ते—

अहीनत्वाभावेऽपि प्राचुर्येणाहीनेऽन्यतरतोरात्रत्वादस्मिन्नपि पञ्चदशरात्रे अन्यतरतोरात्रत्वेनाहीनत्वोपचारस्य स्तुत्यर्थत्वे-नोपपत्तेरभियुक्तप्रसिद्धया निरुक्तलक्षणकस्यैव सत्रत्वादेरङ्गी-कारात्। पञ्चदशरात्रकुण्डपायिनामयनयोरपि सत्रत्वमेव। अत एव 'गृहपतिर्गृहपतिः' इति गृहपतिशब्दस्सत्रैकान्तवृत्तिः कुण्ड-पायिनामयने। अतस्सत्रात्मकद्वादशाहप्रकृतिकत्वमेवानयोः ॥ ६ ॥

इति श्रीखण्डदेवविरचितयां भाट्टदीपिकायां
अष्टमस्याध्यायस्य द्वितीयः पादः.

अथाष्टमस्याध्यायस्य तृतीयः पादः.

(१)—हविर्गणे परमुत्तरस्य देशसामान्यात् ॥ देवतया वा नियम्येत शब्दवत्त्वादित-रस्याश्रुतित्वात् ॥ २ ॥

'आग्नावैष्णवमेकादशकपालं, सारस्वतं चरुं, बार्हस्पत्यं चरुम्' इत्यादिहविर्गणे क्रमसामान्यात्प्रथमतृतीययोः आग्नावै-ष्णवबार्हस्पत्ययोः आग्नेयाग्नीषोमीयविकारत्वमिति प्राप्ते—

क्रमसामान्यस्याशाब्दस्यान्यसापेक्षत्वेन विलम्बोपस्थितिक-

त्वात् उत्पत्तिवाक्यगतदेवतासादृश्यस्यानन्यापेक्षत्वेन यागस्वरूपपरिचायकत्वेन च शीघ्रोपस्थितिकस्य बलवत्त्वात् । तेन आग्नावैष्णवस्याग्नीषोमीयविकारत्वं बार्हस्पत्यस्य चाग्नेयविकारत्वम् ॥ १ ॥

(२)—गणचोदनायां यस्य लिङ्गं तदावृत्तिः प्रतीयेताग्नेयवत् ॥ ३ ॥ नानाहानि वा सङ्घातत्वात् प्रवृत्तिलिङ्गेन चोदनात् ॥ तथा चान्यार्थदर्शनम् ॥ ५ ॥

जनकसप्तरात्रे 'चत्वारित्रिवृन्त्यहानि अग्निष्टोममुखानि' इति श्रुतम् । तत्र चतुर्ष्वप्यहस्सु द्वादशाहकदशाहान्तर्गतप्राथमिकस्य त्रिवृत्स्तोमकस्याहः प्रवृत्तिः त्रिवृत्त्वलिङ्गात् । न तु क्रमसहकृतगणत्वसामान्येनान्यापेक्षेण दशाहान्तर्गतानामाद्यानां चतुर्णामहां प्रवृत्तिः । तत्तदहर्वृत्तित्रिवृत्त्वस्यान्यानपेक्षत्वेन बलवत्त्वादिति प्राप्ते—

'स्वर्गकामो जनकसप्तरात्रेण यजेत' इतिवचनेनोत्पन्नानां सप्तानां कर्मणां मध्ये चत्वार्यनूद्य त्रिवृत्त्वविधानेन त्रिवृत्त्वस्योत्पन्नशिष्टत्वेन दुर्बलत्वादुत्पत्तिशिष्टेन गणत्वेनैव 'प्रथमस्य प्रथमम्' इत्यादिक्रमसहकृतेन सप्तानामप्यहां द्वादशाहिकदशाहान्तर्गतसप्ताहविकारत्वम् । न च प्राप्तकर्मानुवादेन त्रिवृत्त्वविधिः अग्निष्टोममुखत्वस्य च विधिरिति वाक्यभेदः दशाहान्तर्गतचतुर्णां मध्ये प्रथमस्याग्निष्टोमसंस्थाकत्वेनाग्निष्टाममुखत्वस्य प्राप्तत्वात् । न चाद्येष्वेव चतुर्षु त्रिवृत्त्वविधौ प्रमाणाभावेनाग्निष्टोममुखत्वस्यापि विधिरावश्यक इति वाच्यं, प्रथमातिक्रमे कारणाभावात् त्रयाणा-

मन्येषां विध्यन्तरेण स्तोमविधानाच्चाद्येष्वेव चतुर्षु त्रिवृत्त्वप्राप्तेरिति भाष्यकाराभिप्रायः ।

वस्तुतस्तु—चतुस्सङ्ख्याकोद्देशेन त्रिवृत्त्वविधौ योग्यतया सप्तस्वप्यहस्सु आद्येषु चतुर्षु स्तोत्रेषु त्रिवृत्त्वाविध्यापत्तेरहर्मात्रोद्देशेन तद्विधौ च सर्वत्र तदापत्तेः चतुस्संख्याविशिष्टाहरुद्देशेन वाक्यभेदापत्तेरयमेव सङ्ख्याभिन्नत्रिवृत्त्वविशिष्टकर्मोत्पत्तिविधिः । त्रयाणां चान्येषां विध्यन्तरेण विधिः । सर्वेषां च फलवाक्येन फलसम्बन्धमात्रकरणम । एवं चोत्पत्तिवाक्ये चतुर्णां गणत्वप्रतीतेस्तस्योत्पत्तिगतत्ववत् त्रिवृत्त्वस्याप्युत्पत्तिगतत्वेन साम्येऽपि त्रिवृत्त्वस्साङ्गभूतस्तोत्रवृत्तित्वात् प्रधानवृत्तिगणत्वापेक्षया दुर्बलत्वेन गणत्वसादृश्येनैवाद्यानां चतुर्णामतिदेशः प्रसाध्यः । सर्वथा नाद्यस्यैव चतुर्ष्वतिदेशः । एवं च 'अग्निष्टोममुखानि' इत्यनुवादोपपत्तिः । इतरेषां त्रयाणामन्यसंस्थाकत्वात् । इतरथा 'अग्निष्टोमानि' इत्येवावक्ष्यत् सर्वेष्वग्निष्टोमसंस्थाकत्वस्यैवातिदेशेन प्राप्तेः॥ २ ॥

(३)—कालाभ्यासेऽपि बादरिः कर्मभेदात् ॥ तदावृत्तिं तु जैमिनिरह्नामप्रत्यक्षसङ्ख्यत्वात् ॥ ७ ॥

षट्त्रिंशद्रात्रे 'षडहा भवन्ति, चत्वारो भवन्ति' इति श्रुतम् । द्वादशाहान्तर्गतदशाहे चाद्यः एकष्षडहः सधर्मकश्श्रुतः । तदिह तस्यैव वारचतुष्टयमत्र प्रवृत्तिः उत दशाहस्यावृत्तिरिति चिन्तायां—न तावदत्र षडहशब्दो नामातिदेशकः । तस्य सङ्ख्याविशिष्टाहर्वाचकस्य गुणविशिष्टकर्मविधायित्वेन नामत्वाभावात्।

नामत्वेऽपि वा यौगिकत्वेनोक्तविधायित्वाक्षतेर्नातिदेशकत्वायोगाच्च। नापि प्राकृतषडहानुवादेन सङ्ख्याविधिः द्वादशाहत्वानुपपत्त्या तस्यानतिदेशात्। अतः कर्मान्तराण्येव सङ्ख्यया चतुर्विंशतिर्विधीयन्ते। न तु षडहस्य चतुरावृत्तिः। तथात्वे चतुष्षडहो भवतीति क्रियाभ्यावृत्तिविहितसुच्प्रत्ययापत्तिः। 'चत्वारो भवन्ति' इति श्रवणात्तु पृथक्त्वनिवेशिन्या सङ्ख्यया भेद एव। अतश्च गणत्वसामान्याद्दशाहं द्विरभ्यस्यावशिष्टेषु चतुर्षु दशाहाद्यानां चतुर्णां प्रवृत्तिरिति प्राप्ते—

यद्यपि तन्त्ररत्नरीत्या चतुर्विंशतिरेतानि कर्माणि तथाऽपि षडहशब्दवत्त्वसादृश्येन तस्यैव चतुर्वारं प्रवृत्तिः। वस्तुतस्तु नात्र तावन्ति कर्माणि शृतुर्विंशतिसङ्ख्याया अश्रवणात् षट्सङ्ख्यायाश्चतुस्सङ्ख्यायाश्चैकत्र द्वयं इति न्यायेन कर्मान्वयमङ्गीकृत्य भेदाङ्गीकारे कर्मदशकापत्तिः। षट्सङ्ख्यायास्समासगतत्वेन तथाऽन्वयानुपपत्तेश्च। अतः एकविशिष्टे अपरविशिष्टमिति न्यायेनैव षट्सङ्ख्याविशिष्टे चतुस्सङ्ख्यान्वयो वाच्यः। अतश्च सत्यप्येकवाक्यत्वे प्रयाजैकादशत्वन्यायेन निर्ज्ञातसङ्ख्यत्वाच्चतुस्सङ्ख्या आवृत्त्यापादिकैव। वस्तुतस्तु पृथगाख्यातश्रवणादत्रापि भिन्नवाक्यत्वमेव। तेन षण्णामेव कर्मणां चतुर्वारमावृत्तिः। सुच्प्रत्ययाभावेऽपि च प्रमाणान्तरेणावृत्तिकल्पने न कश्चिद्दोषः। अतस्सूत्रभाष्यस्वारस्येन षण्णामेवावृत्तेः षट्सङ्ख्यत्वसादृश्यादिना षडहस्यैव वारचतुष्टयं धर्मः॥ ३॥

(४)—संस्थागणेषु तदभ्यासः प्रतीयेत कृतलक्षणग्रहणात्॥ ८॥ अधिकाराद्वा प्रकृ-

तिस्तद्विशिष्टा स्यादभिधानस्य तन्निमित्तत्वात् ॥ १ ॥

'अनारभ्य शताग्निष्टोमं भवति शतोक्थ्यं शतातिरात्रम्' इति श्रुतम्। तत्राग्निष्टोमादिशब्दानां ज्योतिष्टोम एव प्रचुरप्रयोगात्, तदनुवादेन शतसङ्ख्या अभ्यासापादिका विधीयते। न ह्यग्निष्टोमादिशब्दानां संस्थाविशिष्टक्रतुसामान्यवाचित्वं, तथात्वे 'अथातोऽग्निमग्निष्टोमेन' इत्यादौ प्राकरणिकोत्तरवेद्यवरोधेन चयनस्य विकृतौ निवेशापत्तेः। अतो ज्योतिष्टोमत्वात् नात्र द्वादशाहप्रवृत्तिः। अथवा अग्निष्टोमादिशब्दानां नागृहीतविशेषणान्यायेन संस्थामात्रवाचित्वाज्ज्योतिष्टोमे निरूढलक्षणाङ्गीकारेऽपि प्रकृते तदाश्रयणे प्रमाणाभावात् नित्यकाम्यसंस्थानुवादेनैव शतावृत्तिविधिः। अस्मिन्नपि पक्षे ज्योतिष्टोमस्यैवाश्रयत्वादिना सत्त्वान्न गुणातिदेशः। अस्तुवेदं कर्मान्तरं तथाऽप्यन्यपदार्थस्यैकवचनान्तत्वादेकमेव तत्। शतसङ्ख्यायाश्च संस्थागतत्वेनाभेदकत्वात्। अतश्शतसङ्ख्याकमभ्यस्तमेकं कर्म ज्योतिष्टोमविकार इति न गुणातिदेश इति प्राप्ते—

एकप्रसरताभङ्गापत्तेर्न तावज्ज्योतिष्टोमोद्देशेन संस्थोद्देशेन वा सङ्ख्याविधिः। अतो वषट्कर्तृभक्षवदेव कर्मान्तरम्। तदपि नैकं, तथात्वे एकस्य कर्मणोऽनेकसंस्थाकत्वस्याभ्यासमन्तरेणानुपपत्तेरश्रुतसुत्याभ्यासकल्पनापत्तेः। अतोऽग्निष्टोमोक्थ्यादिपदानां 'त्रिवृदग्निष्टुदग्निष्टोमः, उक्थ्यो वैरूपं साम' इत्यादौ विकृतियज्ञसामानाधिकरण्येनापि क्वाचित्कप्रयोगेण साम्प्रतिकलक्षणयातत्तत्संस्थाकयज्ञान्तरपरत्वमङ्गीकृत्य शतसङ्ख्याभिन्नतावद्यज्ञविधिरेवायम्। एवं चान्यपदार्थो न कर्म, अपि तु श्रुतं उक्थ्य-

संस्थाकाः यज्ञाः करणं यस्मिन्निति व्युत्पत्त्या फलमेवेति ध्येयम्। तदपि च नोद्दिश्य यज्ञविधिः एकप्रसरताभङ्गतादवस्थ्यापत्तेः। अपि तु तात्पर्यगत्या अंशत्रयविशिष्टतावद्भावनाविधिरेवेति युक्ता गणस्यैवातिदेशाद्दशवारमावृत्तिः। द्विगुसमासत्वाद्वा न कश्चिद्दोषः। कर्मैकत्वेऽपि वा आवृत्तेरावश्यकत्वेन सुत्यागणत्वानपायाद्वा दशाहधर्माविरोधः॥ ४॥

(५)—गणादुपचयस्तत्प्रकृतित्वात्॥ १०॥ एकाहाद्वा तेषां समत्वात्स्यात्॥ ११॥

शताग्निष्टोमादौ द्वादशाहगतदशरात्रप्रवृत्तिरित्युक्तम्। द्वादशाहे च प्रथमोत्तमावतिरात्रसंस्थाकौ। दशरात्रप्रथमोत्तमौ च अग्निष्टोमसंस्थाकौ। मध्यगतानि चाष्टौ उक्थ्यसंस्थाकानि। केषांचित् सप्तोक्थ्यसंस्थाकानि। एकषोडशी। तदिह शताग्निष्टोमे तावदतिदेशप्राप्तानामुक्थ्यादीनां बाधात् अग्निष्टोमसंस्थाकत्वे न काऽपि क्षतिः। उक्थ्यातिरात्रयोस्तु येष्वतिदेशेनैवोक्थ्यस्तोत्रादि प्राप्तं तेष्वपि न काचिच्छङ्का। येषु तु अग्निष्टोमसंस्थाकत्वप्राप्तिस्तेषु वचनादेवोक्थ्येषु कर्तव्येषु द्वादशाहिकान्येवोक्थ्यातिरात्रस्तोत्राणि उपस्थितत्वात्कर्तव्यानीति प्राप्ते—

न तावदतिदेशेन तेषामुपस्थितिः 'प्रथमस्य प्रथमं' इत्येवं क्रमेण प्रत्येकमेव तत्तदहस्सु तत्तदह्नामतिदेशेन यान्यहानि उक्थ्यसंस्थाकप्राकृताहार्विकाराणि तेषु तदीयोक्थ्यप्राप्तावपि अग्निष्टोमसंस्थाकप्राकृताहर्विकारेषु तत्प्राप्तौ प्रमाणाभावात् प्रथमोत्तमयोरेवातिरात्रसंस्थाकत्वेन तयोः क्वाप्यनतिदेशेन रात्रिपर्यायाणां सुतरामप्राप्तेश्च। अतदशतोक्थ्यादौ तेषु तेष्वहस्सु वाचनिकानि

स्तोत्राणि। 'न हि भिक्षुको भिक्षुकान्तरं याचते' इति न्यायेन ज्योतिष्टोमस्थान्येव कार्याणि। अयं च नातिदेशः अपि तु कर्मान्तरत्वे प्रमाणाभावात् यत्रोक्थ्यप्रसिद्धिः तत्रत्यानि वचनेन विधीयन्ते।

किञ्च स्तोत्राणामुत्पत्तिः ज्यौतिष्टोम एव। द्वादशाहे तु अतिदेशप्राप्तस्तोत्रानुवादेन धर्मविशेषमात्रम्। अतश्च ज्योतिष्टोमिकानामेवोपदेशेन विधानम्। अत एव रात्रिपर्यायादीनां ज्योतिष्टोमे फलार्थसंस्थाङ्गत्वेनेहानातिदेशेऽपि न काचित् क्षतिः उपदेशेनैव तद्विधानाङ्गीकारात् ॥ ९ ॥

(६)—गायत्रीषु प्राकृतीनामवच्छेदः प्रवृत्यधिकारात् सङ्ख्यात्वादग्निष्टोमवदव्यतिरेकात्तदाख्यत्वम् ॥ १२ ॥ तन्नित्यवच्च पृथक्सतीषु तद्वचनम् ॥ १३ ॥ न विंशतौ दशेति चेत् ॥ १४ ॥ ऐकसङ्ख्यमेव स्यात् ॥ १५ ॥ गुणाद्वा द्रव्यशब्दस्यादसर्वविषयत्वात् ॥ १६ ॥ गोत्ववच्च समन्वयः ॥ १७ ॥ सङ्ख्यायाश्च शब्दवत्त्वात् ॥ १८ ॥ इतरस्याश्रुतित्वाच्च ॥ द्रव्यान्तरे निवेशादुक्थ्यलोपैर्विशिष्टं स्यात् ॥ २० ॥ अशास्त्रलक्षणत्वाच्च ॥ २१ ॥ उत्पत्तिनामधेयत्वाद्भक्त्या पृथक्सतीषु स्या-

त् ॥ २२ ॥ नञ्नर्मिति चेत् ॥ २३ ॥ यावदुक्तम् ॥ २४ ॥ अपूर्वे च विकल्पस्स्याद्यदि सङ्ख्याविधानम् ॥ २५ ॥ ऋग्गुणत्वान्नेति चेत् ॥ २६ ॥ तथा पूर्ववति स्यात् ॥ २७ ॥ गुणावेशश्च सर्वत्र ॥ निष्पन्नग्रहणान्नेति चेत् ॥ २९ ॥ तथेहापि स्यात् ॥ ३० ॥ यदि वाऽविशये नियमः प्रकृत्युपबन्धाच्छरेष्वपि प्रसिद्धस्स्यात् ॥ ३१ ॥ दृष्टः प्रयोग इति चेत् ॥ तथा शरेष्वपि ॥ ३३ ॥ भक्त्येति चेत् ॥ तथेतरस्मिन् ॥ ३५ ॥ अर्थस्य चासमाप्तत्वात् न तासामेकदेशे स्यात् ॥ ३६ ॥

बृहस्पतिसवे प्रकृतितो गायत्रत्रैष्टुभादिनानाच्छन्दस्सु प्रायेषु छन्दोन्तरपरिसङ्ख्यार्थं 'गायत्रमेतदहर्भवति' इति श्रुतम्। तत्र गायत्रयादिशब्दानां चतुर्विंशत्याद्यक्षरसङ्ख्यामात्रवाचित्वात् नागृहीतविशेषणान्यायेन लक्षणयाऽपि ऋक्षु प्रयोगोपपत्तेस्तत्रापि न शक्तिः। अतश्च प्राकृतीष्वेव ऋक्षु अधिकाक्षरलोपं कृत्वा चतुर्विंशत्यक्षराण्येव पठनीयानि।

अत एव 'ये हि द्वे गायत्र्यौ सैका जगती' इति लिङ्गमपि सङ्ख्यावाचित्वपक्षे उपपद्यते न ऋग्वाचित्वपक्षे 'तिस्रोऽनुष्टुभ-

श्रुतस्तो गायत्र्यो भवन्ति' इति च। अन्ततः शताग्निष्टोमे उक्थ्यादिस्तोत्रलोपवदिहाप्यधिकाक्षरविलोपप्रसक्तौ न गायत्र्यादिशब्दानां सङ्ख्यामात्रवाचित्वं, तथात्वे घटादिसङ्ख्यायामपि प्रयोगापत्तेः। प्रयोगानुसारेणाक्षरसङ्ख्यावाचित्वे तेनैव ऋग्विशेषस्य वाच्यतापत्तेः। इतरथा तावदक्षरगद्येऽपि प्रयोगापत्तेः। अतोऽष्टाक्षरपादत्रययुक्त ऋङ्मन्त्रविशेष एव गायत्र्यादिपदवाच्यः। निरुक्तलिङ्गेषु तु सङ्ख्यामात्रे लाक्षणिकः। तेन दाशतयीभ्य एवोत्पन्नगायत्र्य आनेया नाक्षरावेलोपः। तथात्वे वाक्यार्थपरिपूर्त्यभावेनार्थप्रकाशकत्वानुपपत्तेश्च। पूर्वाधिकरणे अधिकागमरूपोपचयाश्चिन्तितः तत्प्रसङ्गादिहापचयाश्चिन्त्यत इति नात्र तथाऽध्यायसङ्गतौ यतितव्यम् ॥ ६ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
अष्टमस्याध्यायस्य तृतीयः पादः.

अथाष्टमस्याध्यायस्य चतुर्थः पादः

(१)–दर्विहोमो यज्ञाभिधानं होमसंयोगात् ॥
स लौकिकानां स्यात्कर्तुस्तदाख्यत्वात् ॥
सर्वेषां वा दर्शनाद्वास्तुहोमे ॥ ३ ॥
जुहोतिचोदनायां वा तत्संयोगात् ॥ ४ ॥
द्रव्योपदेशाद्वा गुणाभिधानं स्यात् ॥ ५ ॥

न लौकिकानामाचारग्रहणत्वाच्छब्दवतां चान्यार्थविधानात् ॥ ६ ॥ दर्शनाच्चान्यपात्रस्य ॥ ७ ॥ तथाऽग्निहविषोः ॥ ८ ॥ उक्तश्चार्थसम्बन्धः ॥ ९ ॥

तदेवं सिद्धेऽतिदेशे दर्वीहोमेषु तदपवादं वक्तुं दर्वीहोम शब्दार्थो निरूप्यते। तत्र न तावदयं दर्व्याख्यस्य गुणस्य विधिरिति शङ्कितुं शक्यं, सोमादिवत् विधिवाक्ये श्रवणाभावेन विधायकत्वशङ्कानुपपत्तेः। न च वास्तुहोमीयगुणविध्यर्थवादे 'यदेकया जुहुयाद्दर्विहोमं कुर्यात्' इत्यत्र श्रुतस्य दर्विहोमपदस्य घृतादिपदवत् पदान्तरकल्पनया विधायकत्वसम्भवः। 'पुरोनुवाक्यामनूच्य याज्यया यजति इति ऋग्द्वयरूपगुणविधेर्द्रव्यापेक्षाभावात्। न च सिद्धवन्निर्देशान्यथानुपपत्त्या 'उपरि हि देवेभ्यो धारयति' इतिवत् वाक्यान्तरकल्पनया होमादेशेनैव दर्विविधायकत्वं, वास्तुहोमे तावत् स्रुचः प्रत्यक्षशिष्टत्वेन विधातुमशक्यत्वात्, होमान्तरेष्वपि स्मार्तेषु 'न्यग्बिलया मूलदण्डया दर्व्या जुहोति' इति स्मार्तवचनेनैव तत्प्राप्तेः, श्रौतेष्वपि 'स्रुवेण जुहोति, चमसेन जुहोति, जुह्वा जुहोति' इत्यादिना तत्रतत्र तत्तत्पात्रान्तरसद्भावाच्च। अतश्च तत्प्रख्यन्यायेन गुणविधित्वानुपपत्तेः दर्विशब्दं पात्रान्तरस्योपलक्षणमङ्गीकृत्यैकदेशप्रवृत्तिनिमित्तेन वा तत्साध्यहोममात्रस्येदं नामधेयम्।

तत्रापि यथैव स्मार्तानां पार्वणस्थालीपाकादीनां कर्तरि दार्विहोमिक इति प्रयोगदर्शनात् प्रवृत्तिनिमित्तसद्भावाच्च तेषां नामधेयं तथैव वास्तुहोमे प्रयोगाच्छ्रौतानामपि। न च वास्तु-

होमस्यैकया ऋचा करणे दर्विहोमत्वप्रसक्त्यभिधानात् वस्तुतो दर्विहोमत्वाभावप्रतीतेरस्य प्रयोगस्य विरुद्धत्वमिति वाच्यं दर्विहोमपदस्य स्मार्तमात्रनामत्वे वास्तुहोमे एकया ऋचा क्रियमाणेऽपि दर्विहोमत्वानापत्तेरस्यार्थवादस्य ज्ञापकविधया श्रौतेष्वपि होमेषु दर्विहोमपदप्रवृत्तिसाधकत्वात्। अतस्सर्वनामधेयम्।

तत्रापि होमपदश्रवणात् होमानामेव न तु यागानाम्। न च यागस्थलेऽपि 'चतुरवत्तं जुहोति' इत्यनेन होमविधानात्तन्नामत्वोपपत्तिः, तत्रत्यजुहोतिना प्रक्षेपमात्रस्यैव प्रतिपत्तिरूपस्य लक्षणया विधेयत्वेन तस्य मुख्यहोमत्वाभावात्। अतो होमनामधेयमेवेदम्। इदं च सिद्धमेवोत्तरविवक्षार्थं प्राप्यते ॥१॥

(२)—तास्मिन् सोमः प्रवर्तेताव्यक्तत्वात् ॥ न वा स्वाहाकारेण संयोगात् वषट्कारस्य च निर्देशात् तन्त्रे तेन विप्रतिषेधात्॥ शब्दान्तरत्वात् ॥ १२ ॥ लिङ्गदर्शनाच्च ॥ उत्तरार्थस्तु स्वाहाकारो यथा साप्तदश्यं तत्राविप्रतिषिद्धा पुनः प्रवृत्तिर्लिङ्गदर्शनात् पशुवत् ॥ १४ ॥ अनुत्तरार्थो वाऽर्थवत्त्वात् आनर्थक्यात् हि प्राकृतस्योपरोधस्स्यात् ॥ १५ ॥ न प्रकृतावपीति चेत् ॥ १६ ॥ उक्तं समवाये पारदौर्ब,

ल्यम् ॥ १७ ॥ तच्चोदना वेष्टेः प्रवृत्तित्वात् तद्विधिरस्यात् ॥ १८ ॥ शब्दसामर्थ्याच्च ॥ १९ ॥ लिङ्गदर्शनाच्च ॥ २० ॥ तत्राभावस्य हेतुत्वाद्गुणार्थे स्याददर्शनम् ॥ २१ ॥ विधिरिति चेत् ॥ २२ ॥ न वाक्यशेषत्वात् गुणार्थे च समाधानं नानात्वेनोपपद्यते ॥ २३ ॥ येषां वाऽपरयोर्होमः तेषां स्यादविरोधात् ॥२४॥ तत्रौपधानि चोद्यन्ते तानि स्थानेन गम्येरन् ॥ २५ ॥ लिङ्गाद्वा शेषहोमयोः ॥ २६ ॥ प्रतिपत्ती तु ते भवतः तस्मादतद्विकारत्वम् ॥ २७ ॥ सन्निपाते विरोधिनामप्रवृत्तिः प्रतीयेत विध्युत्पत्तिव्यवस्थानादर्थस्यापरिणेयत्वात् वचनादतिदेशस्स्यात् ॥ २८ ॥

तेष्वव्यक्तत्वसामान्येन सोमयागविकारत्वं अव्यक्तत्वं चोत्पत्तिवाक्ये देवताभावरूपं न तु स्वाङ्गतया देवताशून्यत्वं तथात्वे सिद्धान्ते दर्विहोमेषु देवताऽभावप्रसङ्गात्। अत एवोपांशुयाजविकारत्वमपि शक्यं वक्तुम्। अथवा होमत्वसामान्याधिक्यान्नारिष्टहोमविकारत्वम्। अत एवाग्निहोत्रे 'यदि कीटोऽ-

वपद्येतान्तःपरिधि निनयेत्' इति परिधिदर्शनम्। परिधेर्हि अङ्गप्रधानार्थत्वात् नारिष्टहोमाङ्गत्वमपि सुलभमेव। तथा अग्नौ-'अन्तर्वेदि तिष्ठन् सावित्राणि जुहोति' इति वेदिदर्शनं नारिष्ट-होमविकारत्वसाधकम्। यत्तु मूले पत्नीसंयाजविकारत्वं शङ्कितं तत् तेषां यागत्वादुपेक्षितम्। यदि परमुपांशुयाजसाधारण्येन तदाऽस्तु पिष्टलेपफलीकरणहोमयोर्वा विकाराः। सर्वथा नापूर्वा दर्विहोमा इति प्राप्ते—

द्रव्यदेवतादिसन्निपत्योपकारकाङ्गसामग्रीसाकल्यरूपकृत्स्नवि-धानत्वेन यावदुक्तैतिकर्तव्यतयैव निराकाङ्क्षत्वात् सादृश्यस्य च विनिगमनाविरहेणानियामकत्वात् अपूर्वा एव दर्विहोमाः न प्रकृतिपूर्वाः।

यत्तु परिधिवेदिदर्शनं तत् देशोपलक्षणतयाऽप्युपपन्नम्। एवं त्र्यम्बकहोमेषु औचित्येन 'नात्रेध्माबर्हिस्संनह्यते न प्रया-जानूयाजा इज्यन्ते न सामिधेनीरन्वाह' इति स्तुतिरप्युपप-द्यते। अतिदेशपक्षे स्वतन्त्रपर्युदासकल्पने विध्यन्तरैकवाक्यता-भङ्गापत्तेः। सोमयागाद्यविकारत्वे इदमपरं लिङ्गं - औदुम्बरी-होमे 'घृतेन द्यावापृथिवी आपृणेथाम्' इति अन्तरा कर्णौ जुहोति भूमिगते आज्ये स्वाहाकार इति। सोमयागादिविकारत्वे हि अतिदेशेन वषट्कारः प्राप्येत तत्र 'स्वाहाकारस्यापि विधिर-पूर्वविधिस्स्यात्।

अस्मन्मते तु 'स्वाहाकारेण वा देवेभ्यो हविः प्रदीयते वषट्कारेण वा' इत्यनारभ्याधीतवाक्येन विहितयोस्स्वाहाकारव-षट्कारयोः विकल्पेन प्रदानमात्रे प्राप्ते 'याज्याया अधिवषट्क-रोति' इतिवचनेन याज्यावत्कर्मणि वषट्कारनियमात् तद्रहिते

परिशेषादेव स्वाहाकारप्राप्तेस्तदनुवादेन भूमिगमनोपलक्षितकालमात्रविधानाल्लाघवम्। न चैवं परिशेषादेव सर्वत्र स्वाहाकारप्राप्तौ 'अग्निर्ज्योतिः' इत्यादौ क्वचित्पुनस्स्वाहाकारपाठवैयर्थ्यं, तस्य मन्त्रत्वसिद्ध्यर्थत्वेन सार्थक्यात्। यदि त्वातिदेशपक्षेऽपि औपदेशिकमन्त्राम्नानादेव याज्याराहित्याद्वषट्कारप्राप्त्यभावेन परिशेषसिद्धेः स्वाहाकारप्राप्तिरुद्भाव्येत ततो नेदं लिङ्गमिति ध्येयम्। अतस्सिद्धं दर्विहोमा अपूर्वा इति ॥ २ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
अष्टमस्याध्यायस्य चतुर्थः पादः.
अध्यायश्च समाप्तः.

अथ नवमस्याध्यायस्य प्रथमः पादः.

(१)–यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात् ॥ १ ॥

तदेवं सिद्धेऽतिदेशे तत्प्रापितपदार्थविषय ऊहश्चिन्त्यते। त्रिविधश्चोहो निरूप्यते। मन्त्रोहस्सामोहस्संस्कारोहश्च। तत्र ऊहो नाम प्रकृतावन्यथादृष्टस्य विकृतावन्यथाभावः। तत्त्वं च येन सम्बन्धेन यद्धर्मावच्छिन्नवृत्तित्वं यस्य प्रकृतौ श्रुतं तस्य तेन सम्बन्धेन विकृतौ तद्धर्मावच्छिन्नभिन्नवृत्तित्वम्। अस्ति चेदं देवस्य त्वादिमन्त्रेषु प्रोक्षणादिसंस्कारेषु च। मन्त्राणां हि स्मारकत्वसम्बन्धेनाग्नित्वाद्यवच्छिन्नवृत्तित्वं श्रुतं प्रकृतौ। विकृतौ च तेनैव सम्बन्धेन तद्धर्मावच्छिन्नभिन्नसूर्यादिवृत्तित्वात्। एवं प्राक्षणावघातादीनामपि संस्कार्यतासम्बन्धेन व्रीहित्वाद्यवच्छिन्नवृत्तित्वं प्रकृतौ श्रुतं, विकृतौ च तेनैव सम्बन्धेन तद्धर्मावच्छिन्नभिन्नश्यामाकादिवृत्तित्वात्। एवं साम्नामपि आयीभावादिरूपाणां येन सम्बन्धेन यत्स्थानगतैकारवृत्तित्वं प्रकृतौ श्रुतं विकृतौ तेषां तेनैव सम्बन्धेन तत्स्थानभिन्नस्थानगतैकारवृत्तित्वादूहः।

अत्र श्रुतत्वं तात्पर्यमनपेक्ष्य प्रतीयमानत्वं तेनोक्तैकारवृत्तित्वस्य शब्दादप्रतीतावपि न क्षतिः। अत्र च सम्बन्धैक्याविवक्षायां श्रुतपशुपुरोडाशयागोद्देशांशस्य प्रकृतौ स्मारकत्वस-

म्बन्धेनाग्नीषोमदेवतावृत्तौ विकृतावनुपयुक्तान्यदेवताविधानेन आराद्उपकारकस्य सम्बन्धान्तरेण क्रतूपकारवृत्तित्वादतिप्रसङ्गवारणाय सम्बन्धैक्यविवक्षणम् । प्रकृतावेव श्रुतव्रीहित्वावच्छिन्नवृत्तित्वेन श्रुतानामवघातादीनां तद्भिन्नयवादिवृत्तित्वात् तद्धारणाय प्रकृतिविकृतिपदोपादानम् । प्रकृतिस्थव्रीहिव्यक्त्यपेक्षया सौर्यादिविकृतिस्थव्रीहिव्यक्तीनां भेदादातिदेशिकव्रीहिमत्सौर्यादावेवावघातादीनामूहवारणार्थं यद्धर्मावच्छिन्नात विशेषणं सौर्यस्थव्रीहिषु तद्धर्मवत्त्वावच्छिन्नप्रतियोगिताकव्रीहिभेदसत्त्वेऽपि व्रीहित्वावच्छिन्नप्रतियोगिताकतद्भेदाभावात् । यवसाध्यविकृतौ तूहाङ्गीकारेऽप्यदोषः । प्रकृतौ प्रोक्षणादीनां तात्पर्यगत्या अपूर्वसाधनत्वावच्छिन्नवृत्तित्वस्यैव विवक्षितत्वेन विकृतावपि तेनैव रूपेण श्यामाकवृत्तित्वादसम्भवः । अपूर्वयोर्दर्शपूर्णमासीयत्वादिना भेदविवक्षायां तु सौर्यस्थव्रीहिष्वतिव्याप्तिमाशङ्क्य श्रुतपदं निरुक्तप्रतीयमानत्वार्थकम् । अपूर्वसाधनत्वस्य तात्पर्यज्ञानाधीनत्वेन निरुक्तश्रुतत्वाभावात् । अत्र चाग्निपदस्थाने सूर्यादिपदप्रक्षेपेऽप्यवशिष्टमन्त्रस्य प्राकृतत्वानपायान्न लक्षणे तस्येति शब्दानुपपत्तिः ।

एवं च यत्र प्राकृत ऋक्स्थाने ऋगन्तरस्योहः तत्रोहशब्दो भाक्त इति ध्येयम् । अथवाऽस्तु तदनुरोधेन तस्येति पदं प्राकृततत्कार्यापन्नान्यतरपरामिति संक्षेपः । स चोहः प्राकृतपदार्थानां प्रकृतौ यद्रूपावच्छिन्नोद्देश्यसम्बन्धित्वेन विधानं तद्रूपावच्छिन्नसम्बन्धित्वेनैवातिदेशे सिध्येत् । न तु स्वरूपेणैवातिदेशे. तथात्वे अग्निपदस्यैवातिदेशेन सौर्ये तस्यैवादृष्टार्थिप्रयोजनान्तरकल्पनया प्रयोगोपपत्तावूहानापत्तेः । अत एवोपकारपृष्ठभावेन पदार्थानां विकृतावतिदेशः प्रकृतौ निरूपितरू-

पाणामेव वा विकृताविति देश इति दशमे वक्ष्यते । तदिह ऊहोपोद्घाततया किं प्रोक्षणावघातादीनां 'अग्नये जुष्टं निर्वपामि' इत्यादावग्न्यादिपदानां च प्रकृतौ व्रीहित्वाग्नित्वाद्यवच्छिन्नोद्देशेन विधानं, ततश्च व्रीह्यग्न्यादिप्रयुक्तास्ते ? अथवाऽपूर्वसाधनत्वावच्छिन्नोद्देशेन, ततश्चापूर्वप्रयुक्ता इति चिन्त्यते—

व्रीह्यादिप्रयुक्तत्वे श्यामाके चरौ सौर्ये वा व्रीह्यादीनामभावात् प्रोक्षणादीनां लोप एव न तूहः । अपूर्वप्रयुक्तत्वे तु श्यामाकादीनामपि तद्रूपावच्छिन्नत्वात् सिद्ध्यत्यूहः । तत्र यत्रापि आरादुपकारकस्थले न श्रुतमुद्देश्यतावच्छेदकं तत्रापि करणानुग्राहकाकाङ्क्षारूपेतिकर्तव्यताकाङ्क्षात्मकप्रकरणेन यागाङ्गतयैव प्रयाजादिविधानात् यागत्वमेवोद्देश्यतावच्छेदकं न त्वपूर्वसाधनत्वं समप्राधान्यापत्तेः । न चैतावता पारिप्लवत्वापत्तिः अनुवादस्य सति सम्भवे सन्निहितगामित्वेनाग्नेयादित्वस्यैवोद्देश्यतावच्छेदकत्वात् । न वाऽतिदेशोच्छेदः अपूर्वविशेषार्थत्व इव आग्नेयाद्यर्थत्वेऽपि तद्वत्कुर्यात् इत्यतिदेशेन आग्नेयस्थानापन्ने सौर्ये धर्मातिदेशोपपत्तेः । अतस्ते यागप्रयुक्ता एव । तदा किमु वक्तव्यं यत् व्रीह्यादि संयोगेनैव प्रोक्षणादिश्रवणात् व्रीहित्वादिकमेवोद्देश्यतावच्छेदकमिति । न च व्रीहियागादिस्वरूपार्थत्वे धर्माणामानर्थक्यं तेषामप्याग्नेयवत् फलवत्त्वेन तदभावात् । न चाग्नीनामाधानव्यतिरेकेणोत्पत्तौ प्रमाणाभावेन तदभावेऽपि व्रीह्यादीनां प्रोक्षणादिव्यतिरेकेणापि जायमानतयाऽऽनर्थक्यापत्तिस्तदवस्थैवेति वाच्यं, तादृशानर्थक्यपरिहारार्थं प्रोक्षणादिविशिष्टव्रीहीणामेव कल्पितवाक्यान्तरेण यागार्थत्वस्यापूर्वार्थत्वस्यैव वा बोधोपपत्तौ निषादस्थपतिन्यायेन व्रीहिपदे यवादिसाधारण्येनापूर्वसाधनत्वलक्षणायां प्रमाणाभावात् । अस्तु वा

व्रीहिपदे लक्षणा, तथाऽपि लाघवादुपस्थितत्वाच्च विजातीय यागसाधनव्रीहित्वादिकमेव लक्ष्यते न त्वपूर्वसाधनत्वम् । न च यागस्यापि निर्ज्ञातोपायत्वेन प्रोक्षणादिव्यतिरेकेणापि जायमानत्वादानर्थक्यापत्तिः, यागत्वावच्छिन्नस्यापूर्वत्वावच्छिन्नस्य वा जायमानत्वेऽपि विजातीययागत्वावच्छिन्नस्य प्रोक्षणादिव्यतिरेकेण जायमानत्वे प्रमाणाभावात् । न ह्याग्नेयत्वावच्छिन्नं प्रति प्रोक्षणाघटिता काचित्सामग्री क्लृप्ताऽस्ति येन तज्जन्यव्यक्तौ आग्नेयत्वाभिव्यक्तिर्भवेत् । प्रोक्षणादेरेव तु विधानबलेन तत्सामग्रीत्वात् तद्व्यतिरेकेण तदुपपत्तौ प्रमाणाभावेन न यागस्वरूपार्थत्वे आनर्थक्यं प्रोक्षणादीनाम् । अत एवारादुपकारकाणामपि यागस्वरूपार्थत्वेनानर्थक्यामिति प्राप्ते—

यद्यपि तावत् विजातीययागसाधनत्वमेव प्रोक्षणादीनामुद्देश्यतावच्छेदकं तथाऽप्यपूर्वसाधनत्व इव वक्ष्यमाणरीत्या न तत्र व्रीहित्वादिकं प्रविष्टमिति श्यामाकेष्वपि तत्सत्त्वाद्दृष्टसिद्धिरनिवार्यैव । वस्तुतस्तु—न विजातीययागसाधनत्वं उद्देश्यतावच्छेदकं विजातीययागव्यक्तीनामपि व्यापकीभूतयागत्वावच्छिन्नव्यक्त्यन्तर्गतत्वात् तदवच्छिन्नं प्रति द्रव्यत्वाद्यवच्छिन्नस्य लोकत एव कारणत्वावगतेः सामग्रीवशेन व्रीह्यादि द्रव्यं विनाऽपि द्रव्यान्तरेण कदाचित् विजातीययागव्यक्तीनामुत्पत्तौ बाधकाभावेनानर्थक्यस्य तदवस्थत्वात् । न च सामान्यसामग्र्या विशेषकारणसमवहिताया एव कार्यजनकत्वनियमः, अन्यत्र तथात्वेऽपि प्रकृते तथाकल्पनायां प्रमाणाभावात् । 'तदेव यादृक् तादृक् च होतव्यम्' इति लिङ्गानुपपत्तेश्च । अत एव अनयैव रीत्या पक्षप्राप्तिमुपपाद्य फलतो नियमविधित्वं व्रीह्यादिविधीनामुपपाद्यते प्रतिनिधिश्च । अतो द्रव्यतत्संस्कारविधयस्सर्वेऽ-

पूर्वसाधनीभूतविषया एव । व्यापकीभूतापूर्वत्वावच्छिन्नं प्रति द्रव्यत्वादिना कारणत्वस्य लोकतोऽकल्पत्वेन निरुक्तप्रतिबन्धनापत्तेः । आरादुपकारकाणामप्यनयैव रीत्या अपूर्वजननानुकूलयोग्यतासम्पादकत्वं द्रष्टव्यं न तु यागार्थत्वं, आनर्थक्यापत्तेः । यागादिनिष्ठयोग्यतासम्पादकत्वाच्च न प्राधान्यापत्तिः अङ्गत्वविघातो वेत्यादि क्षुण्णं कौस्तुभे ।

यत्तु व्रीहित्वाद्यवच्छिन्नोद्देशेनैव प्रोक्षणादिविधिः शाब्दबोधे लक्षणाया अनङ्गीकारात् पश्चात्तु निषादस्थपतिन्यायेन प्रोक्षणादिविशिष्टव्रीहीणां वाक्यान्तरकल्पनया अपूर्वार्थत्वकल्पनमित्युक्तं, तत् प्रोक्षणादेस्तज्जन्यादृष्टस्य वा व्रीहित्वावच्छिन्नभाव्यकत्वे अयोग्यतानिश्चयस्य प्रतिबन्धकत्वात् शाब्दबोधस्यैवानुपपत्तेर्लक्षणाङ्गीकरणात्प्रत्युक्तम् । अतो व्रीह्यादिपदेनापूर्वसाधनत्वावच्छिन्नलक्षणात् तदुद्देशेनैव प्रोक्षणादिविधिरिति ते अपूर्वप्रयुक्ता एवेति सिद्धश्श्यामाकादावूहः । न चैवमपि धर्मानुष्ठाने व्रीहित्वादीनामपि अनुष्ठापकतया निमित्तत्वात् विकृतौ तदभावे भेदनाभाव इव धर्मलोपापत्तिः यच्छब्दाद्यभावेन व्रीहित्वादीनां निमित्तत्वे प्रमाणाभावात् । वक्ष्यमाणरीत्या उद्देश्यतावच्छेदककोटावप्रवेशेनानुष्ठापकत्वस्याप्यभावाच्च । अत एवापूर्वस्यैव तत्त्वान्निमित्तत्वम् ।

वस्तुतस्तु—फलेच्छाया अनुष्ठापकत्वेऽपि फलस्यासिद्धस्यानुष्ठापकत्वे प्रमाणाभावात् फलीभूतापूर्वमपि न निमित्तम् । अनयैव च दिशा यागत्वस्याप्यारादुपकारकस्थले निमित्तत्वं प्रत्युक्तम् । अतो बाधकाभावात् सिद्धचत्येवोहः । यानि चात्र मूले अनेकानि वर्णकानि कृतानि तानि पुनरुक्तत्वादनुपयुक्तत्वाच्चोपेक्षितानि । मूलकारैस्तु ग्रन्थव्याख्यानरसिकतया कृतानीति ध्येयम् ॥ १ ॥

(२)—संस्कारे युज्यमानानां तादर्थ्यात् तत्प्रयुक्तं स्यात् ॥ २ ॥ तेन त्वर्थेन यज्ञस्य संयोगाद्धर्मसम्बन्धस्तस्माद्यज्ञप्रयुक्तं स्यात् संस्कारस्य तदर्थत्वात् ॥ ३ ॥

अत्र मूले सन्निपत्तयोपकारकेषु पूर्वमुक्तमप्यपूर्वार्थत्वं त्रिभिरेभिरधिकरणैराक्षिप्य समाधीयते। तत्रेह वाक्यसंयुक्तानां अग्निमाधिकरणद्वये च लिङ्गश्रुतिसंयुक्तयोरिति विवेकः। तादिह दर्शपूर्णमासप्रकरणे श्रुते 'प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्ति' इत्यादौ प्रोक्षणं नापूर्वार्थं वाक्येन तस्यावघातार्थत्वावगमेन प्रकरणमात्रादपूर्वार्थत्वकल्पनानुपपत्तेः। न च निष्ठाप्रत्ययोक्तोलूखलमुसलोद्देशेनैव प्रोक्षणस्य 'व्रीहीन् प्रोक्षति' इतिवत् विधानात् कथं व. येनापि तस्यावघातार्थत्वं, द्वितीयावत् निष्ठाकर्मत्वस्य विशेष्यतयाऽनुक्तेः कर्मत्वस्य द्रव्योपसर्जनत्वप्रतीत्या तयोरुद्देश्यत्वानुपपत्तेः। अतश्च प्रोक्षणस्यानर्थक्यतदङ्गन्यायेनोलूखलमुसलयोरवतारेऽपि वाक्यादवघातोद्देशेनैव विधानम्।

अस्तु वा उलूखलादावेवावतारे प्रमाणाभावात् प्रोक्षणस्य पदश्रुत्या तदन्वयेऽपि तृतीयया अन्यसाधनीभूतयोरेव तयोः प्रतीतेः प्रोक्षणस्यापि यदुलूखलमुसलयोः कार्यं तदर्थत्वावगतेरवघातार्थत्वसिद्धिः। सर्वथा नापूर्वार्थत्वम्। एवं च 'नैवारश्रुर्नखावपूतानाम्' इत्यादाववघातस्योलूखलमुसलयोर्वाऽभावात् नखेषु न प्रोक्षणमिति प्राप्ते—

पूर्वाधिकरणोक्तरीत्यैवावघातस्वरूपे उलूखलमुसलस्वरूपे चानर्थक्यापत्तेः अपूर्वसाधनत्वलक्षणयाऽपूर्वार्थत्वावसायादृहोप-

पक्तिरित्युक्तं तदनुपपन्नं आक्षेपप्रकारस्याधिक्स्याभावेन पौनरुक्त्यापत्तेः। किञ्चात्र प्रोक्षणं न तावद्वधातोद्देशेन विधीयते उलूखलमुसलविशेषणत्वेनैव प्रतीतेः। न ह्यस्य प्रधानक्रियान्वयो व्युत्पन्नः अपि तु निष्ठाक्षिप्तक्रियान्वय एव। नाप्यवघातसाधनीभूतोलूखलमुसलोद्देशेन, विशिष्टोद्देशापत्तेः। उलूखलमुसलयोर्विशिष्टयोरशुद्धयोर्वा उद्देश्यत्व एकप्रसरताभङ्गापत्तेश्च अतो नैवं पूर्वपक्षस्सम्भवी। अपि तु विध्यन्तरप्राप्तावघातानुवादेनार्थात् सम्भवत्प्राप्तिकयोरप्युलूखलमुससलयोः पूर्वप्रवृत्त्यङ्गीकारेण प्रोक्षणविशिष्टयोर्विधावार्थिकेन विशेषणविधिना उलूखलमुसलोद्देशेन प्रोक्षणविधिर्वाच्यः। ततश्चोलूखलमुसलत्वेनोद्देश्यता अपूर्वसाधनत्वेन वेति विचारः कार्यः। सोऽपि च तदा भवेत् यदि सकलपौरोडाशिकपात्रसाधारण्येन प्रोक्षणविधिर्न स्यात्। न त्वेतदस्ति 'उत्तानानि पात्राणि प्रोक्षति' इति विध्यन्तरेण तस्य प्राप्तत्वात्। न हि मीमांसकमते पौरोडाशिकपात्रप्रोक्षणाभावः किन्तु मन्त्राभावः मन्त्राभावस्यैव परं तृतीये साधनात्। अतः प्रकारान्तरेण प्राप्तस्यार्थस्यायमनुवादोऽभ्युदयशिरस्कतया उलूखलमुसलविधानार्थः। समासोपात्तत्वाच्च नानेकविधेयता दोषाय। अत एवं विचारो वाच्यः पात्रप्रोक्षणविधिनैवोलूखलमुसलयोरपि प्रोक्षणं प्राप्तं तत्तु पूर्वाधिकरणन्यायेनैवोलूखलमुसलनिष्ठापूर्वसाधनत्वप्रयुक्तं तयोश्च तत्साधनता न साक्षात्, अपि तु याज्याङ्गपुरोडाशाङ्गव्रीहितदवघातद्वारिकैव प्रयोजकत्वापरपर्याया। तत्र चातिप्रसङ्गपरिहारार्थं साधनतावच्छेदकस्यापि यागत्वपुरोडाशत्वव्रीहित्वतदवघातत्वादेरपि विवक्षा उत तद्व्यापारकसाधनतामात्रस्यैवेति चिन्तायां—

व्यापारवद्विनिगमनाविरहेण साधनतावच्छेदकस्यापि विव-

क्षा, इतरथा स्रुगादावतिप्रसङ्गापत्तेः। अथवा साधनताया अवच्छेदकं विना निरूपयितुमशक्यत्वात् तदेव विवक्षितं न तु व्यापारः तं विनाऽपि साधनतायास्तत्त्वेन निरूपयितुं शक्यत्वात् अतश्च नखेषु अवघाताद्यभावात् न प्रोक्षणम्। एवं च यद्यपि श्रुतस्योलूखलत्वादेरपूर्वसाधनत्वलक्षणौपयिकतयोपक्षीणत्वादविवक्षा स्यात्, तथाऽप्यान्तराळिकानां साधनतावच्छेदकानां यागत्वप्रभृतीनां विवक्षा दुर्निवारैवेति प्राप्ते—

अपूर्वनिष्ठकार्यतानिरूपितकारणतायामतिप्रसङ्गपरिहारार्थं मध्यवर्तितया झडित्युपस्थितव्यापारस्यैव विवक्षा न तु साधनतावच्छेदकस्य, तस्य कारणतायाः पश्चादुपस्थितेः। अत एव यत्र मध्ये यागादौ न व्यापारः तत्र कारणताया एव शृङ्गग्राहिकया विवक्षणं न तु तदवच्छेदकस्य गौरवात्। उपपादितं चैतत् कौस्तुभे तेषामर्थाधिकरणे विस्तरेण, अतोऽवघातत्वादेरविवक्षितत्वात् नखेषु प्रोक्षणसिद्धिरिति।

एवं वा—एवं तावदुद्देश्यस्वरूपे आनर्थक्यप्रसक्तौ अपूर्वसाधनत्वलक्षणेत्युक्तं, तत्र प्रधानजन्यापूर्वमेव लक्ष्यते उताङ्गजन्यमपीति चिन्तायां—यत्र तावदवघातपेषणादौ न व्रीह्यादिजन्यं मध्येऽपूर्वान्तरं, तत्र प्रधानजन्योत्पत्त्यपूर्वसाधनत्वलक्षणा अविवादैव। यत्र त्वदृष्टार्थसन्निपत्योपकारेषु प्रोक्षणदीक्षणीयादिषु स्वजन्यादृष्टमस्ति तत्रापि तदङ्गानामुत्पवनादीनां 'यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयात्' इत्यादीनां च स्वराणां दर्शपूर्णमासज्योतिष्टोमाद्युत्पत्त्यपूर्वसाधनत्वलक्षणया तदर्थत्वमेव। न तु प्रोक्षणदीक्षणीयादिजन्योत्पत्त्यपूर्वार्थत्वं, तस्मिन्नपि फलवत्त्वाभावेनानर्थक्यापत्तेरिति प्राप्ते—

साक्षात्फलवत्त्वाभावेऽपि परम्परया अग्निवत् फलवत्त्वोपपत्तेरङ्गापूर्वाणामप्यनिर्ज्ञातोपायत्वेन स्वाङ्गाभावे निष्पत्तौ प्रमाणाभावात् अङ्गापूर्वस्वरूपेऽप्यानर्थक्याभावेन तत्साधनत्वलक्षणायामपि बाधकाभावात् प्रधानापूर्वार्थत्ववादिनाऽपि चाङ्गापूर्वाणामतिप्रसङ्गपरिहारार्थं द्वारत्वस्यावश्यकत्वेन तदर्थतयैवोपपत्तौ प्रधानापूर्वपर्यन्तगमने प्रमाणाभावात् लक्षितलक्षणाप्रसङ्गाच्च । झडित्युपस्थितदीक्षणीयाद्यपूर्वसाधनत्वमेव दीक्षणीयादिपदैर्लक्ष्यत इति ते धर्मास्तत्प्रयुक्ता एव । अत एवारादुपकारकाङ्गानामभिक्रमणयूपादीनां प्रयाजदैक्षादिजन्यापूर्वार्थत्वमेव । न तु दर्शज्योतिष्टोमाद्यपूर्वार्थत्वं अव्यवहितापूर्वेऽप्यानर्थक्याभावात् ।

प्रयोजनं—ज्योतिष्टोमानङ्गभूतपशुषु मेष्यादिद्रव्यकेषु उपाकरणादीनामदृष्टाभावादकरणं पूर्वपक्षे, ज्योतिष्टोमापूर्वस्थानापन्नापूर्वाभावेन प्राकृतकार्याभावात् । सिद्धान्ते तूह इति द्रष्टव्यम् । एवं दैक्षधर्मानतिदेशोऽपि पूर्वपक्षे प्रयोजनमनुसन्धेयम् ।

यत्तु भाष्यकारेणाश्वमेधे 'त्रैधातवीया दीक्षणीया भवति' इति वचनेन दीक्षणीयाकार्ये यजमानसंस्कारे विहितायां त्रैधातवीयायां पूर्वपक्षे दीक्षणीयाधर्मप्राप्तिः । सिद्धान्ते तु प्रसिद्धत्रैधातवीयाया धर्मा एवेति प्रयोजनमुक्तं तन्न—पूर्वपक्षवत् सिद्धान्तेऽपि स्थानापत्तौ बाधकाभावात् । यदि तु स्थानापत्त्यतिदेशापेक्षया त्रिविधातिदेशस्यापि बलवत्त्वस्याष्टमे साधितत्वात् नामातिदेशेन प्रसिद्धत्रैधातवीयाधर्मा एवेत्याशङ्केत तत्पूर्वपक्षेऽपि तुल्यम् । वस्तुतस्तु नेयं त्रैधातवीया प्रसिद्धत्रैधातवीयातः कर्मान्तरं, सत्यप्यनुपादेयगुणयोगे आख्यातसामानाधिकरण्याभावात् । अतः प्रसिद्धायास्तधर्मैकाया एव त्रैधातवीयाया

यजमानसंस्कारार्थत्वेन विधानात् धर्माकांक्षाविरहेण क्व स्थानापत्त्यातेदेशप्रसक्तिः ॥ २ ॥

(३)—फलदेवतयोश्च ॥ ४ ॥ न चोदनातो हि तादृण्यम् ॥ ५ ॥

पूर्वोक्ताया अपूर्वसम्बन्धित्वेनोद्देश्यतायाः क्वचिदाक्षिप्य समाधानार्थमिदमधिकरणम्। दर्शपूर्णमासयोः 'अगन्म सुवस्सुवरगन्म' इति स्वर्गप्रतिपादको मन्त्रः 'अग्नेरहमुज्जातिमनूज्जेषम्' इत्यादिश्चाग्न्यादिप्रकाशको मन्त्रश्श्रुतः। तयोश्च स्वर्गत्वाग्नित्वादिनैव स्वर्गाग्न्योर्लिङ्गकल्प्यश्रुताबुद्देश्यता उपस्थितत्वात्, न तु अपूर्वसम्बन्धित्वेन, मुख्य एवार्थे विनियोगस्यौत्सर्गिकतायाः साधितत्वेन तेन रूपेण स्वर्गादिपदैरनभिधानात्। न च स्वर्गादिस्वरूपे आनर्थक्यं, साक्षात्फलरूपस्य तस्यानिर्ज्ञातोपायत्वाविशेषेण तदर्थत्वे वैयर्थ्याभावात्। मन्त्रजन्यप्रकाशनव्यतिरेकेणेतराङ्गयुक्तप्रधानमात्रादेवोत्पत्तिसिद्धेरानर्थक्यमपूर्वेऽपि तुल्यम्। प्रयोगविधिना सर्वाङ्गसाहित्यावगतेर्मन्त्रजन्यप्रकाशनव्यतिरेकेणापूर्वानुत्पत्तिरिति तु स्वर्गेऽपि तुल्यम्। एवं देवतायामपि मन्त्रार्थवादेतिहासादिवशात् सत्यप्यपूर्वे तज्ज्ञानितदेवताप्रसादादेव फलोत्पत्त्यवगतेः प्रसादस्य च मन्त्रजन्यप्रकाशनव्यतिरेकेणोत्पत्तौ प्रमाणाभावात् तदर्थत्वम्। अत एव लिङ्गकल्प्यश्रुतिविनियोगविधौ उपस्थितत्वात प्रसादाश्रयीभूताग्नेरेव तत्त्वेनोद्देश्यता, न त्वपूर्वीयदेवतात्वेनेति न सौर्यादौ ब्रह्मवर्चससूर्यादिपदोह इति प्राप्ते—

न तावत्सर्वेषामेवावघातीदानामपूर्वार्थत्वमपहाय स्वर्गार्थत्वं शङ्कितुं शक्यं, व्रीह्यादिपदेन प्रत्यासन्नतया तेषामर्थाधिकरण-

न्यायेनाग्नेयाद्युत्पत्त्यपूर्वसाधनत्वस्यैव लक्षणात्। एवमपूर्वाङ्गीकारेण देवताप्रसादार्थत्वमवघातादीनां निराकर्तव्यम्। देवताप्रसादस्यापूर्वजन्यत्वेनाप्रत्यासन्नत्वात्।

उदाहृतमन्त्रस्थलेऽपि च न स्वर्गमन्त्रस्य स्वर्गार्थत्वसम्भवः, तद्धि किं दर्शपूर्णमासजन्यस्वर्गव्यक्तिं प्रत्येव मन्त्रजन्यप्रकाशनस्योपयोगः उत स्वर्गव्यक्त्यन्तरं प्रति। नान्त्यः—तथात्वे दर्शपूर्णमासाङ्गत्वाभावात्. सामान्यसम्बन्धबोधकप्रमाणाभावेन लिङ्गकल्प्यश्रुतेरेवाकल्पनेन स्वर्गार्थत्व एव प्रमाणाभावात्। न च स्वर्गाधिकार एव सामान्यसम्बन्धबोधकं प्रमाणं स्वर्गस्य यागाख्यकरणेनैव निराकांक्षतया तदधिकारस्याकल्पकत्वात्। न च मन्त्रस्य प्रयोजनाकांक्षयैव लिङ्गेन श्रुतिकल्पनं वाच्यस्तोमे विनियोगेनैव तस्य निराकांक्षत्वात्। अत एव लिङ्गमात्रेणापि न श्रुतिकल्पनम्। पाके समर्थस्यापि देवदत्तस्याकांक्षाभावे विनियोगादर्शनात्। नाद्यः तथात्वे हि दर्शपूर्णमासजन्यस्वर्गव्यक्तीनां न स्वर्गत्वादिनोद्देश्यता अतिप्रसङ्गात्। नापि दर्शपूर्णमासजन्यस्वर्गत्वेन तस्यापूर्वद्वारकत्वेन गुरुभूतत्वात्। किन्तु विजातीयापूर्वसम्बन्धित्वेनैव। अत एव सन्निपत्योपकारकत्वेऽपि स्वर्गप्रत्यासन्नत्वादपूर्वमपि परमापूर्वमेव न त्ववान्तरापूर्वमुद्देश्यतावच्छेदककोटिप्रविष्टम्। स्वर्गत्वस्य तु व्रीहित्वादिवदेवाप्रवेशः गौरवात्। अतश्चैवं मन्त्रलिङ्गकल्प्या श्रुतिः अनेन मन्त्रेण शक्तिजन्यबोधद्वारा परमापूर्वसाध्यं संस्कुर्यादिति। शक्तिजन्यबोधश्च वस्तुतः स्वर्गत्वप्रकारकस्स्वर्गविशेष्यक एव द्वारतायां शक्तिजन्यबोधत्वेन प्रविष्टः न त्वपूर्वसम्बन्धित्वप्रकारकः तथात्वे शक्तिजन्यत्वानुपपत्तेः। अत एव ब्रह्मवर्चसादौ द्वाराभावात् स्वर्गपदलोपे ब्रह्मवर्चसविषयक-

शक्तिजन्यबोधसिद्ध्यर्थं ब्रह्मवर्चसपदोहः । इतरथा प्रकृतावेव लक्षणया स्वर्गपदेनापूर्वसम्बन्धित्वप्रकारकबोधजनने ब्रह्मवर्चसस्यापि तेनैव रूपेण बोधोपपत्तेरूहानुपपत्तिः ।

अत एव पुत्राद्यर्थदर्शपूर्णमासप्रयोगेऽपि मन्त्रलोपः । तत्रापूर्वसाध्यफलस्य स्वर्गत्वेन बोधानुपपत्तेः । अत एव च मुख्य एवार्थे मन्त्राणां विनियोग इत्यप्युपपन्नम् । शक्तिजन्यबोधेन चापूर्वसाध्ये ज्ञाततायाः आधानात्तस्य संस्कार्यत्वमुद्देश्यत्वापरपर्यायं नानुपपन्नम् । तादृशबोधस्य च स्वजन्यश्रद्धाजन्यादृष्टद्वारा परमापूर्व एव फलोत्पत्त्यनुकूलयोग्यताजननात् फले उपयोगः, न तु फलोत्पादकत्वं, तथात्वे समप्राधान्यापत्त्या प्रकरणबाधापत्तेरित्याद्यन्यत्र विस्तरः ।

एवमग्न्यादिप्रकाशकमन्त्रेष्वपि स्वतन्त्राग्निप्रकाशनार्थत्वस्यानुपयुक्तत्वात्सामान्यसम्बन्धबोधकप्रमाणाभावाच्च पूर्ववत् तत्कल्पनानुपपत्तेरवश्यमाग्नेयसम्बन्ध्यग्निप्रकाशनार्थत्वस्यैव कल्पनीयत्वादाग्नेयस्वरूपे चानर्थक्येन प्रत्यासन्नतया तदुत्पत्त्यपूर्वीयदेवतात्वेनैवाग्न्यादेरुद्देश्यत्वकल्पना । न तु प्रसादाश्रयत्वेन प्रसादस्य परमापूर्वजन्यत्वेन विप्रकृष्टत्वात् तद्धदेव प्रयोजकत्वानुपपत्तेः । अत एव नाग्नित्वादेरपि उद्देश्यतावच्छेदककोटिप्रवेशः गौरवात् । एवं च प्रसादाश्रयत्वस्याप्युद्देश्यतावच्छेदकत्वकल्पने ऊहसिद्धिरप्रत्यूहैव । परं तु प्रसादसामान्याश्रयत्वस्याग्निहोत्रादावतिप्रसङ्गान्नोद्देश्यतावच्छेदकत्वं आग्नेयापूर्वजन्यप्रसादाश्रयत्वापेक्षया तदीयदेवतात्वस्य लघुत्वाच्च । अतश्चाग्न्यनेन मन्त्रेण शक्तिजन्यबोधद्वारा 'आग्नेयोत्पत्त्यपूर्वीयदेवतां संस्कुर्यात्' इति लिङ्गकल्प्यश्रुतिं कल्पयित्वा ऊहसिद्धिः पूर्ववदुपपादनीया, उपयोगोपि निर्वापादिमन्त्रेषु स्मृतिदार्ढ्येन त्याग-

काले झटिति देवताम्मृतिद्वारोत्पन्नपूर्वानुकूलयागनिष्पत्तियोग्यता-सम्पादन एवेत्यन्यत्र विस्तरः ॥ ३ ॥

(४)—देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात् ॥ ६ ॥ आर्थपत्याच्च ॥ ततश्च तेन सम्बन्धः ॥ ८ ॥ अपि वा शब्दपूर्वत्वात् यज्ञकर्म प्रधानं स्यात् गुणत्वे देवताश्रुतिः ॥ ९ ॥ अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात्तस्य प्रीति प्रधानत्वात् ॥ १० ॥

एवं तावदपूर्वमङ्गीकृत्यैव देवताप्रसादस्य प्रयोजकत्वं निराकृतं, इह तु तदनङ्गीकृत्य देवताप्रसाद एव प्रयोजकोऽस्तु इत्याशङ्का प्रसङ्गान्निराक्रियते। तत्र देवतायास्सम्प्रदानत्वात् तस्य च कर्मकारकापेक्षयाऽप्यभिप्रेयमाणत्वेन प्राधान्यात् यागस्य पूजारूपस्य तत्संस्कारकत्वावगतेः तस्वाश्चोपयोगापेक्षायां 'स एवैनं भूतिं गमयति, तृप्त एवैनमिन्द्रः प्रजया पशुभिश्च तर्पयति' इत्याद्यर्थवादानुसारात् प्रसन्नायाः फलदातृत्वावगतेः यागस्यैव फलजनकत्वे प्रमाणाभावे अपूर्वसाधनत्वे सुतरां प्रमाणाभावः। अस्तु वा देवताया अभिप्रेयमाणत्वोक्तावपि तस्य 'ब्राह्मणाय गां ददाति' इत्यादौ ब्राह्मणस्य फलदातृत्वासम्भवेनोपयोगाभावात् प्राधान्यासम्भवेन प्राधान्यव्यभिचारेण तत्कल्पनानुपपत्तेः प्रत्युत भावार्थाधिकरणन्यायेन यागकरणिकायां भावनायां भाव्यापेक्षायां स्वर्गस्यैव तत्त्वेनान्वयात् देवताया अपि संस्कार्यत्वे

उद्देश्यत्वानेकत्वनिमित्तवाक्यभेदापत्तेः देवताया एव यागाङ्गत्वं तथाऽपि यागस्य फलजनकत्वे व्यापारापेक्षायामश्रुतापूर्वकल्पनापेक्षया रात्रिसत्रवदार्थवादिकदेवताप्रसादस्यैव द्वारत्वकल्पनात् तत्प्रयुक्तत्वसिद्धिः। प्रसादस्य च विग्रहभोगादिव्यतिरेकेणानुपपत्तेरर्थवादाद्यनुसारेण विग्रहभोगादिकल्पनेऽपि न दोष इति प्राप्ते—

प्रसादो हि यदि इच्छारूपस्तदा तस्येच्छात्वेन तत्फलं प्रति कारणत्वे अतिप्रसङ्गापत्तेरवश्यं दर्शादिकर्तुस्तत्फलं भवन्वित्येवमाकारिकेच्छात्वेन तद्वाच्यं तथाच कारणतावच्छेदके गौरवम्। दर्शादिजन्यफलभोगे जातेऽपि तत्कर्तृत्वानपायादन्यकृतदर्शपूर्णमासजन्यप्रसादादन्यस्य फलापत्तिश्च। अतस्तत्फलव्यक्तित्वावच्छिन्नं प्रति तद्व्यक्तिकर्तुः सा फलव्यक्तिर्भवात्वित्येवमाकारिकेच्छात्वेन कारणत्वं वाच्यं तथा चानेककार्यकारणभावकल्पनं कारणतावच्छेदके गौरवं च।

किञ्चैतादृशप्रसादो यदि ब्राह्मणतर्पणान्ते तदा यागानां नष्टत्वादेवोत्पत्त्यनापत्तिः। यदि तु तत्तद्यागेभ्योऽप्यवान्तरप्रसादा आग्नेयव्यक्तिकर्तुस्तद्व्यक्तिजन्यं फलं भवत्वित्याकारिका इष्यन्ते तदा देवतानाममोघेच्छत्वस्यार्थवादेषु प्रतिपादनात् दैवादग्नीषोमीयाद्यकरणेऽपि फलापत्तिः। अथैतस्यार्थवादत्वमेवाभ्युपगम्य तादृशमहाप्रसादस्य विजातीयेच्छात्वेनैवापूर्ववादिन इव विजातीयफलत्वावच्छिन्नं प्रति कारणता, अवान्तरप्रसादानां च विजातीयतत्तदिच्छात्वेनैव महाप्रसादं फलं च प्रति कारणता, कारणतावच्छेदकसम्बन्धश्च स्वजनकयागसमवायित्वं कार्यतावच्छेदकसम्बन्धश्च फलांशे समवायः नातः कर्त्रन्तरे फलापत्तिः। अवान्तरप्रसादमहाप्रसादयोः परस्परं

कार्यकारणभावे प्रत्यासत्तिस्तु उभयत्र स्वजनकयागसमवायित्वमेव। देवतानिष्ठमेव वा तं कार्यकारणभावमङ्गीकृत्य समवाय एव प्रत्यासत्तिरस्त्विति चेत् सम्बन्धगौरवस्यैव दोषत्वात्। यागनिष्ठकारणतानिरूपितकार्यताघटकसम्बन्धस्य भवता निर्वक्तुमशक्यत्वाच्च। मन्मते तु सर्वकार्यकारणभावानां समवाय एव सम्बन्ध इति लाघवम्। एतेन प्रसादो नाम सुखविशेष इत्यपि पक्षः प्रत्युक्तः।

न चास्य गौरवस्यार्थवादिके प्रसादाख्ये व्यापारे सिद्धे फलमुखत्वमिति वाच्यं, अर्थवादस्य स्तावकतयाऽप्युपपत्तौ स्वतस्तत्कल्पकत्वाभावात् व्यापारापेक्षायां रात्रिसत्रन्यायेन तद्वाचकपदान्तरकल्पनया तस्य व्यापारत्वकल्पने च व्यापारत्वस्य कारणताघटितत्वेन तस्यास्सम्बन्धावगमपूर्वकत्वात् सम्बन्धगौरवस्य फलमुखत्वानुपपत्तेः। अतो ये तावत्प्रसादादिप्रतिपादकास्ते देवस्य त्वादिमन्त्रवदेव प्रसादादिविशिष्टदेवताप्रकाशनार्थास्सन्तो विशेषणांशे प्रकाशनस्यादृष्टार्थत्वान्नानुपपन्नाः। वैशिष्ट्यघटकसम्बन्धश्च आहार्यो वा अनाहार्यो वेत्यन्यदेतत्। अर्थवादाश्च तेनैव सम्बन्धेन स्तावका इति तेष्वपि न स्तुतिलक्षणा अतोऽन्या काचिल्लक्षणा। अस्तु वा सा तथाऽपि विधौ गौरवापत्तिस्सा न दोषः।

न चैवं विध्यनपेक्षितत्वादार्थवादिकप्रसादाद्यकल्पनेऽपि लक्षणया प्राशस्त्यतात्पर्यकस्याप्यर्थवादस्यासति प्रमाणान्तरविरोधे स्वशक्यार्थेऽपि प्रामाण्याभ्युपगमात् विग्रहभोगप्रसादादिस्वीकारादपूर्वान्त एव प्रसादस्वीकरणमस्त्विति वाच्यं अन्यतात्पर्यकस्य वाक्यस्यान्यत्र प्रामाण्यायोगात्। अन्यथा शुद्धपुरुषतात्पर्यके 'यष्टीः प्रवेशय' इत्यादौ परान्नभोजननिवृत्तितात्पर्यके

'मृदं भुङ्क्ष्व' इत्यादौ च प्रमाणान्तराविरोधात् स्वशक्यार्थेऽपि प्रामाण्यापत्तिः। अतस्सकृदुच्चारितस्य शब्दस्यानेकार्थबोधकत्वाभावनियमानुरोधेन शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य कारणत्वानुरोधेन चार्थवादानां शक्यार्थे प्रामाण्यानुपपत्तेर्न देवताविग्रहादिस्वीकारः।

न च तथाऽपि शक्यार्थविशिष्टप्राशस्त्य एव लक्षणयाऽर्थवादानां तात्पर्याद्विशेषणांशेऽपि प्रामाण्योपपत्तिः, लक्ष्यतावच्छेदके गौरवापत्तेः। अन्यथा व्रीहित्वादेरपि विवक्षापत्त्या ऊहानापत्तिः। अतः कथमपि न विग्रहादिस्वीकारः। किन्तु शब्दमात्रं देवता। अर्थस्तु प्रातिपदिकानुरोधात् चेतनोऽचेतनो वा कश्चित्स्वीक्रियते। न तु विग्रहादिमान्। उपासनादौ परं ध्यानमात्रमाहार्यं तस्येति जैमिनिमतनिष्कर्षः। ममत्वेवंवदतोऽपि वाणी दुष्यतीति हरिस्मरणमेव शरणम् ॥ ४ ॥

(५)—द्रव्यसङ्ख्याहेतुसमुदायं वा श्रुतिसंयोगात् ॥ ११ ॥ अर्थकारिते च द्रव्येण न व्यवस्था स्यात् ॥ १२ ॥ अर्थो वा स्यात् प्रयोजनमितरेषामचोदनात् तस्य च गुणभूतत्वात् ॥ १३ ॥ अपूर्वत्वाद्व्यवस्था स्यात् ॥ १४ ॥ तत्प्रयुक्तत्वे च धर्मस्य सर्वविषयत्वम् ॥ १५ ॥ तद्युक्तस्येति चेत् ॥ १६ ॥ नाश्रुतित्वात् ॥

अविकारादिति चेत् ॥ १८ ॥ तुल्येषु नाधिकारस्स्यादचोदितश्च सम्बन्धः पृथक्स्तां यज्ञार्थेनाभिसम्बन्धस्तस्मात् यज्ञप्रयोजनम् ॥ १९ ॥

अत्र मूले द्रव्यसङ्ख्याहेतुसमुदायानां यत्र श्रुत्या उद्देश्यता तत्र व्रीहित्वादिनैव न त्वपूर्वसाधनत्वेन प्रकरणेन श्रुतिसङ्कोचायोगादित्याशङ्क्य स्वरूपे आनर्थक्यापत्तेरपूर्वसाधनत्वेनेति सिद्धान्तितम। तत्र 'व्रीहीन् प्रोक्षति' इति द्रव्योदाहरणस्य 'चतुर्होत्रा पौर्णमासीम' इति समुदायोदाहरणस्य च कथञ्चित्सम्भवेऽपि सङ्ख्योदाहरणस्य 'त्रीन् परिधीन्' इति मन्त्रस्य 'अगन्म सुवः' इति मन्त्रवत् अपूर्वसाधनीभूतपरिधीयत्ताप्रकाशनार्थत्वस्य सिद्धत्वादनुदाहरणत्वमिति वार्तिककारेणैवोक्तं तथा हेतूदाहरणेऽपि। यत्—'शूर्पेण जुहोति तेन ह्यन्नं क्रियते' इत्यन्नकरणहेतुना तस्य व्याप्यत्वावगमात् व्याप्यस्य च सर्वत्र प्राधान्यदर्शनात् अन्नकरणोद्देशेन होमस्संस्कारकतया विधीयत इत्याशङ्क्य तृतीयया होमं प्रति शूर्पस्य करणत्वावगतेः। 'तेन ह्यन्नं क्रियते' इत्यस्य चार्थवादत्वात् होमोऽयमारादुपकारकोऽपूर्वार्थ इति विचारितं तत् व्याप्यस्यापि जुह्वादेः क्रतुं प्रति प्राधान्यादर्शनादर्थवादत्वस्य च हेत्वधिकरणे स्थापितत्वात्तद्विचारस्य चोहानुपयोगित्वाच्चोपेक्षितम्।

किञ्च सर्वस्यैवास्य विचारस्याद्याधिकरणेन गतार्थतेत्यन्यथा वर्ण्यते—यद्यपि यज्ञकर्मेति सूत्रेण सन्निपत्योपकारकमात्रे अपूर्वे साधनत्वलक्षणा सिद्धा। संस्कारे चेति सूत्रेण चान्तरालिकानां

यागत्वादिकारणतावच्छेदकानामविवक्षा सिद्धा। तथाऽपि श्रुतस्य व्रीहित्वादेः कारणतावच्छेदकस्य त्यागे प्रमाणाभावः। न च युगपद्वृत्तिद्वयविरोधः अपूर्वसाधनीभूतव्रीहित्वावच्छिन्नस्यैव लक्षणयोद्देश्यत्वाङ्गीकारात्। अतश्च तादृशत्वस्य नीवारादावसत्त्वान्नोहसिद्धिरिति प्राप्ते—

लक्ष्यतावच्छेदके गौरवापत्तेः श्रुतस्य व्रीहित्वस्य च लक्षणोपयोगिशक्यप्रतिपादकत्वेनापि चरितार्थत्वान्न विवक्षा। अत एव तत्तद्व्यापारिकाया विजातीयापूर्वसाधनताया एव लक्षणेति कौस्तुभे स्पष्टम्। तत्तद्व्यापारकसाधनतात्वावच्छिन्नसाधनताया एव लक्षणाच्च व्रीहियवनिष्ठकारणताया गुणादिप्रमाणेन भेदेऽपि यवसाधारण्यलाभोपीत्यपि तत्रैव व्यक्तम्। अतश्च व्रीहित्वादेरविवक्षितत्वाद्युक्तो नीवारादिषूहो विकृतौ॥

एवं यत्रापि नापूर्वसाधनत्वं 'व्रीहीनवहन्ति' इतिवत्पूर्वप्रमितं स्ववाक्य एव तु संस्कारविशिष्टस्य व्रीह्यादेः साधनत्वविधानं यथा 'प्रोक्षिताभ्यामुलूखलमुसलाभ्याम्' इत्यादौ तत्समानजातीयवाक्यान्तरे वा तत्रापि प्रोक्षणविशिष्टस्य व्रीहित्वविशिष्टस्य च विधेयक्रियाविशेषणत्वेन विधौ कृते पश्चादरुणैकहायनीन्यायेन परस्परान्वयात् प्रकृतौ तज्जातीयस्य प्रोक्षणेऽपि विकृतौ तज्जातिलोपेऽपि तत्स्थानापन्नद्रव्यान्तर एव प्रोक्षणलाभात्सिद्धत्यूहः। प्रोक्षणं प्रति विशेषणविधिवेलायामपूर्वसाधनत्वस्यैवोद्देश्यतावच्छेदकत्वं लक्षणा परं न तत्रास्ति व्रीहिपदेन व्रीहित्वस्यैवाभिधानात्। अपूर्वसाधनत्वस्य कल्पितविधावेव स्वपदेनैवाभिधानात्।

एवं यत्रापि संस्कारविध्युत्तरं तच्छब्देन संस्कृतस्य विनियोगः यथा 'तप्ते पयसि' इत्यादौ तत्रापि संस्कारवाक्ये पय-

स्त्वसमानाधिकरणधर्मावच्छिन्नोद्देशेनैव दध्यानयनविधिः न तु पयस्त्वावच्छिन्नोद्देशेन आनर्थक्यात्। स च धर्मः उत्पत्तिवाक्ये इष्टसामान्यमिव सामान्यत एव पयःपदेन प्रथमं प्रतीयते, पश्चाच्च तच्छब्देन पयस्त्वावच्छिन्नस्यापूर्वसाधनत्वे प्रमिते स धर्मोऽपूर्वसाधनत्वरूप इति प्रतीयते। तत्र च पयःपदस्य लक्षणेति पश्चादवगम्यते इति न काश्चिद्विरोधः।

वस्तुतस्तु-यद्यपि सप्तमीश्रवणात्तापविशिष्टपयोऽधिकरणकदध्यानयनस्य विहितस्य प्रयोजनापेक्षायामुद्देश्यवाचकं सामर्थ्यात् पयस्यापदमनुमीयते। तथाऽपि मन्त्रवर्णाद्यनुरोधादवस्थाविशिष्टपयोवाच्यामिक्षापदसमभिव्याहृततच्छब्दबलेन पयस्याया एवोद्देश्यत्वावगतेस्तन्निष्ठविजातीयापूर्वसाधनत्ववाचिपदस्यैव कल्पनात् न तल्लक्षणाऽपीति ध्येयम्॥ ९॥

(६)—देशबद्धमुपांशुत्वं तेषां स्याच्छ्रुतिनिर्देशात्तस्य च तत्र भावात् ॥ २० ॥ यज्ञस्य वा तत्संयोगात् ॥ २१ ॥ अनुवादश्च तदर्थवत् ॥ २२ ॥

सोमे 'त्सरा वा एषा यज्ञस्य तस्मात् यत्किञ्चित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ति' इति श्रुतम्। तत्रोपांशुत्वं किं ज्योतिष्टोमसम्बन्ध्यग्नीषोमप्राग्भागधर्मस्सन् तदीयपरमापूर्वप्रयुक्तं उताग्नीषोमीयप्राग्भागवर्तितत्तत्पदार्थधर्मस्सन् तत्तज्जन्यावान्तरापूर्वप्रयुक्तमिति चिन्तायां—

विधेये उपांशुत्वे उद्देश्यसमर्पकस्तावत् तच्छब्द इत्यविवादम्। स च पूर्वप्रक्रान्ताग्नीषोमीयप्राग्भागमेव परामृशति

न तु पदार्थान् प्राचीनशब्दस्याकृत्यधिकरणन्यायेन प्राग्भागमात्रवाचित्वात्। एकवचनप्रयोगेण भागस्यैव तदुक्तस्य तच्छब्देन परामर्शाच्च। अत एवैकेनैव तच्छब्देनोद्देश्यसमर्पणात् पूर्वपक्षे सिद्धान्ते वा अग्नीषोमीयादेर्विशेषणत्वेऽपि न विशिष्टाद्देशः। तत्र च भागं प्रति अग्नीषोमीयोऽवधित्वेन विशेषणं यज्ञश्च प्रयोगद्वारा सम्बन्धित्वेन। अत एव यज्ञपदं न त्सराशब्दविशेषणं अप्रवृत्तिविशेषकरत्वापत्तेः। अस्तु वा तस्मात्पदेन व्यवधानात् यज्ञस्य छद्म गतिरित्येवमर्थाङ्गीकारेण त्सराशब्दस्यैव विशेषणं यज्ञशब्दः। तथाऽपि प्रकृतत्वाद्भागो यज्ञसम्बन्ध्यैव। आवश्यकं चेदं सिद्धान्तिनोपि। अग्नीषोमीयावधिकयज्ञप्राग्भागवर्तिपदार्थत्वस्यैव तन्मते उद्देश्यतावच्छेदकत्वात्। तत्र च पदार्थानामनुक्तेर्लाघवाच्चाग्नीषोमीयावधिकयज्ञप्राग्भागत्वमेवोद्देश्यतावच्छेदकं तदवच्छिन्नोद्देशेनोपांशुत्वविधिः भागे चोपांशुत्वस्य साक्षादसम्बन्धात् तदारम्भकपदार्थाङ्गमन्त्राणां द्वारत्वं योग्यताबलल्भ्यम्। उद्देश्यस्य च भागस्य स्वरूपे आनर्थक्ये प्रसक्ते भागजन्यापूर्वसद्भावे प्रमाणाभावात् दीक्षणीयावाङ्नियमन्यायासम्भवेन भागसम्बन्धियज्ञजन्यपरमापूर्वसाधनत्वमेव भागनिष्ठं लक्ष्यत इति परमापूर्वप्रयुक्तमुपांशुत्वम्। एवं चोपांशुत्वस्य दृष्टार्थत्वं सम्पद्यते। अग्नीषोमीयावधि उपांशुकरणे श्रमाभावेन सौत्येऽहनि बहुकर्तव्यपदार्थानामविक्षेपेण करणात्।

एवं च तत्तत्पदार्थधर्मत्वाभावात् तद्भागारम्भके विकृतावपूर्वेऽपि पदार्थे दर्वीहोमादौ उपांशुत्वस्योहः। इतरथा तत्तत्पदार्थावान्तरापूर्वप्रयुक्तत्वेऽप्राकृतकार्यापन्ने वैदान्तरीये स्वरातिदेशरहिते च तस्मिन्नुपांशुत्वस्य कथमप्यप्राप्तेः।

यत्तु भाष्यकारेण 'मासाग्निहोत्रे तद्धागारम्भके उपांशुत्वस्योहः' इति प्रयोजनमुक्तं तत् नामातिदेशप्रापितस्य विरुद्धस्याविरुद्धस्य वा स्वरस्य सत्त्वे चोदनालिङ्गातिदेशप्रापितोपांशुत्वप्राप्त्यनुपपत्तेरुपेक्षितम्।

यदपि वार्तिकादौ 'पुरस्तादुपसदां सौम्येन प्रचरन्ति इत्यादौ उपांशुत्वोहः' इत्युक्तं तदपि सौम्यमात्रपुरस्कारेण कल्पितस्यातिदेशस्य सामान्यविहितोपांशुत्वातिदेशापेक्षया प्राबल्यादुपेक्षितम्।

न चोपांशुत्वातिदेशस्य प्रधानसम्बन्धितया प्राबल्यं आधानसामादाविव प्रधानसम्बन्धित्वस्याङ्गेषु स्वरप्राप्तौ दौर्बल्यप्रयोजकत्वात्। इतरथा मासाग्निहोत्रेऽपि तदापत्त्या भाष्यकारमतदूषणानुपपत्तेः। न चैवं प्रकृतावेव दीक्षणीयाद्यङ्गेषु तदनापत्तिः। औपदेशिकत्वेन तत्रोपांशुत्वस्य प्राबल्यात्। इतरथा प्रकृतावेव नामातिदेशविषये उपांशुत्वस्य प्राप्त्यनापत्तेः। अतः पूर्वोक्तविषय एवोपांशुत्वप्राप्तिः प्रयोजनमिति प्राप्ते—

यत्किञ्चिच्छब्दस्य सामान्यधर्मपुरस्कारेणोक्तेषु तत्तद्विशेषधर्मपुरस्कारेणानुक्तेषु बुद्धपदार्थेष्वेव प्रयोगान्नपुंसकानिर्देशाच्चाग्नीषोमीयावधिकयज्ञप्राग्भागवर्तिकर्मत्वेनैव तत्तत्पदार्थानामुद्देश्यता। अन्यथा भागस्य पुल्लिङ्गत्वात् नपुंसकनिर्देशो 'यत्प्राचीनम्' इत्येतावतैव सिद्धेः यत्किञ्चिच्छब्दश्च व्यर्थस्स्यात्। एकवचनं च सामान्याभिप्रायेण बहुत्वलक्षणार्थम्। अतश्च तत्तत्पदार्थानामेवोद्देश्यत्वात् तत्स्वरूपे आनर्थक्यप्रसक्तौ तत्तदवान्तरापूर्वसाधनत्वमेव लाघवाल्लक्ष्यते। इतरथा पदार्थसमुदायरूपभागस्य साक्षाद्यज्ञापूर्वसाधनत्वे प्रमाणाभावात्पदार्थद्वारा तदाश्रयणे लक्ष्यतावच्छेदके गौरवम्। पुनश्चोपांशुत्वस्य साक्षाद्भागेऽनन्वयात् पदार्थमन्त्राणां द्वारत्वकल्पनमित्यतिगौरवम्। अत-

स्तावत्पदार्थधर्म एवोपांशुत्वम्। अतश्च विकृतौ तद्भागारम्भके अपूर्वे न तस्योहः।

इदं चोपांशुत्वं विशेषविहितनिरवकाशस्वरान्तरावरुद्ध प्रायणीयादिपदार्थातिरिक्तपदार्थविषयमिति स्वरचर्चायां कौस्तुभे व्यक्तम्॥ ६॥

(७)—प्रणीतादि तथेति चेत् ॥ २३॥ न यज्ञस्याश्रुतित्वात् ॥ २४॥ तद्देशानां वा सङ्घातस्याचोदितत्वात् ॥ २५॥

इदमधिकरणं सूत्रकारेण पूर्वाधिकरणेऽन्तरागर्भीणत्वेन कृतमपि व्याख्यासौकर्यार्थं पृथगभिधीयते। दर्शपूर्णमासयोः 'यज्ञं तनिष्यन्तावध्वर्युयजमानौ वाचं यच्छतः यदध्वर्युयजमानौ वाचं यच्छतस्तत्प्रजापतिभूयङ्कतौ यज्ञं तन्वाते तस्मात्प्रणीताः प्रणेष्यन् वाचं यच्छति तां सह हविष्कृता विसृजति' इति श्रुतम्। तत्रायं वाग्यमः प्रणीताप्रणयनाङ्गमेव विधिवाक्यस्थलृट्प्रत्ययेन तन्मात्रार्थत्वावगमात् अतो हविष्कृदाह्वानकालावधिकवाग्यमस्य तन्मात्रार्थत्वावगमात् न भागधर्मत्वं न वा तावत्पदार्थधर्मत्वम्। यदि तु 'प्रणीताः प्रणेष्यन्' इति वाक्यस्य वाग्यमोत्पत्तिपरत्वे उत्पत्तिशिष्टकर्त्रैकत्वानुरोधेन तत्र यजमानप्राप्तयभावात् पूर्ववाक्यस्यार्थवादत्वानुपपत्तेः यजमानमात्रविधानस्य वा सुतरामनुपपत्तेरवश्यं 'यज्ञं तनिष्यन्तौ' इति वाक्यस्यैव वाग्यमाविधायकत्वमुच्येत ततोऽस्तु तत्रत्यलृट्श्रुत्या यज्ञविस्तारार्थत्वमेव। तदा हि उत्तरवाक्याभ्यां वाग्यमानुवादेन प्रणीताप्रणयनहविष्कृदाह्वानयोः पूर्वोत्तरावधित्वेन विधी। अत एव तत्रत्यमेकवचनमप्यनुवाद्यगतत्वात् 'अहं सम्मार्ष्टि' इतिवदविवक्षितम्। अतश्च

विधेयसामर्थ्यानुसारादुद्देश्यभूतो यज्ञविस्तारापरनामधेयो यज्ञभागोऽपि तदवधिक एव। यत्तु मूले पूर्वपक्षे यज्ञशब्दस्य विस्तारावशेषणत्वमनङ्गीकृत्य भागधर्मत्वमुक्तं, यज्ञशब्दस्य विस्तारं विनाऽन्यत्रान्वयस्य दुरुपपादकत्वात् भागवाचकपदाश्रवणाच्चोपेक्षितम्।

अतोऽध्वर्युयजमानकर्तृकवाग्यम एव यज्ञविस्तारपदवाच्यभागधर्मत्वेन विधीयते न तु पदार्थधर्मत्वेन तद्वाचकपदाभावात्। अतश्च पूर्वाधिकरणपूर्वपक्षवदेव यज्ञापूर्वप्रयुक्तो भागधर्मश्च वाग्यमः इति प्राप्ते—

यजमानाध्वर्युकर्तृविशिष्टवाग्यमस्य यज्ञभागार्थत्वे षष्ठावधिप्रकारापत्तेस्सन्निपत्योपकारकत्वलाभाय द्वितीयविधिप्रकारलिप्सया चाध्वर्युयजमानसंस्कारकत्वेनैव वाग्यमविधिः।

यथा च नैवं सत्युद्देश्यानेकता तथोक्तं ग्रहैकत्वाधिकरणे कौस्तुभे। तस्य च दृष्टार्थत्वात् मनःप्रणिधानमेव संस्कारः। संस्कृतयोश्च तयोरुपयोगापेक्षायां तत्तत्प्रमाणककरिष्यमाणकर्मार्थत्वमेव क्लृप्तं न तु भागार्थत्वम्। न च तयोर्भागोपयोगित्वस्यापि तद्द्वारा कथञ्चित्सत्त्वात् 'यज्ञं तनिष्यन्तौ' इति विशेषणसामर्थ्यात् यज्ञविस्तरोपयोग्यध्वर्युयजमानसंस्कारकत्वमेव वाग्यमस्य कल्प्यतामिति वाच्यं 'यज्ञं तनिष्यन्तौ' इत्यस्योद्देश्यविशेषणत्वेनाविवक्षितत्वात्। अतश्च हविरुभयत्ववत् 'यज्ञं तनिष्यन्तौ' इत्यनुवादो वाग्यमस्तुत्यर्थः। अतो दृष्टार्थत्वलाभाय पूर्वोत्तरावधिकतावत्पदार्थधर्मत्वमेव। न च लृट्श्रुत्या प्रणीताप्रणयनमात्रार्थत्वमेव कल्प्यतामिति वाच्यम्। हविष्कृदाह्वानावधेरदृष्टार्थतापत्तिभयेन तस्यापि कालोपलक्षणत्वात्। अतस्सिद्धं वाग्यमस्यापि तावत्पदार्थधर्मत्वम्॥ ७॥

(८)–अग्निधर्मः प्रतीष्टकं सङ्घातात्पौर्णमासिवत् ॥ २६ ॥ अग्नेर्वा स्याद्द्रव्यैकत्वादितरासां तदर्थत्वात् ॥ २७ ॥ चोदनासमुदायात्तु पौर्णमास्यां तथा स्यात् ॥

अग्नौ श्रुते 'हिरण्यशकलसहस्रेणाग्निं प्रोक्षति' इत्यादौ किमग्निशब्देन संस्थानविशेषसाधनीभूता इष्टका एवोच्यन्ते तदर्थं च प्रोक्षणं उतेष्टकारब्धमवयव्यन्तरमेवाग्निशब्देनोच्यते तदर्थं च प्रोक्षणमिति चिन्त्यते।

तत्र यत्रैकावयवाकर्षणेनेतरावयवाकर्षणं यत्र वा न सन्धिदर्शनं तत्रैव शरीरघटादौ अवयव्यन्तराभ्युपगमः। न चेहैकेष्टकाकर्षणेनेतरेष्टकाकर्षणं, सन्धिश्च, पुरीषच्छन्नानामपीष्टकानामनुमानेन दृश्यत एव अतो व्यापकाभावात् पक्वामसंयोगाच्च द्रव्यान्तरमिति काश्यपवन्नाच्चावयव्यन्तरे प्रमाणाभावादिष्टकासंस्कारार्थमेव प्रोक्षणम्। अतश्चेष्टकात्वसमानाधिकरणमेवापूर्वसाधनत्वमग्निपदेन लक्ष्यत इति तस्य प्रत्येकवृत्तित्वात् प्रतीष्टकं प्रोक्षणमित्यपि सिद्धं भवति। न चैवं व्रीहिपात्रप्रोक्षणादावपि प्रत्येकं तदापत्तिः। न्यायतस्तथाऽऽपत्तावपि 'अग्नये वो जुष्टं प्रोक्षामि, शुन्धध्वम्' इति मन्त्रे बहुवचनोपादानबलेन तन्त्रत्वप्रतीतेः। प्रकृते तु तादृशगमकाभावात् प्रत्येकमेवेति प्राप्ते—

एकावयवाकर्षणेनेतरावयवाकर्षणस्य नावयविव्यापकत्वं नापि सन्ध्यदर्शनस्य वृक्षपटादौ व्यभिचारात्। अतो यत्रैकाकारप्रतीतिरबाधिता तत्रैवावयविस्वीकारः। इतरथा इष्टकाया

अपि स्वीकारे प्रमाणाभावः। काश्यपीयं तु वचनं मूलाभावादनादरणीयम्। वनमित्यादौ तु बाधिता एकाकारप्रतीतिः। अतश्चाग्निपदेनावयविन एवोक्तत्वात्तदर्थमेव प्रोक्षणम्। तस्य चैकत्वात्सकृदेव प्रोक्षणम्।

न चैवमवयविस्वरूपे आनर्थक्ये अपूर्वसाधनीभूताग्न्याधारत्वलक्षणायां अग्नावग्न्युत्तरवेद्यामपि हिरण्यशकलप्रोक्षणादिधर्मापत्तिः। इष्टकादिसम्पादितलौकिकस्थलविशेषे अग्न्यादिपदप्रयोगाभावेनादृष्टविशेषावच्छिन्नस्थलविशेषस्यैवाग्न्युत्तरवेद्यादिशब्दाभिधेयत्वात्। तत्र चानर्थक्याभावेनापूर्वसाधनत्वलक्षणाया एवाभावात्। अतश्च नाग्न्युत्तरवेदिधर्माणां साङ्कर्यम्। न चैवमुत्तरवेदिधर्माणामग्नावतिदेशकथनं सङ्कर्षे विरुध्येतेति वाच्यम्। दैक्षवत् अग्नौ बहुतरवैशेषिकधर्माज्ञानेऽप्यपेक्षितहविर्धानपूर्वदेशवर्तित्वादिकतिपयधर्माणां स्थानापत्त्यतिदेशेनोत्तरवेदितः प्राप्तेरविरोधात्। उत्तरवेद्यां तु यावदपेक्षितधर्मसाकल्यान्न वैपरीत्याशङ्का।

अतश्च प्रकृतौ तत्तत्प्रोक्षणादिधर्माणामग्न्युत्तरवेदिमात्रार्थत्वे यत्र विकृतौ तदुभयकार्यापन्नमुक्तपरिमाणं स्वतस्सिद्धभूमिकं तद्बहिःखातभूमिकं स्थण्डिलमग्न्याधारत्वेन समाम्नातं तत्र प्रोक्षणादीनामूहासिद्धिः। संस्थानविशेषोपधायकक्रियासाधनीभूततदवयवार्थत्वपूर्वपक्षे तु उक्तीविकृतौ तदभावान्न प्रोक्षणादीति ऊहविचारोपयोगित्वं चास्याधिकरणस्य। यदि चैवंविधा विकृतिर्न सम्भाव्यते तदा कृत्वाचिन्तया उदाहरणान्तरमेवोहोपयोग्यनुसन्धेयम्। प्रासङ्गिकं वेदमधिकरणम्॥ ८॥

(९)—पत्नीसंयाजान्तत्वं सर्वेषामविशेषात् ॥ लिङ्गाद्वा प्रागुत्तमात् ॥ ३० ॥ अनुवादो वा दीक्षा यथा नक्तं संस्थापनस्य ॥ ३१ ॥ स्याद्वाऽनारभ्यविधानादन्ते लिङ्गविरोधात् ॥ ३२ ॥

द्वादशाहे पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्ते असंस्थितो हि तर्हि यज्ञः' इति श्रुतम्। तत्र किं पत्नीसंयाजान्तत्वं द्वादशस्वप्यहस्सु विधीयते उत उत्तमवर्जमिति चिन्तायां—

अहस्त्वाविशेषात् सर्वेषु। न चासंस्थायाः पत्नीसंयाजान्तत्वे हेतुत्वावगमात् तस्योत्तमवर्जमेव सत्त्वेन तत्रैव पत्नीसंयाजान्तत्वावगतिः। एतस्य 'तेन ह्यन्नं क्रियते' इतिवत् हेत्वर्थवादत्वेनाहेतुत्वात्। न च तर्हि तेनैव 'अक्ताश्शर्कराः' इतिवन्निर्णयः, तद्वदिह सन्दिग्धत्वाभावेन तस्यानिर्णायकत्वात्। प्रत्युद्देश्यं गुणस्यावश्यकत्वेनाविशेषप्रवृत्तविधेरर्थवादेन सङ्कोचानुपपत्तेश्च। अतश्चार्थवादोपि बहुदिनसाध्यत्वाच्चिरसंस्थाभिप्रायेण गौण्या वृत्त्या व्याख्येयः।

ननु विधिरेव स्वस्य नियमविधिलाघवानुरोधेनोत्तमभिन्नविषयत्वेन प्रतीयते। तथा हि द्वादशानामप्यहां एकफलसाधनत्वात्प्रयोगैक्यमवगम्यते। अत एवाग्नीषोमीयान्तपदार्थानां तन्त्रेण करणं, अवभृथाद्यानां च ब्राह्मणतर्पणान्तानां अहश्शब्दवाच्यसुत्यानां तु द्वादशत्वसङ्ख्यानुरोधादावृत्तिः। अहश्शब्दो ह्युपांशुग्रहाभ्यासादारभ्य द्वारियोजनयागाभ्यासपर्यन्ते प्रयोगे लक्षणया याज्ञिकानां प्रसिद्धः। अत एव तन्मध्यवर्तीनि सान्नि-

पत्योपकारकाणि आरादुपकारकाणि चाङ्गानि प्रतिसुत्यमावर्तन्त इति वक्ष्यते। एवं च एकैकमहर्यस्मिन् कस्मिन्नङ्गेऽनियमेन समाप्यापरमहरारम्भणीयमिति प्राप्ते—

पत्नीसंयाजान्तत्वविधेरेकादशसु नियमविधिस्सम्पद्यते। अन्तिमे तु सर्वस्यैव समापनीयत्वात्पत्नीसंयाजान्तत्वविधिरपूर्वविधिरापद्येत। अतश्च सर्वार्थत्वे अपूर्वविधिनियमविधिकृतवैरूप्यापत्तेः, नियमविधिलाघवानुरोधेनोत्तमवर्जमयं विधिरिति चेत् द्वादशत्वसङ्ख्यानुरोधेनाहश्शब्दवाच्यहारियोजनान्तप्रयोगस्यैवावर्तनीयत्वेन तद्भिन्नाङ्गे यस्मिन् कस्मिंश्चित् समापनस्यैवाप्रसक्तौ सर्वत्रैवापूर्वविधित्वात् पत्नीसंयाजानां हारियोजनोत्तरमेव सर्वाध्वर्युशाखान्नानेन पत्नीसंयाजानामप्यवभृथादिवत्तन्त्रेणानुष्ठेयत्वात् तेषु पक्षेऽपि समापनस्याप्रसक्तेश्च।

अत एव शास्त्रदीपिकायां तन्त्ररत्ने च पत्नीसंयाजोत्तरत्वकथनं हारियोजनस्य निर्मूलमेव। अत एवात्रत्याहश्शब्दस्य हारियोजनान्तप्रयोगवाचकस्य पत्नीसंयाजान्ते प्रयोगैकदेशे लक्षणेति केषांचिदुक्तमपास्तम्। स्वयमेव पत्नीसंयाजानां हारियोजनोत्तरत्वस्योक्तत्वेनैकदेशलक्षणाया अनुक्तिसहत्वात् अतस्सर्वाण्येवाहानि पत्नीसंयाजान्तानि कार्याणि न त्ववभृथादीनि अन्ते तन्त्रेण कार्याणि। पत्नीसंयाजान्तत्वविधिना तेषां पर्युदासात् पत्नीसंयाजानां च तन्त्रेण प्रसक्तानामावृत्तिरूपफलप्रतिपादनादिति प्राप्ते—

'असंस्थितो हि तर्हि यज्ञः' इति 'तेन ह्यन्नं क्रियते' इति वन्न हेत्वर्थवादः। तद्वदिह हेतुविधित्वे लक्षणाभावात्। तत्र तु होमकालीनवर्तमानान्नकरणत्वस्य बाधितत्वात् लटो भूतार्थ-

कत्वे विधौ लक्षणापत्तेरगत्या हेत्वर्थवादत्वाङ्गीकरणम् । अतो 'न ह्यत्रानूयाजान् यक्ष्यन् भवति' इतिवदस्य हेतुपरत्वादसंस्थाहेतुकपत्नीसंयाजान्तत्वविशिष्टसमापनभावनाया एवाहरुद्देशेन विधानात् विधेयसामर्थ्यानुरोधेनोद्देश्यानामह्नां सङ्कोचोपपत्तेः उत्तमे चासंस्थारूपहेत्वभावात् पत्नीसंयाजान्तत्वस्याप्यभावोपपत्तेरुत्तमवर्जं पत्नीसंयाजान्तता । न च हेत्वभावेऽपि व्यापकव्यभिचारस्यादोषत्वादुत्तमे पत्नीसंयाजान्तत्वेऽप्यदोषः । विशेषणाभावप्रयुक्तविशिष्टाभावात् साधकप्रमाणाभावेनैव तत्र तस्यासिद्धेः ।

अस्तु वा हिशब्दोऽत्र अव्ययानामनेकार्थत्वान्निमित्तत्वपरः । तथा चान्तिमे निमित्ताभावान्नैमित्तिकस्याभावस्सुलभ एव । एवं च निमित्तोपादानबलात् यथैव द्वादशाहे अन्तिमेऽहनि न पत्नीसंयाजान्तत्वं तथैव पञ्चदशरात्रादौ द्वादशेऽहनि पत्नीसंयाजान्तत्वम् । द्विरात्रादौ च द्वितीयादिरूप एवान्तिमे न तदित्यूहोपयोगितावत् बाधोपयोगितायामपि । अत एव प्रकृतौ तत्तद्विजातीयापूर्वसाधनत्वस्यैवाहःपदेन लक्षणायामपि विकृतौ निमित्ताभावादेव न पत्नीसंयाजान्तत्वम् । निमित्तोपादानबलेन वा प्रकृतावसंस्थावत्क्रत्वपूर्वसाधनत्वस्यैव लक्षणान्न कोपि दोषः ॥ ९ ॥

(१०)–अभ्यासस्सामिधेनीनां प्राथम्यात् स्थानधर्मस्स्यात् ॥ ३३ ॥

दर्शपूर्णमासयोस्सामिधेन्यवान्तरप्रकरणे त्रिः 'प्रथमामन्वाह त्रिरुत्तमाम्' इति श्रुतम् । तत्रानुवचनं तावत्प्रकरणप्राप्तमनूद्यते

त्रिरभ्यासमात्रं तु विधीयते । प्रथमामिति चोद्देश्यसमर्पकामित्यविवादमेव । तत्रापि प्रथमामिति विशेष्यनिघ्नं प्राथम्यविशिष्टमभिधत्ते शुक्लादिपदवत् । तच्च विशेष्यं स्त्रीलिङ्गनिर्देशात् सामिधेनीप्रकरणाच्च ऋगेव । प्राथम्यरूपविशेषणयोगाच्च ऋग्विशेषप्रतीतिरार्थिकी । न तु प्रवोवाजादित्वप्रकारिकोपस्थितिः शाब्दी, तद्वाचकपदाभावात् । अत एव प्राथम्यमेवोद्देश्यतावच्छेदकं ग्रहत्वादिवत् । न तु तदुपलक्षितप्रवोवाजादित्वं विना कारणं लक्षणायां प्रमाणाभावादित्यविवादमेव ।

इदं तु विचार्यते । प्रथमास्वरूपे आनर्थक्ये प्रसक्ते अपूर्वसाधनत्वलक्षणायां अपूर्वसाधनीभूताग्निसमिन्धनप्रकाशकऋक्त्वमात्रलक्षणेऽतिप्रसङ्गापत्तेस्तन्निराकरणार्थं उद्देश्यतावच्छेदककोटौ ऋक्त्वविशेषणतया प्रवोवाजादित्वस्य विवक्षणं उत प्राथम्यस्येति चिन्तायां—

प्राथम्यरूपस्य अश्रुतस्योद्देश्यतावच्छेदकस्य व्रीहित्वादिवदपूर्वसाधनत्वलक्षणोपयोगिशक्योपस्थितावुपक्षीणत्वेन निरुक्तापूर्वसाधनत्वरूपोद्देश्यतावच्छेदककोटिप्रवेशे प्रमाणाभावात् प्रवोवाजादित्वमेव ऋक्त्वविशेषणम् । अतश्च विकृतौ यत्रकुत्रस्था प्रवोवाजैव त्रिरभ्यासितव्या । न तु प्रथमस्थानपतितं ऋगन्तरमिति प्राप्ते—

अतिप्रसङ्गपरिहारार्थमवश्यकल्प्येन क्वचित्तत्तद्व्यापारकसाधनत्वातिरिक्तेन विशेषणेन उपस्थितत्वादुपक्षीणेनापि प्राथम्येनैव विशेषणं न त्वनुपस्थितेन प्रवोवाजत्वेन । अवघातादौ तु तण्डुलनिष्पत्तिव्यापारकसाधनतामात्रेणैवोद्देश्यत्वपर्यवसानात् यवानां धर्माकांक्षाबलेन यवसाधारण्यकल्पनेऽपि च वाक्यवैयर्थ्याभावात् नातिप्रसङ्गपरिहारार्थं व्रीहित्वप्रवेशः । प्रकृते तु

अतिप्रसङ्गाङ्गीकारे प्रथमोत्तमापदघटितवाक्यद्वयवैयर्थ्यापत्तेः 'ताः पञ्चदश सम्पद्यन्ते' इत्यर्थवादानुपपत्तेश्च विशेषणविवक्षा आवश्यकी अतश्च याकाचित् प्रथमोत्तमा त्रिरभ्यसितव्येत्यूहोपयोगोऽपि ॥ १० ॥

(११)—इष्ट्यावृत्तौ प्रयाजवदावर्तेतारम्भणीया ॥ ३४ ॥ सकृद्वाऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात् ॥ ३५ ॥

दर्शपूर्णमासयोः 'दर्शपूर्णमासावारप्स्यमाणोऽन्वारम्भणीयामिष्टिं निर्वपेत्' इति श्रुतम् । तत्र न तावदियं प्रकरणात् प्रयाजादिवत् साक्षात् क्रत्वर्था दर्शपूर्णमासावारप्स्यमान इति पदद्वयवैयर्थ्यापत्तेः । नापि वक्ष्यमाणे आरम्भे निमित्ते भेदनहोमादिवत् नैमित्तिकी, क्रियार्थायां क्रियायामुपपदे विहितेन लृट्प्रत्ययेनास्या आरम्भार्थत्वप्रतीतेरितितावदविवादम् । आरम्भशब्दार्थश्चोद्देश्यकोटिप्रविष्टः क इति चिन्त्यते । प्रतिप्रयोगमावृत्त्यनावृत्तौ तु सूत्रकाराद्युक्ते अपि फलमिति नेहाधिकरणशरीरं, एकादशोपयुक्तत्वनोहानुपयुक्तत्वात् । तत्राग्नेयन्वाधानादिरूपे प्रथमपदार्थे याज्ञिकानां दर्शपूर्णमासारम्भत्वप्रसिद्धेरग्नेयन्वाधानमेव तत्त्वेनारम्भपदार्थः । तदर्था चान्वारम्भणीया तत्कार्यप्रयुक्ता न तु प्रथमपदार्थत्वेन रूपेण प्रथमपदार्थाङ्गं येन पूर्ववदग्नेयन्वाधानरहितायां विकृतौ आरम्भाङ्गतयोह्येत ।

न चान्वाधानस्याप्यप्रवृत्तप्रवर्तनविषयत्वेनैवारम्भपदवाच्यता नान्वाधानत्वेनेति कथं न पूर्वाधिकरणविषयत्वमिति वाच्यम् । अन्वाधाने दर्शपूर्णमासविषयकाप्रवृत्तप्रवर्तनविषयत्वस्य

बाधितत्वात्। तथा हि दर्शपूर्णमासविषयकप्रवृत्तिसामान्याभाववतः पुरुषस्य या दर्शपूर्णमासविषयिणी प्रवृत्तिस्तद्विषयत्वं तत्। न तु निरुक्तपुरुषस्य यत्किञ्चिद्विषयप्रवर्तनाविषयत्वं तस्याधानभोजनादावपि सत्त्वेनातिप्रसक्तत्वात्। अतश्च निरुक्तपुरुषनिष्ठदर्शपूर्णमासविषयककृतिविषयत्वं दर्शपूर्णमासयोरेव नान्वाधाने, अङ्गप्रधानभेदेन तत्तद्विषयककृत्योर्भेदात्। न त्वत्र दर्शपूर्णमासकरणिकाभावना श्रुता 'ता उपांशुकर्तव्याः' इतिवत् द्वितीयानिर्देशेन दर्शपूर्णमासकर्मककृतेरेवारम्भपदार्थघटकत्वस्य त्वया वाच्यत्वात्। अतोऽन्वाधाने तस्य बाधात् याज्ञिकप्रसिद्ध्या रूढिरेव तत्रारम्भपदस्य। द्वितीया च षष्ठ्यर्था स त्वनुवादः ततश्च तदर्था चारम्भणीया न तद्रहितायां विकृतावूहितव्या। अतः अन्वाधानस्य प्रतिदर्शपूर्णमासप्रयोगमावृत्तेरावर्तनीया चेति प्राप्ते—

वृत्तिकारेण तावदेवं सिद्धान्तितं—नाग्नेयन्वाधानमारम्भपदार्थः। तदभावेऽपि 'देवताश्चैवं यज्ञमारभन्ते' इति ज्योतिष्टोमेऽपि आरम्भशब्दप्रयोगात् किन्तु इदं मया कर्तव्यमिति सङ्कल्पापरपर्यायोऽध्यवसायविशेषः। तदर्थान्वारम्भणीयाऽन्वाधानरहितायामपि विकृतौ सत्त्वात् कर्तव्यैव। प्रकृतौ चाधानोत्तरं सर्वयावज्जीविकप्रयोगाणां सकृदेव सङ्कल्पकरणात् सकृदेवान्वारम्भणीयेति। तन्न—तत्तत्कालावस्थिततत्तज्जीवनाख्यनिमित्तवशेन तत्तन्नैमित्तिकसर्वयावज्जीविकप्रयोगाणां तत्तत्काल एवोपस्थितत्वेनाध्यवसायापत्तौ सर्वसाधारणाध्यवसाये प्रमाणाभावात्। तत्र यथैवैकस्मिन् पुत्रे जाते वैश्वानरीं निरुप्य पुत्रान्तरजन्मनि पुनर्निर्वापेनाध्यवसायैक्यं तद्वदिहाप्यध्यवसायभेदात् सकृत्करणानापत्तिः।

तस्मादेवं भाष्यकारादिभिस्सिद्धान्तितम्—नाध्यवसायवाच्यारम्भशब्दः तत्राप्यप्रवृत्तप्रवर्तनविषयत्वेनैवारम्भशब्दप्रयोगात् अतोऽप्रवृत्तप्रवर्तनमेवारम्भः तद्विषयत्वात्तु पदार्थेष्वारम्भशब्दप्रयोगः अतस्तदर्थोऽन्वारम्भणीया, साऽपि न साक्षात्। अपि तु शानच्या कर्तुरुपात्तत्वात् जञ्ञभ्यमानवत् कर्तारं आरम्भयोग्यं करोतीति तद्द्वारा आरम्भार्था। यद्यपि च दर्शपूर्णमासाविति द्वितीयाया विषयत्वार्थकत्वात् दर्शपूर्णमासविषयकाप्रवृत्तप्रवर्तनविषयत्वस्य च दर्शपूर्णमासाख्यप्रधानस्यैव सम्भवात् ततः पूर्वं प्रयोगमध्य एवान्वारम्भणीयाऽनुष्ठेयेत्यर्थो 'दर्शपूर्णमासावारप्स्यमाण" इत्यस्य प्राप्नोति। तथाऽप्युक्तार्थस्य पाठादेव प्राप्तेः पदद्वयवैयर्थ्यप्रसङ्गेन द्वितीया उद्देश्यत्वपरा। तेनाङ्गविषयप्रवृत्तेरपि प्रधानोद्देश्यकत्वाविघातात् दर्शपूर्णमासोद्देश्यकाप्रवृत्तप्रवर्तनविषयत्वं तत्प्रथमप्रयोगीयाद्यपदार्थ एवेति तदङ्गमारम्भणीया। तथा हि उक्तविधप्रवर्तनविषयत्वं दर्शपूर्णमासोद्देश्यकप्रवृत्तिध्वंससमानकालीनतदुद्देश्यकप्रवृत्तिविषयत्वं, तच्च न दर्शपूर्णमासीयप्रथमप्रयोगाद्यपदार्थभिन्ने सम्भवति। तदितरस्य सर्वस्य तदुद्देश्यकस्य तादृशध्वंससमानकालीनत्वात्। अतश्च दर्शपूर्णमासपक्षे अपूर्वसाधनत्वलक्षणायां तत्पदार्थरहितायां तादृशप्रथमप्रयोगीयाद्यपदार्थान्तरवत्यां विकृतावूहितव्यैवान्वारम्भणीया। लृट्श्रुत्या च तादृशप्रथमपदार्थप्राग्भावविधानात् प्रयोगबहिर्भावासिद्धिः। द्वितीयादिप्रयोगे च उक्तविधधर्मावच्छिन्नपदार्थाभावादकरणम्।

अत्र हि दर्शपूर्णमासयोः न तत्तद्धयक्तित्वेन प्रवृत्तिं प्रत्युद्देश्यता येन तद्व्यक्तित्वावच्छिन्नोद्देश्यकप्रवृत्तिध्वंससमानकालीनतद्व्यक्त्युद्देश्यकप्रवृत्तिविषयत्वात् द्वितीयप्रयोगीयाद्यप-

दार्थाङ्गत्वेनापि सा स्यात्। दर्शपूर्णमासाविति श्रवणात्तु दर्शपूर्णमासत्वमेवोद्देश्यतावच्छेदकं, आवश्यकी चोभयत्रापि प्रवृत्तिनिरूपितोद्देश्यतावच्छेदकविवक्षा इतरथा सामान्यतो 'विहितक्रिया मे जायताम्' इत्याकारकोद्देश्यताया गङ्गास्नानप्रवृत्तावपि दर्शपूर्णमासोद्देश्यकप्रवृत्तित्वात् तत्राप्यारम्भणीयापत्तेः। अतो दर्शपूर्णमासत्वावच्छिन्नोद्देश्यताकप्रवृत्तिध्वंसासमानकालीनतदवच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वेनैव प्रथमपदार्थस्योद्देश्यता, अत्र सामान्याकारकेच्छायां गङ्गास्नानानुष्ठानोत्तरमाद्यदर्शपूर्णमासप्रयोगेऽप्यन्वारम्भणीया न स्यादतः प्रथमावच्छेदकविवक्षा। दर्शपूर्णमासाकरणेऽप्युक्तविधेच्छया गङ्गास्नानकरणे तदापत्तेर्द्वितीयावच्छेदकविवक्षा।

वस्तुतस्तु 'दर्शपूर्णमासौ मे जायेतां' इत्याकारकेच्छया गङ्गास्नानकरणेऽपि तदापत्तिवारणार्थं यस्मिन् पदार्थे सङ्कल्पादिरूपे कृते दर्शपूर्णमासावारब्धाविति व्यवहारस्तत्पदार्थप्रवृत्तेरेवोद्देश्यतावच्छेदककोटिप्रवेशस्यावश्यकत्वे तत एवोक्तस्थलेऽपि वारणसिद्धेस्तत्तद्व्यक्तित्वादेरुद्देश्यतावच्छेदकत्ववारणार्थमेवावच्छेदकविवक्षा। अत एव तत्पदार्थस्योक्तरूपेणैवारम्भन्वाङ्ग द्वितीयादिप्रयोगेऽन्वारम्भणीया।

नन्वेवं 'साङ्गेन ज्योतिष्टोमेन यक्ष्ये' इत्येवंविधसङ्कल्पविषयकप्रवृत्तेर्दीक्षणीयात्वावच्छिन्नोद्देश्यकप्रवृत्तित्वे ततः पूर्वमन्वारम्भणीयापत्तिः। यदि तूद्देश्यतायास्तत्र 'साङ्गो ज्योतिष्टोमो जायताम्' इत्येवमाकारिकेच्छाविषयविशिष्टवृत्तित्वेन विशिष्टधर्मावच्छिन्नत्वान्नोक्तप्रवृत्तित्वमित्याशङ्क्येत ततो 'दीक्षणीयया यक्ष्ये' इत्येवंविधावान्तरसङ्कल्पात्पूर्वमन्वारम्भणीयाकरणापत्तिः

तस्य निरुक्तप्रवृत्तिविषयत्वात् । अवान्तरसङ्कल्पविषयप्रवृत्तेः 'दीक्षणीया मे जायताम्' इत्येवमाकारिकेच्छाजन्यत्वेन दीक्षणीयात्वावच्छिन्नोद्देश्यकत्वात्। एवं राजसूयगतेष्टिपशुबन्धादिष्वप्यन्वारम्भणीयापत्तिरिति चेन्न—

'दीक्षणीया जायताम्' इत्याकारिकेच्छानुत्पत्तावपि 'साङ्गो ज्योतिष्टोमो जायताम्' इत्याकारकसाङ्गत्वराजसूयत्वप्रकारकेच्छात एव 'दीक्षणीयया यक्ष्ये' इत्येवंविधसङ्कल्पविषयकप्रवृत्तेस्सम्भवेन तादृशसङ्कल्परूपाध्यवसायस्य दीक्षणीयात्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावेन द्वारलोपादेव दीक्षणीयादौ राजसूयगतेष्टिपशुबन्धादौ च अन्वारम्भणीयाभावस्य दशमे वक्ष्यमाणत्वात्। एवं 'सोमो मे जायताम्' इत्याद्याकारिकेच्छात एव सोमाद्यसम्भवे वैश्वानरेष्ट्यादौ प्रवृत्तिसम्भवात् 'वैश्वानरेष्ट्या यक्ष्ये' इति सङ्कल्पस्यापि वैश्वानरेष्टित्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावेन द्वारलोपादेव न तत्राप्यन्वारम्भणीयेति द्रष्टव्यम्। दर्शपूर्णमासत्वं तु 'साङ्गौ दर्शपूर्णमासौ जायेताम्' इत्याकारिकेच्छायां प्रकारत्वात् भवत्युद्देश्यतावच्छेदककोटिप्रविष्टमिति विशेषः। अतस्सिद्धमन्वारम्भणीयाया उक्तविधारम्भाङ्गत्वात् विकृतावूहो द्वितीयादिप्रयोगे चानङ्गत्वमिति।

यत्तु मूले प्रथमप्रयोगारम्भे क्रियमाणाऽऽरम्भणीया सर्वप्रयोगाणामुपकरोति । न चारप्स्यमान इति अद्यतनकालवाचिलृट्प्रत्ययप्रयोगात्प्रधानदिनकर्तव्यत्वावगतेः कथं सर्वप्रयोगोपकारकत्वमिति वाच्यं, अद्यतनानद्यतनसाधारणभविष्यत्कालमात्रवाचिलृटः अद्यतनमात्रकालवाचित्वाभावात्। इतरथा भविष्यत्यनद्यतने लृट इत्यत्र भविष्यतीति लृट्प्रत्ययप्रयोगानुपपत्तेः । अतः

प्रथमप्रयोगारम्भे कृतैव सर्वेषामुपकारिकेत्युक्तम् । तदन्वारम्भणीयाजन्यस्योपकारस्य यावज्जीवंसत्त्वे विकृतिष्वपि प्रसङ्गादुपकारकत्वापत्तेरसत्त्वे द्वितीयादिप्रयोगेऽप्युपकारकत्वानापत्तेरुपेक्षितम् ॥ ११ ॥

(१२)—अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावस्स्यात्तत्राचोदितमप्राप्तं चोदिताभिधानात् ॥ ३६ ॥ ततश्चावचनं तेषामितरार्थं प्रयुज्यते ॥ ३७ ॥

एवं तावदुपोद्घातमुखेनोहविषयाश्चिन्तिताः । इदानीं साक्षादेव तद्विषयश्चिन्त्यते । तत्र 'फलदेवतयोश्च' इत्यत्र शक्त्या अपूर्वसाधनीभूतदेवतादिप्रकाशकमन्त्रपदानां विकृतौ तत्स्थानापन्नदेवताद्यन्तरं शक्त्या तत्प्रकाशनार्थं पदान्तरोह इत्युक्तम्। ततश्च यत् मन्त्रपदानां न शक्त्या अपूर्वसाधनीभूतदेवतादिप्रकाशकत्वं अपि तु लक्षणया तत्प्रकाशकत्वं शक्यार्थस्यैव वाऽदृष्टार्थमन्यस्तुत्यर्थं वोपादानं तत्रासमवेतार्थत्वात् विकृतेष्वपि श्रुतपदैरेव तत्प्रयोजनोपपत्तेर्नोहः । समवेतार्थत्वं चादृष्टद्वारकसंबन्धेन स्वशक्यार्थस्यापूर्वसाधनीभूतसम्बन्धित्वम् । अस्ति चेदं 'देवस्य त्वा' इत्यादिमन्त्रे अग्निनिर्वापपदयोस्तादृशयागगतद्रव्यसम्बन्धित्वात् । जपस्तोत्रशस्त्रादिमन्त्रपदानां च स्वशक्यार्थस्यादृष्टद्वारा तादृशयागसम्बन्धित्वेऽपि न समवेतार्थत्वम् । एवं देवादिपदानामपि न समवेतार्थत्वम् । न हि देवसवित्रश्विपूषशब्दानां प्रकृतयागीयदेवताप्रतिपादकत्वं संभवति, उत्पत्तिशिष्टदेवतावरोधेन मान्त्रवर्णिकदेवताकल्पनानुप-

पत्तेः। न चोपांशुयाजे तत्कल्पनं, तथात्वे गम्यमाननिर्वापैकवाक्यताभङ्गापत्तेः। न च 'त्वा जुष्टं निर्वपामि' इत्येतत्पदानुषङ्गेण 'देवस्य सवितुः प्रसवे त्वा जुष्टं निर्वपामि, अश्विनोर्बाहुभ्यां त्वा जुष्टं निर्वपामि, पूष्णो हस्ताभ्यां त्वा जुष्टं निर्वपामि, अग्नये त्वा जुष्टं निर्वपामि' इत्येवं मन्त्रभेदाङ्गीकारेण निर्वपामिपदैकवाक्यतोपपत्तेः चतुर्थस्य आग्नेये उपयोगेऽपि आद्यानां त्रयाणां मन्त्राणां उपांशुयाजे देवताकल्पकत्वोपपत्तिरिति वाच्यं, अनुषङ्गेण वाक्यभेदाङ्गीकारस्यैव दोषत्वात्। षष्ठ्यन्तपदानां प्रसवबाहुहस्तपदैरन्वितानां देवताप्रतिपादकत्वे प्रमाणाभावाच्च।

अत एवैतत्कल्प्यदेवतानामन्यत्र निवेशासम्भवेऽपि यागान्तरकल्पकत्वमिति शङ्काऽपि प्रत्युक्ता, तथात्वे तद्यागान्तरस्याग्नेयाद्यङ्गतापत्तेर्विकृतावूहाप्रसक्तेश्च। एतेन या मूले सवित्रादिपदानामग्न्यादिपरत्वं लक्षणया अङ्गीकृत्य समवेतार्थत्वशङ्का कृता, सा येन शक्यसम्बन्धेनाग्न्यादिपरत्वं तेनैव शक्यसम्बन्धेन वैकृतदेवतापरत्वस्याप्युपपत्तावूहाप्रसक्तेरुपेक्षिता। अत एव समवेतार्थत्वलक्षणे शक्यार्थस्येति विशेषणम्। अस्तु वा शक्यपदं वृत्तिप्रतिपाद्यपरं, तथाऽपि समवेतार्थत्वेऽप्युक्तयुक्त्या ऊहरूपफलाप्रसक्तेरेवेयं शङ्केपेक्षिता। तस्मात् कथमपि समवेतार्थप्रकाशकत्वाभावात् देवस्य त्वादिपदानां यश्शक्योऽर्थस्तद्विशिष्टनिर्वापप्रकाशनमेव देवस्यत्वादिसकलमन्त्रप्रयोजनम्। तत्र येषां पदार्थानां दृष्टप्रयोजनसम्भवस्तत्प्रकाशनस्य दृष्टमेव प्रयोजनं, येषां तु तदसम्भवस्तत्प्रकाशनस्यादृष्टमेव प्रयोजनं कल्प्यम्। अत एव तादृशपदार्थानां निर्वापोपरि वैशिष्ट्यमप्याहार्यसम्बन्धेनैवेति ध्येयम्।

तदिह निर्वापस्य तावदृष्टमेव पृथक्करणं प्रयोजनम्। अग्नये त्वापदार्थस्य च तदुपयोगितया स्वातन्त्र्येण च स्मृतिदार्ढ्यम। जुष्टपदस्य तु वक्ष्यते तदन्येषां तु अदृष्टार्थत्वमिति।

केचित्तु देवस्य त्वादिपदैर्निर्वापस्तुतिर्लक्षणया प्रतिपाद्यते। सा चानुष्ठानकालेऽपि निर्वापं प्ररोचयितुमिति दृष्टार्थैव। तथा वाऽस्तु सर्वथा देवस्य त्वापदान्यसमवेतार्थानि नोहितव्यानि।

यत्तु भाष्यकारेण गौण्या अश्विशब्द आधाने अश्वदानकरणाद्दम्पतिपरः। पूषशब्दश्च पोषकत्वात् यजमानपरः। अध्वर्युबाहुहस्तयोश्च तदीयत्वं परिक्रीतत्वात्। देवः सविताऽपि लक्षणया यजमानः तस्य प्रसवे अनुज्ञायां इत्यर्थाङ्गीकारेण निर्वापविशेषणत्वमुपपादितं, तत् वेदे आरोपकपुरुषाभावादन्यत्रार्थवादादौ आहार्यारोपस्येवेहाप्यारोपाभावमभिप्रेत्य। यदा तु अध्वर्योस्स्वात्मनिष्ठेनाहार्यारोपेण वैशिष्ट्यं सम्पाद्य स्वकर्तृकं निर्वापं प्रकाशयितुं लौकिकवाक्यप्रयोगवत् वैदिकवाक्यप्रयोगेऽपि बाधकाभाव इत्यालोच्यते, तदा अप्रयुक्तलक्षणायां प्रमाणाभावात् अध्वर्युब्रह्मयजमानान्यतमग्रहणे नियामकाभावाच्च पूर्वोक्तपक्षाश्रयणमेव युक्तम्।

किञ्चैवं सत्रे देवसवित्रश्विपूषशब्देषु बहुवचनोहः प्रसज्येत। न च यज्ञपतिवृद्धिवदत्र परार्थत्वमिति भाष्यकारसमाधाने युक्तं, अश्विपूषपदे तथा सम्भवेऽपि यजमानानुज्ञायाः परकीयद्रव्यविषयेऽप्यळीकादिपरिहारार्थत्वेन दृष्टार्थत्वात् 'उदीचीनामस्य पदो निधत्तात्' इत्यादाविव देवसवितृपदयोरूहस्यानिवार्यत्वात्।

न चैवं भवन्मतेऽपि देवस्य सवितुरुदयरूपे प्रसवे इत्यर्थाङ्गीकारेण तस्य समवेतार्थत्वात् 'महारात्रे हवींषि निर्वपेत्' इत्यादि विकृतौ अप्रसवे इत्यूहापत्तिः । अमावास्यायां च प्रागुदयान्निर्वापे लोपापत्तिरितिवाच्यं, प्रसवे जाते जनिष्यमाणे वा इत्यर्थाङ्गीकारेण बाधकाभावात् । सूर्योदयकालीनत्वप्रकाशनस्य दृष्टार्थत्वाभावाच्च । अतो न देवस्य त्वादिपदैपूह इति सिद्धम् ॥ १२ ॥

(१३)–गुणशब्दस्तथेति चेत् ॥ ३८ ॥ न समवायात् ॥ ३९ ॥

तास्मिन्नेव मन्त्रे 'अग्नये जुष्टं निर्वपामि' इत्यत्राग्निशब्दस्समवेतार्थो न वेति चिन्तायां यद्यप्यग्निर्यागे समवेतस्तथाऽपि सम्प्रदानत्वेन श्रुतस्य तस्य निर्वापे यागाद्यतिरिक्ते अनन्वयात्तादर्थ्यचतुर्थीमङ्गीकृत्य जुष्टपदार्थे अन्वयो वाच्यः तत्र 'जुषी प्रीतिसेवनयोः' इति स्मृत्या जुष्टशब्दस्य सेवनार्थकत्वप्रतीतेरग्निना सेवितमित्यर्थावगमात् निर्वापावस्थायां चाग्निना सेवनाभावात् भूतकालवाचिक्तप्रत्ययानुपपत्तेः 'अग्नये जुष्टं' इत्यस्यासमवेतार्थकत्वं अतश्चाग्निसेवितकर्मकत्वस्य निर्वापस्तुत्यर्थमुपादानात् सौर्यादावपि तदुपपत्तेरनूह इति प्राप्ते—

यद्यपीयं तादर्थ्यचतुर्थी यद्यपि च जुष्टपदेनैवान्वयः तथाऽप्यग्नये जुष्टं अग्निना सेवितं यथा भवति तथा निर्वपामि इत्यर्थाङ्गीकारेण जुष्टशब्दस्य क्रियाविशेषणत्वमङ्गीकृत्य निर्वापफलप्रकाशनेनेतरदैवत्यहविर्विवेकसम्पत्त्यर्थतया निर्वापे देवतासंयोगस्य समवेतार्थत्वम् । इतरथा हि कस्यै देवतायै निरुप्तमिति निर्णयानापत्तेः ।

वस्तुतस्तु तादर्थ्यचतुर्थ्यर्थपीयं प्रधानान्वयस्याभ्यर्हितत्वात् क्रियान्वयिन्येव। अग्नयर्थत्वं च निर्वापस्य विध्यनुरोधात् तदुद्देश्यकत्यागसाधनीभूतद्रव्यसंस्कारकत्वसम्बन्धेनेति न देवतार्थत्वापत्तिः। जुष्टपदं तु पूर्ववदेव क्रियाविशेषणं भविष्यदर्थो वा क्तप्रत्ययो लाक्षणिकः। अग्नेस्तु तेन पार्ष्टिक एवान्वयः। देवतासम्बन्धकीर्तनप्रयोजनं तु निर्वापे पूर्ववदेवेति समवेतार्थत्वम्।

अस्तु वेयं सम्प्रदानचतुर्थ्यपि देवतात्वरूपसम्प्रदानत्वैकदेशपरा तथाऽपि देवताया ग्रहण इव निर्वापेऽप्यन्वयो निरुक्तप्रयोजनार्थं न विरुध्यते। जुष्टपदं पूर्ववत्। सर्वथा अग्निपदे समवेतार्थत्वादूहः॥

एवं वा—दर्शपूर्णमासयोः 'धान्यमसि धिनुहि देवान्' इति मन्त्रश्रुतः। स च 'धान्यमसीति दृषदि तण्डुलानधिवपति' इति वचनेन तण्डुलाधिवापे विनियुक्तः तत्र धान्यशब्दः सतुषद्रव्यवचनः तण्डुलावस्थायां प्रयुज्यमानो धान्यत्वारोपेण स्तुल्यर्थः सवित्रादिपदवदेवासमवेतार्थ इति मांसेऽपि तदारोपेण प्रयोक्तव्य इति प्राप्ते—

'शालयो भुज्यन्ते' इति कार्ये प्रकृतिवाचकपदप्रयोगात् प्रयुक्तलक्षणोपपत्तेः असिपदाक्षिप्ततण्डुलरूपकर्तृसामानाधिकरण्याच्च लक्षणया धान्यशब्दस्तण्डुलपरस्सन् समवेतार्थक एव। नन्वेवं समवेतार्थकत्वेऽपि मांसेऽपि लक्षणयैव धान्यशब्दप्रयोगोपपत्तेर्नोहप्रसक्तिः। धान्यपदस्यैव प्रकृतौ तण्डुलस्मारकत्वात् विकृतौ मांसस्मारकस्य प्रोक्षणादिवत् कथंचिदूहलक्षणाक्रान्तत्वेऽपि वा धान्यपदबाधेन मांसपदप्रक्षेपरूपसिद्धान्ता-

नापत्तिः यथैव हि प्रकृतावग्निपदेन शक्त्याऽपूर्वसाधनीभूतां देवतां प्रकाशयेदिति लिङ्गकल्पितश्रुत्या मन्त्रविनियोगात् विकृतावग्निदेवत्यायां शक्त्या अग्निपदेनैवोक्तदेवताप्रकाशनोपपत्तेर्न पदान्तरप्रक्षेपः। सत्यां गतौ प्राकृतवृत्तितद्वत्पदयोर्बाधे प्रमाणाभावात्। अपि त्वन्यदेवत्यायामेव सः। तत्र शक्त्या अग्निपदेन तत्प्रकाशनानुपपत्तेः/प्रकृतौ वृत्तिविवक्षासत्त्वात् विकृतौ च वृत्तेर्व्यापारत्वेन तन्मुखेनैवाग्निपदरूपपदार्थप्राप्तेर्न लक्षणया विनाऽग्निपदेन तत्प्रकाशनम्। अतस्तत्र प्राकृतशक्तिनिर्वाहार्थं सूर्यादिपदान्तरप्रक्षेप एव शरणम्। न त्वग्निदेवत्यायां विकृतौ। तथैव धान्यपदेन लक्षणया प्रदेयप्रकृतिभूतं प्रकाशयेदिति गौणसामर्थ्यकल्पितश्रुत्या मन्त्रविनियोगाद्विकृतावपि मांसे उपकारपृष्ठभावेन वृत्तेस्तत्पृष्ठभावेन च धान्यपदस्यातिदेशात् तदबाधाय धान्यपदेनैव मांसप्रकाशनोपपत्तेर्न पदान्तरप्रक्षेप इति चेत् सत्यं प्राकृतप्रकाशनरूपोपकारपृष्ठभावेन प्राकृतवृत्तिरूपव्यापारातिदेशः तत्पृष्ठभावेन चाग्न्यादिपदरूपपदार्थातिदेशः। इतरथा वृत्त्यनतिदेशे प्रकाशनपृष्ठभावेनातिदिष्टस्य पदस्य विकृतौ लक्षणयाऽपि प्रकाशकत्वोपपत्तेः पदान्तरप्रक्षेपानापत्तिप्रसङ्गात्। तथाऽपि प्राकृतपदनिष्ठप्राकृतवृत्तिरेव विकृताविति-दिश्यते न तु वृत्तिमात्रं प्रमाणाभावात्।

अत एव सौर्ये प्राकृतपदस्येव प्राकृतवृत्तेरपि बाधसत्त्वेऽपि सूर्यप्रकाशनकार्यानुरोधेनैव मन्त्रपदान्तरानुरोधात् सूर्यपदप्रक्षेपः। अतश्च धान्यप्रकृतित्वरूपशक्यसम्बन्धरूपायाः प्राकृतलक्षणावृत्तेः मांसे बाधे सम्बन्धान्तररूपलक्षणावृत्तिकल्पने प्रमाणाभावाद्धान्यपदस्य बाधावश्यंभावे मांसप्रकाशनरूपकार्यानुरोधेन मन्त्रपदान्तरानुरोधादेव मांसपदप्रक्षेपः।

अत एव न प्रकृतिवाचकमृगपदप्रक्षेपोऽपि, शक्तपदप्रक्षेपसम्भवे अप्राकृतलक्षणया पदान्तरप्रक्षेपस्यान्याय्यत्वात्। अतइशाक्यानामयने 'तरसमयास्सवनीयाः पुरोडाशा भवन्ति' इत्यत्र मांसे अधिवापे क्रियमाणे 'मांसमसि' इत्यूहितव्यम्।

इदं च कृत्वा चिन्तया। तृतीये सवनीयोद्देशेन हविष्ट्वेनैव तरसविधानस्य स्थापितत्वात्। सत्यपि वा प्रदेयप्रकृतित्वे अर्थलोपेन तत्राधिवापस्य चरावित्र बाधितत्वाच्च। विस्तरेण चैतन्न्यायसुधाकारमतनिरासपूर्वकमुपपादितं द्वितीये 'धर्ममात्रे तु कर्म स्यात्' इत्यत्र कौस्तुभे ॥ १३ ॥

(१४)—चोदिते तु परार्थत्वाद्विधिवदविकारस्स्यात् ॥ ४० ॥ विकारस्तत्प्रधाने स्यात् ॥ ४१ ॥

दर्शपूर्णमासयोः इडानिगदे श्रुतम्। 'दैव्या अध्वर्यव उपहूता उपहूता मनुष्या य इमं यज्ञमवान्ये यज्ञपतिं वर्धानुपहूते द्यावापृथिवी' इत्यादि। तत्र सत्रे यज्ञपतिशब्दो बहुवचनान्तेनोहितव्यो न वेति चिन्तायां—

न तावदसमवेतार्थकत्वादनूहः यज्ञपतेस्तद्वृद्धेश्च मनुष्यरूपाध्वर्युपदवाच्यऋत्विक्कर्तृकायाः कर्मणि समवेतत्वात्। न चास्येडोपाह्वानवाचकपदैकवाक्यतया तदर्थत्वावगमात् यज्ञपतिवृद्धिप्रकाशनार्थत्वाभावेन सत्यपि समवेतार्थत्वे परार्थत्वादनूहः लिङ्गेन मन्त्रगतवाक्यस्य 'स्योनं ते' इतिवत् बाधेन यज्ञपतिवृद्ध्यर्थत्वोपपत्तेः। न च 'स यो हैवं विद्वान् इडया चरति' इति विधाय 'अथ प्रतिपद्यते इळोपहूतोपहूतेळोपो अस्मां

इळाह्वयतामिळोपहूतेत्याह' इति ब्राह्मणवाक्येन प्रतीकग्रहणेन कृत्स्नस्य निगदस्येडोपाह्वाने विनियोगात् तत्सहकृतेन मन्त्रगतवाक्येन मन्त्रलिङ्गस्यैव बाध इति वाच्यं, ब्राह्मणवाक्येन यावदुपात्तस्यैव विनियोगोपपत्तौ प्रतीकग्रहणे प्रमाणाभावात्। अस्तु वा विनियोगान्तरकल्पनागौरवभिया प्रत्यक्षवाक्येनैव प्रतीकग्रहणेन समस्तविनियोगकल्पनम्। अत एव 'स्योनं ते' इत्यादौ प्रत्यक्षाविनियोजकवाक्याभावादपेक्षितविनियोगद्वयकल्पनेऽपि न क्षतिः।

किं च 'ये यज्ञपतिं वर्धान्' इत्यादौ यच्छब्दबलादेव यज्ञपतिवृद्धिकर्तृणां मनुष्यरूपऋत्विजामुपाह्वानकर्मत्वं प्रतीयते। अतो यच्छब्दसामर्थ्यात्मकलिङ्गादेवास्येडोपाह्वानशेषता। अत एव 'स्योनं ते' इत्यत्रापि यदि पूर्वार्धे यच्छब्दस्स्यात् तदा स्यादेव तत्रैकवाक्यता न त्वेतदस्तीत्यतो मन्त्रभेदोऽङ्गीकृतः। प्रकृते तु यच्छब्दसद्भावादिडोपाह्वानशेषतैव। तथाऽपि प्रथनशेषभूतस्यापि 'उरु ते यज्ञपतिः प्रथताम्' इति मन्त्रस्यानुषङ्गिकयज्ञपतिप्रोत्साहनार्थत्ववदस्यापि तथात्वोपपत्तेः। सत्रे तद्वदेवोहोपपत्तिः। न हि प्रोत्साहनार्थेषु 'आयुर्दा अग्नेऽस्यायुर्मे धेहि' इत्यादिषु सत्रे नोहः आवृत्तिर्वा। अतश्च यद्यपि नेदं प्रथनफलं, तथाऽपि आनुषङ्गिकप्रोत्साहनमात्रेणोहवदिहापीडोपाह्वानशेषभूतस्याप्यस्य मन्त्रस्यानुषङ्गिकयज्ञपतिप्रोत्साहनार्थत्वादूहोपपत्तिरविकलैव।

वस्तुतस्तु प्रहरणाङ्गभूतस्यापि प्रस्तरप्रतिपादकपदैकवाक्यतापन्नस्यापि 'आयुराशास्ते' इत्यादेः प्रहरणफलप्रतिपादकत्वात् यथा सत्रे ऊह इति प्रत्युदाहरणसूत्रे वक्ष्यते तथेहापीडोपाह्वानाङ्गस्यापीडोपाह्वानपदैकवाक्यतापन्नस्याप्यस्येडोपाह्वा--

नफलप्रतिपादकत्वाद्युक्त एव सत्रे ऊहः । न हि तृतीयानिर्दिष्ट एव मान्त्रवर्णिकं फलं नान्यत्रेति नियमे प्रमाणमस्ति स्थानादिविनियुक्तस्यापि मन्त्रस्य देवताकल्पकत्ववत् फलकल्पकत्वेऽपि बाधकाभावात् ।

न चापेक्षितकल्पकत्वेऽपि यत्रेडोपाह्वानादेरिडासंस्कारार्थत्वेन कृतार्थता तत्र विना तृतीयां न फलकल्पकत्वमितिवाच्यं, तृतीयास्थलेऽपि प्रहरणप्रतिपाद्यप्रस्तरप्रतिपादकतया सूक्तवाकप्रातिपदिकबलेन मान्त्रवर्णिकदेवतामात्रकल्पनेन वा तृतीयावगतकरणत्वनिर्वाहोपपत्तौ 'इदं द्यावा' इति पदानामिवायुरादिपदानामपि स्तावकत्वेनोपपत्तेः फलकल्पकत्वे प्रमाणाभावात् । 'ममाग्ने वर्चः इति पूर्वमग्निं परिगृह्णाति' इति इतिकरणविनियुक्तस्थले फलकल्पकत्ववदिडोपाह्वानेऽपि इतिकरणविनियुक्तत्वात् फलकल्पकत्वोपपत्तेश्च ।

न चैवमप्येवमादिस्थले सर्वत्रैव यज्ञपतेरुद्देश्यत्वात् तद्विशेषणस्यैकत्वादेर्वस्तुतोऽविवक्षितत्वेन प्रकाशनानर्हत्वात् सर्वयज्ञपतीनां च 'अहं सम्मार्ष्टि' इतिवत् प्रातिपदिकेनैव प्रतीत्युपपत्तेः प्रकृतौ साधुत्वार्थस्यैकवचनस्य कथं विकृतावूह इति वाच्यं, प्रकृताविहितस्याप्यधिकार्येकत्वस्योपकारकत्वमात्रेण तावत्सद्भावात् तावतैवैकवचनेन एकत्वप्रकाशनोपपत्तौ साधुत्वार्थैकत्वकल्पने प्रमाणाभावात् अतश्च विकृतौ तद्गतबहुत्वप्रकाशनार्थं सिद्ध्यत्येवोह इति प्राप्ते—

न तावत् यज्ञपतिपृच्छिरुपाह्वानफलं इडाभक्षणाङ्गत्वेन कृतार्थस्य स्वरूपतः फलानपेक्षत्वात् । एवं सत्यपि यदि तृतीयया इतिकरणेन वा क्रियां प्रति विनियोगस्स्यात् ततः क्रियाकर-

णत्वं मन्त्रस्य सकलस्य क्रियाप्रकाशनद्वारेणैवेति प्रथमतस्तावत् क्रियाप्रकाशकत्वमेव, तदसम्भवे तत्सम्बन्धिप्रस्तरादिप्रकाशकत्वं, तस्याप्यसम्भवे मन्त्रप्रकाश्यस्यानपेक्षितस्यापि क्रियासम्बन्धकल्पनम्। इतरथा सकलस्य मन्त्रस्य श्रुतकरणत्वानिर्वाहात्। तत्र च विनिगमनाविरहात् यथैव सूक्तवाकप्रतिपाद्यमन्त्रदेवतायाः कल्पनं तथा आयुरादेरपि फलस्य। यत्र तु सर्वथा असम्भवः तत्र 'इदं द्यावा' इत्यादौ अगत्या स्तावकत्वमिष्टमेव। अनयैव च दिशा 'ममाग्ने' इत्यादौ वर्चःप्रभृतीनामपि फलत्वं बोध्यम्। तत्रापीतिकरणविनियुक्तत्वस्य कौस्तुभे स्थापितत्वात्।

अत एव कौस्तुभोक्तरीत्यैव यत्र प्रथनमन्त्रादौ नेतिकरणेन विनियोगः अपितु लिङ्गादेव सः, तत्र 'प्रथस्व' इति भागस्य प्रथनप्रकाशनत्वेन प्रयोजनवत्त्वलाभे अवशिष्टभागस्य प्रोत्साहनस्तावकत्वादिनैव तदेकवाक्यत्वोपपत्तौ न प्रथनफलकल्पकत्वम्, लिङ्गेनैकदेशेऽपि प्रयोजनलाभे सकलस्य प्रयोजनवत्त्वोपपत्तेरिति मीमांसकमर्यादा। तत्रापि तु लिङ्गवशात् फलकल्पकत्वाङ्गीकारे नातीव काचिदनुपपत्तिः। परं तु यत्र क्रियाजन्यत्वं फलस्य लिङ्गवशात्प्रतीयते यथा प्रथनमन्त्रादौ। 'प्रकृते तु प्रथमं तावन्नेतिकरणेन क्रियां प्रति विनियोगः 'अथ प्रतिपद्यते इत्याह' इत्यादिना मन्त्रोच्चारणस्यैवेडाभक्षणाङ्गत्वेन विधेयत्वात्। अस्तु वा ब्रूआदेशत्वादाहशब्दस्योक्तविशेषणविशिष्टोपाह्वानप्रकाशनस्यैवेडाभक्षणाङ्गत्वेन विधिः। सर्वथा नोपाह्वानं नाम किञ्चिदस्ति क्रियाङ्गं, यत्फलं यज्ञपतिवृद्धिर्भवेत्। द्यावापृथिव्याद्युपाह्वानप्रकाशनस्येवोक्तविधमनुष्योपाह्वानस्य वाऽदृष्टार्थत्वात्।

वस्तुतस्तु—सत्यप्युपाह्वानस्य भक्षणाङ्गत्वे न तत्फलत्वं यज्ञपतिवृद्धेरत्र मन्त्रे प्रतीयते, येन मान्त्रवर्णिकफलकल्पना शङ्क्येत। न हीडाभक्षणार्थं यज्ञपतिवृद्धिकर्तृमनुष्योपाह्वानमात्रेण यज्ञपतिवृद्धिर्जायत इति शब्दस्वारस्यात्प्रमाणान्तरमन्तरेण प्रतीयते, ये यज्ञपतिवृद्धिं कर्तुं समर्थास्ते उपहूता इति हि तदर्थः। न च यो यत्कर्तुं समर्थः तदुपाह्वाने तज्ज्ञायत इत्यत्र प्रमाणमस्ति अतो न तावदस्य फलप्रतिपादकत्वम्। अत एव न प्रोत्साहनार्थत्वमपि। वृद्धिगतस्वनिष्ठत्वज्ञानमन्तरेण प्रोत्साहनानुपपत्तेः। अतोऽत्र यज्ञपतिवृद्धेरुपाह्वानविशेषणत्वेनोपात्तायाः परार्थत्वाददृष्टार्थप्रकाशनविषयत्वेनादृष्टार्थत्वाच्च। सत्रे प्रकृताप्रकृतसाधारणैकयज्ञपतिप्रकाशनमात्रेण च तददृष्टोपपत्तेरनूहः।

यत्रापि यजमानः न स्वरूपेणोपयुज्यते परं तु गुणभूतः यथा औदुम्बरीसम्मानादिषु, तत्राप्याग्नेयीन्यायात्। प्रकृतग्रहणेऽप्येकस्यैव ग्रहणं न सर्वेषां, यजमानसंस्कारकत्वाभावात्। तत्र का कथा अदृष्टार्थप्रकाशनविषयभूते यज्ञपताविति। अत एव यत्र यजमानस्य मान्त्रवर्णिकायुरादिफलभोक्तृत्वेन प्राधान्यं यथा सूक्तवाकादौ 'आशास्तेऽयं यजमानः' इत्यादौ, यत्र वा प्रोत्साहनार्थत्वेन यजमाननिष्ठश्रद्धाजननात् तस्य प्राधान्यं यथा 'आयुर्दा अग्ने, उरु ते यज्ञपतिः प्रथतम्' इत्यादौ तत्रोभयत्रापि सत्रे ऊहः। तदिदमुक्तं 'विकारस्तत्प्रधाने स्यात्' इति प्रत्युदाहरणसूत्रेण ॥१४॥

(१५)—असंयोगात्तदर्थेषु तद्विशिष्टं प्रतीयेत ॥ ४२ ॥ कर्माभावादेवमिति चेत् ॥ न परार्थत्वात् ॥ ४४ ॥

ज्योतिष्टोमे अस्ति सुब्रह्मण्यानिगदः 'इन्द्र आगच्छ हरिव आगच्छ' इत्यादिरिन्द्रप्रकाशकः। इन्द्रदेवत्यश्च यागाभ्यासो दशभिश्चमस्सैस्सह शुक्रामन्थिग्रहाभ्यां क्रियमाणस्सवनमुखीयसंज्ञकः। तन्मात्राङ्गमेव तु सुब्रह्मण्यानिगदः लिङ्गात्। न त्वन्यदेवत्याभ्यासाङ्गं 'व्रीहीणां मेध' इतिवत्। अग्निष्टुद्यागे च 'आग्नेया ग्रहा भवन्ति' इति वचनात्प्राकृतग्रहीयदेवताबाधेनाग्निदेवताविधानात् सवनमुखीयेऽप्यग्निर्देवता। ततश्च तदङ्गभूता सुब्रह्मण्या इन्द्रपदस्थाने अग्निपदनिक्षेपेणोह्यत एव।

न चैवं न्यायादेवोहसिद्धौ 'आग्नेयी सुब्रह्मण्या' इति वचनवैयर्थ्यापत्तिः। प्रकृतौ सवनमुखीयवत् सवनीयहविषामपीन्द्रदेवत्यत्वात् वेदिबर्हिर्न्यायेन सुब्रह्मण्यानिगदस्योभयार्थत्वप्रसक्तौ विकृतावपि तदर्थं भेदेनाभेदेन वाऽनूहितसुब्रह्मण्यानिगदपाठप्रसक्तेः। 'आग्नेय्येव सुब्रह्मण्या कार्या' इति तत्फलकत्वाङ्गीकारेण वचनसार्थक्यात्। अत एवैतद्वचनरूपतात्पर्यग्राहकानुरोधेन प्रकृतावपि न सवनीयहविरर्थत्वं, अपि तु सवनमुखीयशुक्रामन्थिप्रचारार्थत्वमेव सुब्रह्मण्यानिगदस्येत्यपि परं ध्येयम्।

केचित्तु "सवनमुखीये चमसैरेव होमः इन्द्रदेवताकः। न तत्राग्निष्टुत्यग्निदेवताकत्वं, ग्रहेष्वेव तद्विधानात्। अतश्च न्यायेनाप्राप्त एव सुब्रह्मण्योहः। वचनेन त्वग्निदेवत्यग्रहयागाभ्यासाङ्गतया आग्नेयी सुब्रह्मण्या सवनमुखीयादाच्छिद्य विधीयते" इत्याहुः। तन्न—सवनमुखीयहोमस्यापि शुक्रामन्थिग्रहकरणकत्वेन सकलयाज्ञिकप्रसिद्धत्वात्। वचनेनाग्निदेवत्यग्रहयागाभ्यासे औपदेशिकसुब्रह्मण्याविधानेऽपि सवनमुखीये आतिदेशिकैन्द्रसुब्रह्मण्याबाधे प्रमाणाभावाच्च। सुब्रह्मण्यायास्तत्रौपदे-

शिकत्वे ऊहानूहविचारस्यासङ्गतत्वापत्तेश्च । अतोऽस्मदुक्तप्रकार एव श्रेयान् ।

इदं तु चिन्त्यते—किं इन्द्रपद इव हरिवदादिपदेऽप्यूहो भवति उत नेति । तत्र देवताविग्रहादिमत्त्व एव मन्त्रार्थवादेतिहासपुराणप्रामाण्यात् हरिवदादिगुणानामपीन्द्रसमवेतत्वात् अग्निष्टुत्यग्निगुणप्रकाशनार्थं रोहिताश्वादिपदानामूह इति प्राप्ते—

देवताधिकरणन्यायेनैव मन्त्रादीनां तत्परत्वे प्रमाणाभावात् हरिवदादिपदानामसमवेतार्थकत्वेनाहार्यारोपेणेन्द्रस्तुतिवत् अग्निस्तुतेरप्युपपत्तेर्नोहः । तदेतद्देवताधिकरणस्य प्रयोजनमात्रकथनार्थम् । प्रयोजनमपि चेदमूहस्मृत्यभावं कृत्वाचिन्तया । यदा तु छन्दोगसूत्रे अग्निष्टुति 'अग्न आगच्छ रोहिताश्व बृहद्भानो धूमकेतो जातवेदो विचर्षणे' इत्यूहितस्यैव पाठस्समाम्नातः तदाऽस्यास्स्मृतेर्न्यायोपन्यासपूर्वकत्वाभावेनाष्टकादिस्मृतिवत् श्रुतिमूलकत्वावश्यंभावात् तया चैतदधिकरणन्यायस्याभासीकरणादूहितपाठ एव युक्तः । तदा च मन्त्रान्तरस्थदेवताविशेषणविषयमिदमधिकरणं द्रष्टव्यम् । अत एव यत्रैव न्यायोपन्यासपूर्विका स्मृतिस्तत्रैव श्रुतिमूलत्वे न्यायोपन्यासवैयर्थ्यापत्तेः मीमांसास्थसन्न्यायविरोधे आभासत्वं स्मृतेरित्युक्तं कल्पसूत्राधिकरणे ।

देवताधिकरणगतार्थत्वादिनैव वा वर्णकान्तरम् । साद्यस्क्रे 'त्रिवत्सस्साण्डस्सोमक्रयणः' इति सोमक्रयसाधनतया विहिते त्रिवत्से अतिदेशप्राप्ते "इयं गौस्तया ते क्रीणामि तस्यै शृतं तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्" इत्येकहायनीमन्त्रे स्त्रीलिङ्गांशे पुल्लिङ्गोहस्त्वविवाद एव । शृतादिपदेष्वपि "किं तस्य

शुक्रं तस्य बलं तस्य युद्धं तस्य जयः तस्य हुंभारवः तस्य पलायनं तस्य लीला तस्य भारोद्वहनम्' इत्येवं ऊहितव्यो न वेति सन्देहे—

'शूतम्' इत्यादौ 'छिनद्मि' इत्यादिवत् अवश्याध्याहार्ये क्रियापदे, यद्यप्यस्ति इति नाध्याहर्तुं शक्यते, एकहायन्यवस्थायां शूतादेरभावात्, तथाऽपि 'भविष्यति' इत्यध्याहर्तव्यं, ततश्च भविष्यत्तायास्समवेतत्वाद्विक्रेत्रानमनार्थत्वेन च इष्टार्थत्वात् त्रिवत्सेऽपि विक्रेत्रानतिहेतुत्रिवत्सगुणप्रकाशनार्थं कर्तव्य एवोह इति प्राप्ते—

भविष्यत्तायाः अपि मरणवन्न्यात्वादिना नियतत्वाभावात् 'सम्भावि' इत्येव पदं प्रकृतावध्याहार्यं तच्च गोस्तावकं विक्रेत्रानमनार्थं वेत्यन्यदेतत्। उभयथाऽपि त्रिवत्से अविकृतस्यैव प्रयोगादनूहः। शक्यते हि साण्डाद्या गौर्जनिष्यते तस्या जायमानं शूतादि साण्डीयम् इति व्यपदेष्टुम्। तस्मात् सम्भावनाया विकृतावपि सम्भवादनूह एव ॥ १५ ॥

(१६)—लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वात् ॥ ४५ ॥ पश्वभिधानाद्वा तद्धि चोदनाभूतं पुंविषयं पुनः पशुत्वम् ॥ ४६ ॥ विशेषो वा तदर्थनिर्देशात् ॥ ४७ ॥ पशुत्वं चैकशब्द्यात् ॥ ४८ ॥ यथोक्तं वा सन्निधानात् ॥ ४९ ॥

ज्योतिष्टोमे क्रतुपशवस्समाम्नाताः। "आग्नेयमजमाग्निष्टोमे आलभते, ऐन्द्राग्नमुक्थ्ये द्वितीयं, ऐन्द्रं वृष्णि षोडशिनि तृतीयं, सारस्वतीं मेषीमतिरात्रे चतुर्थीम्" इति। अत्र तत्तत्संस्थाकत्वे निमित्ते प्रकरणात् क्रतुपशुसमाख्याबलाच्च ज्योतिष्टोमाङ्गत्वेन पशुयागा विधीयन्ते। न तु तत्तत्संस्थोद्देशेनैव। तेषां चाग्नीषोमीयाद्धर्मातिदेशः न तु तेन समानविधानत्वमित्युक्तं तृतीये। अग्नीषोमीयाङ्गं चाध्रिगुप्रैषः 'प्रास्मा अग्निं भरत' इत्यादिः। स क्रतुपशुष्वतिदेशेन प्राप्तोऽतिरात्रे चतुर्णामर्थे तन्त्रेण पठनीयः 'प्रैभ्यो अग्निं भरत' इत्यूहितव्यः एवं मेष्यामपीत्यविवादम्। यदा तु पशूनां समानविधानत्वं तदा मेष्यर्थत्वमस्यास्ति न वेति चिन्त्यते।

तत्र पुल्लिङ्गस्य मेष्यामसमर्थत्वेऽपि 'अस्मै' इति प्रातिपदिकार्थचतुर्थ्यर्थयोः प्रधानभूतयोर्मेष्यां समवेतत्वात् पुल्लिङ्गस्य च गुणभूतस्य पाशाधिकरणन्यायेन निर्देशमात्रार्थत्वात् समस्तस्य मन्त्रस्य प्रकरणात् मेष्यर्थत्वमप्यविरुद्धम्॥

न च पुल्लिङ्गस्य क्वचिद्विभक्त्यर्थत्वेऽपि क्वचित्प्रातिपदिकाद्यर्थत्वस्यापि सत्त्वात् कथं प्रातिपदिकार्थं प्रति लिङ्गस्य गुणत्वमिति वाच्यम्। अविभक्त्यर्थत्वेऽपि सङ्ख्यायामिवानुभवस्य सत्त्वसमाख्याया वा लिङ्गेऽपि गुणत्वनियामकत्वात्। न हि सङ्ख्यायामपि विभक्त्यर्थत्वं गुणत्वनियामकं विरुद्धत्वात्। अतो लिङ्गस्य यत्किञ्चिदर्थत्वेऽप्यनुभवबलेन प्रातिपदिकार्थं प्रति कारकं प्रति च गुणत्वात् पाशाधिकरणप्रवृत्त्युपपत्तेः मन्त्रस्य मेष्यामपि प्रवृत्तिः। न च पुल्लिङ्गस्य पुंपशुषु प्रकृतेष्वर्थवत्त्वे तदनुरोधेन 'व्रीहीणां मेध' इत्यत्र गुणभूतव्रीहिपदानुरोधेनेवेतरमन्त्रस्य सङ्कोचोपपत्तिः; 'पत्नीं सन्नह्य' इत्यस्य

एकवचनानुरोधेनैकपत्नीकप्रयोगमात्रविषयत्वाकल्पनवदस्यापि पुंपशुमात्रविषयत्वाकल्पनात्। अत एव प्रकृतमन्त्रेऽप्येकवचनानुरोधेन न दैक्षमात्रविषयत्वं गुणानुरोधेन प्रधानसङ्कोचस्यान्याय्यत्वात्। इतरथा मेष्यविषयत्ववत् सर्वपुंपशुविषयत्वस्याप्यनापत्तेः। अत एवंविधेषु सर्वेषु वचनस्य लिङ्गस्य वा साधुत्वमात्रार्थं प्रयोगः।

न च 'जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम्' इति स्मृत्या जातिमात्राभिधाने विवक्षिते तस्या एकत्वेऽपि बहुवचनं विकल्पेन भवति इत्यर्थकया बहुष्वप्यर्थेषु जात्यभिप्रायेणैकवचनस्यानुशासितत्वादेकवचनप्रयोगसम्भवेऽपि लिङ्गस्य कथं विलिङ्गे साधुत्वार्थे प्रयोग इति वाच्यम्। लिङ्गस्यापि 'सुप्तिङुप ग्रहलिङ्गनराणाम्' इत्यनेन छन्दस्यनुशासितत्वात्। 'प्रास्मा' इतिसर्वनाम्न उपस्थितव्यक्तिवाचित्वेन जात्यभिप्रायकत्वानुपपत्तेश्च। अस्य सूत्रस्य भाष्यकारेण प्रत्याख्यातत्वाच्च। अतो बचनवत् लिङ्गस्यापि प्रातिपदिकार्थगतलिङ्गमात्रोपलक्षणतया साधुत्वार्थमुपादानात् तदनुरोधेन प्रधानभूतसर्वमन्त्रसङ्कोचानुपपत्तेर्युक्तो मेष्यामप्यध्रिगुः। 'व्रीहीणां मेध' इत्यत्र तु यवप्रयोगे साधुत्वार्थं प्रयोग इत्यस्य वक्तुमशक्यत्वात् पदद्वयरहितमन्त्रप्रयोगस्य च, यावन्ति वाक्ये पदानि श्रुतानि तावतां सम्भूयार्थप्रतीतिकारित्वनियमेन, वक्तुमशक्यत्वात् युक्त एव व्रीहिप्रयोगमात्रे सङ्कोचः। एतादृशनियमानङ्गीकारे चेष्ट एव पदद्वयरहितमन्त्रप्रयोगः केषां चिद्याज्ञिकानाम्।

वस्तुतस्तु—पुल्लिङ्गमपि मेष्यां प्रातिपदिकस्य चोदनागतपशुशब्दाभिप्रायत्वात् पशुशब्दस्य नित्यं पुल्लिङ्गत्वात् 'प्रास्मै पशवः' इत्युपपत्तेस्समवेतमेवेति प्राप्ते—

मन्त्रे पशुशब्दाश्रवणात् 'प्रास्मा' इतिशब्देन प्रयोगकाले यदपरोक्षतया स्थितं तत्परामर्ष्टव्यम् । तदा च व्यक्तिरेव न पशुशब्दः अतः पुल्लिङ्गनिर्देशात् पुंव्यक्तिरेवाभिधीयते न स्त्री-द्रव्यं मेषी । अतो न तावत् समवेतं मेष्यां लिङ्गम् । नाप्यस-मवेतत्वेऽप्येकवचनवत् साधुत्वार्थं मेष्यां प्रयोगः स्त्रियां पुल्लि-ङ्गस्यानुशासनाभावेन साधुत्वे प्रमाणाभावात् । प्रकृते पुंपशूना-मपि सत्त्वेन व्यत्ययानुशासनस्याप्रवृत्तेः । अत एव यत्र स्त्री-मात्रविषयं पुल्लिङ्गं तत्रैव व्यत्ययानुशासनप्रवृत्तिः । न हि 'दृष्टानुविधिश्छन्दसि' इति विधानं दर्शनाभावे प्राप्नोति । नापि पुल्लिङ्गस्य प्रातिपदिकार्थगतलिङ्गमात्रोपलक्षणत्वं लक्षणायां प्रमा-णाभावात् । इतरथा बहुतरपदसङ्कोचानुरोधेनैकस्य 'व्रीहीणाम्' इत्यस्यैव पदस्य प्रकृतपुरोडाशीयप्रकृतिद्रव्योपलक्षणत्वापत्तेः । अतो मन्त्रपदानामसति वचने मुख्य एवार्थे विनियोगात् तद-नुरोधेन सङ्कोचोपि नायुक्तः । एकवचने तु 'पत्नीं सन्नह्य, प्रास्मा अग्निं भरत' इत्यादौ पत्न्यादेस्संस्कार्यत्वात् प्रातिपदिकस्या-नेकव्यक्तिपरत्वेऽपि प्रत्येकव्यक्तिवृत्त्येकत्वविवक्षया एकवचन-स्यापि लक्षणां विनैवोपपत्तेर्न सकलस्य मन्त्रस्य सङ्कोचः । सम्भवति ह्यनेकास्वपि व्यक्तिषु शुक्लगुणस्य प्रत्येकवृत्तितया 'शुक्ला घटाः' इत्यादौ विशेषणत्ववदेकत्वस्य प्रत्येकवृत्तितया सर्वप्रातिपदिकार्थविशेषणत्वम् । न ह्यत्र लिङ्गस्य मेषीरूपप्रा-तिपदिकार्थेऽवृत्तित्ववत् एकत्वस्य कस्यामपि पत्न्यां पशौ वाऽवृत्तित्वमस्ति ।

न चैवं प्रातिपदिकार्थबहुत्वेऽपि बहुवचनानापत्तौ 'बहुषु बहुवचनम्' इत्यस्य निर्विषयत्वापत्तिः बहुत्वस्य शाब्दप्रतीतिविष-यत्वविवक्षायां तदुपपत्तेः । न चैवं 'पशुना यजेत' इत्यादावप्येक-

वचनस्य प्रत्येकवृत्तित्वेनाप्युपपत्तेरनेकद्रव्योपादानेऽपि बाधकानापत्तिः। तत्र गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् प्रथमातिक्रमे कारणाभावाच्च अनेकद्रव्योपादानं प्रमाणाभावेनैकवचनेनैच्छिकद्रव्यान्तरव्यावृत्त्युपपत्तेः। अतश्च 'पत्नीं सन्नह्य, प्रास्मै' इत्यादावेकवचनस्यानेकेषु लक्षणां विनैवोपपत्तेर्न मन्त्रसङ्कोचकत्वम्। न चैवं गुणभूतेऽपि लक्षणापरिहारार्थं प्रधानस्य सङ्कोचाभ्युपगमे 'अदितिः पाशान्' इत्यादौ बहुवचने लक्षणापरिहारार्थं प्रधानभूतस्य प्रातिपदिकादेरुत्कर्षोपपत्तिः किं न स्यात्? न ह्येकस्मिन् बहुवचनं लक्षणां विनोपपद्यते इति वाच्यम्। गुणभूतानुरोधेन प्रधानभूतस्य सङ्कोचेऽपि प्रकरणबाधप्रसङ्गेनोत्कर्षे प्रमाणाभावात्। सङ्कोचे अवर्जनीयत्वाच्चान्तरीयकसन्निधिबाधेऽपि उत्कर्षे नान्तरीयकत्वाभावेन तद्बाधस्यान्याय्यत्वात्। सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्कर्षानुपपत्तेश्च। अतस्सिद्धं मेष्यामध्रिगुप्रैषोऽनङ्गमिति। प्रयोजनं— स्थूलपृषतीं' इत्यादौ अध्रिगुप्रैषे 'प्रास्यौ' इत्यूहः। लिङ्गस्य प्रकृतौ समवेतत्वात्। पूर्वपक्षे त्वनूहः साधुत्वार्थत्वात्। अत एवोहोपयोगोपि। स्त्रीद्रव्यकत्वसादृश्यान्मेषीयागमात्रप्रकृतिकत्वाङ्गीकारे तु अध्रिगुप्रैषस्याप्रवृत्तिरेव सिद्धान्ते कृत्वाचिन्तोद्घाटने तु मेष्यामप्यूहः प्रागेव दर्शितः। वस्तुतस्तु— आश्वलायनेन 'पुंवन्मिथुने' इत्यनेन स्त्रीपुंससमवाये पुल्लिङ्गस्यैव विधानात् कृत्वाचिन्तोद्घाटनेऽप्यनूहः लक्षणयैव तूभयलिङ्गप्रकाशनं वाचनिकम् ॥ १६ ॥

(१७)—आम्नातादन्यदधिकारे वचनाद्विकारस्स्यात् ॥ ५० ॥ द्वैधं वा तुल्यहेतुत्वात्सामान्याद्विकल्पस्स्यात् ॥ ५१ ॥ उ-

पदेशाच्च साम्नः ॥ ५२ ॥ नियमो वा श्रुतिविशेषादितरत्साम्नदृश्यवत् ॥ ५३ ॥

मन्त्रोहप्रसङ्गात् साममन्त्रोहं विचारयितुमुपोद्घात आरभ्यते। ज्योतिष्टोमे अग्निष्टोमस्तोत्रावान्तरप्रकरणे श्रुतं 'न गिरा गिरेति ब्रूयात् ऐरं कृत्वोद्गेयम्' इति। तत्र गिरापदगीर्तेरिरापदे ऊह इति वक्ष्यते। स च इरापदस्य गिरापदस्थानापत्तिं विना नेति साऽपि वक्ष्यते। तत्रेह सा किं नियता स्थानापत्तिः उतानियतेति चिन्त्यते।

तत्र यद्यपि तावत् न ऐरं कृत्वोद्गेयम्' इत्यत्रेरापदविशिष्टोद्गानान्तरस्य स्तोत्राङ्गतया आरादुपकारकत्वादिना विधिः। अग्निष्टोमस्तोत्राङ्गभूतयज्ञायज्ञीयगानापेक्षया गानान्तरत्वे प्रमाणाभावात् 'न गिरा गिरा' इति निषेधानुवादानुपपत्तेश्च। अत एव न गानोद्देशेनेरापदविधिः तथात्वे इरापदस्य स्तोभाक्षेरविधया गानाङ्गत्वेऽपि तत्संस्कार्यस्य गिरापदस्य बाधे प्रमाणाभावेन निषेधानुवादानुपपत्तेः। अतो निषेधानुवादबलेनेरापदमात्रं गुणाभिधानात्मकस्तोत्ररूपे गिरापदकार्ये विधीयते। उद्गेयमिति तु तत्संस्कारकतया प्राप्तगानानुवादः। सम्भवति चेरापदस्य गिरापदकार्यकारित्वं तदर्थाभिधानात्। यथैव हि इष्कर्तारमिति पदं महाभाष्यकारेण नकारलोपेन निष्कर्तारमित्यस्यार्थे व्याख्यातं तथैव गकारलोपेन इरापदस्यापि गिरापदार्थे व्याख्यानं नानुपपन्नम्।

ततश्च यद्यपि प्रत्यक्षविधिना इरापदस्योत्पत्तिः स्तोत्राङ्गत्वं च। गिरापदस्य तु पाठादुत्पत्तिः क्रमाच्च स्तोत्राङ्गत्वं।

'यज्ञायज्ञियेन स्तुवीत' इति सामाविध्यन्याथाऽनुपपत्त्या वा आक्षिप्तं; साम्नो हि ऋगक्षराभिव्यक्तिद्वारैव स्तोत्राङ्गतेति ऋगक्षराणामपि तदङ्गत्वासिद्धिः । उभयथाऽपि गिरापदस्य तदेकपदान्तरसाधारणमपि दुर्बलमेव । तथाऽपि गिरापदकार्ये इरापदं विधीयमानं तत्कार्यस्य गिरापदीयत्वप्रसिद्धिमुपजीवतीति उपजीव्यविरोधापत्तेर्न गिरापदस्य नित्यं बाधः, अपि तु न तौ पशौ करोति' इतिवत् विकल्प एवेति प्राप्ते—

न तावदत्र गिरापदकार्यस्योद्देश्यत्वं श्रुतं, अपि तु निषेधानुवादबलेन गिरापदबाधकत्वमात्रं, तेन च यथैव तत्कार्यस्य साधनसाकांक्षत्वात् इरापदस्य च कार्यसाकांक्षत्वात तत्कार्यजनकत्वं कल्प्यते, तथा तद्बलेनैव गिरापदपाठस्यापि अग्निष्टोमस्तोत्रापूर्वसाधनत्वकल्पनाप्रतिबन्धोऽपि । अत एव कार्यस्याप्युद्देश्यता न गिरापदीयत्वेन । अपि तु अग्निष्टोमस्तोत्रापूर्वसाधनीभूतविजातीयगुणाभिधानत्वेनैव । तत्कार्यापन्नत्वव्यवहारस्तु निषेधानुवादाभावे तत्कार्यव्यक्तेर्गिरापदीयत्वप्रसक्तिमात्रेण । अत एव पाठोऽपि गिरापदस्य यत्र 'यज्ञायज्ञीयं पुच्छे गायति' इति चयने यज्ञायज्ञीयं साम विहितं तत्र तस्य दृष्टविधया पुच्छाभिधानजनकऋगक्षराभिव्यक्तिजनकत्वेनैवोपयोगात्, तत्र चेरापदविध्यभावेन गिरापदस्यैवाप्राप्तसिद्धस्य विनियोगात् सार्थकः । अतस्सिद्धं, निषेधानुवादबलेन गिरापदपाठादेरग्निष्टोमस्तोत्राङ्गतया गिरापदाविनियोजकत्वाभावादिरापदस्य 'ऐरं कृत्वोद्गेयम्' इति प्रत्यक्षविधिना विशिष्य विहितस्य नियतमेव तद्बाधकत्वं तत्कार्यापत्तिश्चेति ।

यत्त्वत्र तन्त्ररत्नशास्त्रदीपिकयोः उद्गानमुद्दिश्य इरापदविधिरित्युक्तं तत् स्तोभविधया गानाङ्गत्वे गानसंस्कार्यगुणाभि-

धानजनकगिरापदबाधकत्वानुपपत्तेरुत्तरयोरपि च गानातिदेशे तदङ्गस्तोभातिदेशवदतिदेशापत्तेरुपेक्षितम् ।

यदपि कैश्चित् गानसंस्कार्येरापदस्य स्तोभाङ्गतया विधिरभिषवसंस्कृतपूतीकानामिव यागसाधनतया । तद्वदेव सम्भवत्प्राप्तिकस्यापि गानस्य शीघ्रप्रवृत्त्या पुनर्विधानं गिरापदस्य गानसम्बन्धवारणार्थमित्युक्तं तदपि गानवारणेऽपि गिरापदवारणानापत्तेरस्य प्रकृतगानसम्बन्धेऽपि गिरापदमात्रगानवारणे तन्निषेधानुवादस्यैव शरणीकरणीयतया तत एवोभयवारणे गानविधिवैयर्थ्यादुपेक्षितम् । तस्मादस्येरापदमात्रविधायकत्वं उद्गेयमिति तु स्थानापत्तिप्राप्तानुवाद इत्येव तत्त्वम् ॥ १७ ॥

(१८)—अप्रगाणाच्छब्दान्यत्वे तथाभूतोपदेशस्स्यात् ॥ ५४ ॥ यत्स्थाने वा तद्गीतिः स्यात् पदान्यत्वप्रधानत्वात् ॥ ५५ गानसंयोगाच्च ॥ ५६ ॥ वचनमिति चेत् ॥ ५७ ॥ न तत्प्रधानत्वात् ॥ ५८ ॥

तदिरापदमप्रगीतं प्रयोक्तव्यं प्रगीतं वेति सन्देहे ऐरमित्यप्रगीतश्रवणादप्रगीतम् । यदि ह्ययं स्वार्थे तद्धितस्तदा इरां कृत्वेत्यर्थावगमादिरापदमात्रविधिस्स्पष्ट एव । न हि प्रगीतेरापदादयं तद्धितः तथात्वे इकारस्य तालव्यत्वात् गीतिदशायां च वृद्धत्वापत्तेः 'तालव्यमायी यद्वृद्धम्' इति छन्दोगसूत्रेण गीतिदशायां यत् त्रिमात्रात्मकतया वृद्धं तालव्यं तत् आयी भवतीत्यर्थकेणायीभावविधानादाकारादित्वेन 'वृद्धाच्छः' इति णिनिसूत्रेण छप्रत्ययोत्पत्तौ आयीरीयं इति रूपापत्तेः ।

अथ स्वार्थतद्धिते वैयर्थ्यापत्तेर्विकारार्थ एवायं तद्धितः, विकारश्चेरापदस्य प्रगाणरूपो धर्म एवेति चेत्—तथात्वेऽपि प्रगाणरूपधर्माङ्गीकारे विशिष्टविधिगौरवापत्तेरप्रगाणरूपस्य गिरापदवाधकत्वरूपस्य वा धर्मस्य तद्धितार्थत्वमङ्गीकृत्य तद्धितस्यानुवादोपपत्तेः। न चाप्रगीतेरापदमात्रविधाने 'उद्गेयम्' इत्यनुवादानुपपत्तिः। तस्मैरं कृत्वा अक्षरान्तरे उद्गेयमित्येवमर्थाङ्गीकारेणानुवादोपपत्तेः। न च प्रकारान्तरेण गीतेरप्राप्तावपि गिरापदकार्यापत्त्या तत्प्राप्तिः। गिरापदस्याग्निष्टोमस्तोत्रसाधनत्वाभावेनेरापदस्य तत्कार्यापत्तौ प्रमाणाभावात्। तद्गीतेस्तद्द्वारा तदपूर्वसाधनत्वाभावेनेरापदे प्रसक्त्यभावाच्च।

अत एवोहग्रन्थे 'आ ई रा आ ई रा चा दा क्षा सा' इति गानाम्नानमप्यप्रमाणमेव। न चैतस्य श्रुतिमूलकत्वात् न्यायस्यैवाप्रामाण्यं ऊहग्रन्थसमाख्ययाऽस्य तर्कमूलत्वेन श्रुतिमूलत्वाभावात्। अत एव सन्नयविरोधे अस्याप्रामाण्यमेव।

यत्तु तन्त्ररत्नादिग्रन्थवशादस्य गीत्याम्नानस्य वेदत्वकथनं तत् वैदिकानामूहग्रन्थे पाठादनादरणीयमिति प्राप्ते—

सत्यं इरापदस्वरूपस्यैव विधिः न तु प्रगाणस्य। तथाऽपि प्रगाणाभावस्याप्यविधेयत्वात् कार्यापत्त्या गीतेरपि प्राप्तिर्न विरुद्ध्यते। तथा हि—यद्यपि न गिरापदस्य स्तोत्रापूर्वे उपयोगः तथाऽपि गुणाभिधानरूपस्य कार्यस्य गिरापदेरापदयोरेकत्वात् युक्तस्तया धर्मलाभः। यद्यपि च न गुणाभिधानस्वरूपार्था धर्माः तथाऽपि गुणाभिधानजन्यस्यापूर्वस्यैकस्यैवाग्निष्टोमस्तोत्रे चयनादौ चोपयोगाद्धर्माणां च गीत्यादीनां गिरापदकार्यगुणाभिधानजन्यावान्तरापूर्वप्रयुक्तत्वस्यैव दीक्षणीयावा-

इनियमन्यायेनाङ्गीकाराच्चयनापूर्वसाधनीभूतगिरापदावान्तरकार्यापक्षे अग्निष्टोमस्तोत्रापूर्वसाधनीभूततादृशकार्यजनके इरापदे युक्तैव तद्धर्मप्राप्तिः।

माऽस्तु वा अवान्तरकार्यभेदमङ्गीकृत्य कार्यापत्तिः। तथाऽपि गिरापदबाधकतया तत्स्थानापत्तिस्तावदस्त्येवेरापदस्य। अतश्चेरापदस्य प्रकरणात् स्तोत्राङ्गत्वेऽवगते गीतिरूपधर्माकांक्षायां बाधकत्वरूपस्थानापन्न्योपस्थितस्य गिरापदस्य धर्मातिदेशे न किञ्चिद्बाधकमस्ति। आवश्यकं च गीतेश्चयनापूर्वसाधनीभूतगिरापदाङ्गत्वम्।

वस्तुतस्तु—यथैव 'यज्ञायज्ञियं पुच्छे गायति' इति वचनेन यज्ञायज्ञियस्य चयने उपयोगस्तथैव 'यज्ञायज्ञियेन स्तुवीत' इति वचनेनाग्निष्टोमस्तोत्रेऽपि। अतश्च तद्गतगीत्यंशस्य यावच्चयने स्वाश्रयगिरापदोपयोगकल्पनाद्वारा चयनोपयोगकल्पनं तावत् तत्पूर्वमेव अग्निष्टोमस्तोत्राङ्गभूतेरापदद्वारकत्वकल्पनया स्तोत्रोपयोगोऽपीति उपदेशेनैव तत्प्राप्तेर्न गिरापदगीतेरिरापदेऽतिदेशः।

यद्यपि चाग्निष्टोमस्तोत्रेऽप्यार्चिके पुरस्तादुपरिष्टाच्च गिरापदस्याप्युपयोगात् तत्स्थानापत्तिरिरापदस्याग्निष्टोमस्तोत्रसाधनत्वस्य समानत्वादित्याशङ्क्येत—तथाऽप्यार्चिकौद्गीथयोस्वान्तरकार्यभेदात् अभेदेऽपि वा अप्रगीतस्यैव गिरापदस्यार्चिके पाठाद्गिरापदगीतेर्गिरापदद्वारा चयनादावेवोपयोगेनाग्निष्टोमस्तोत्रे उपयोगाभावान्न तत्कार्यापत्त्याऽतिदेशेन तद्गीतेरिरापदेऽतिदेशः ऊहो वा, अपितूक्तरीत्योपदेशेनैव।

तत्त्वं तु 'ऐरं कृत्वोद्गेयम्' इत्यत्र नेरापदाक्षराणि विधीयन्ते गिरापदयुक्तपाठेऽपि तत्सत्त्वात् अपि तु निषेधानुवादबलाद्ग-

कारपरिसङ्ख्यामात्रं विधिफलं, अतश्च गीतेः गा इरा गा इरा चा दा क्षा सा इत्येवंविधाया गिरापदवृत्तित्वेन सम्मताया वस्तुतः इराक्षरधर्मत्वात् गकारसत्त्व इव तदसत्त्वेऽपि स्वाश्रयवृत्तित्वाक्षतेर्न गिरापदगीतेरिरापदे स्वतन्त्र उपदेशो न वाऽतिदेशः ऊहो वा। यत्र तु 'न प्रप्रेति ब्रूयात् प्रप्रीति ब्रूयात्' इत्यादावकारबाधेनेकारविधिस्तत्र पूर्वोक्तविधया स्वतन्त्रोपदेशो गीतेः। सर्वथा प्रगीतमेवेरापदम् ॥ १८ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
नवमस्याध्यायस्य प्रथमः पादः

अथ नवमस्याध्यायस्य द्वितीयः पादः.

(१)–सामानि मन्त्रमेके स्मृत्युपदेशाभ्याम् ॥ १ ॥ तदुक्तदोषम् ॥ २ ॥

रथन्तरादिशब्दानां सामादिशब्दानां च गीतिमात्रवाचित्वं गीतिविशेषत्वादिधर्ममात्रवाचित्वं वा सिद्धमेवोत्तरविवक्षया स्मार्यते। अथ वा योऽयमूहो नाम ग्रन्थविशेषस्सामगैः पठ्यते स किं पौरुषेयः उतापौरुषेय इति चिन्तायां--

कर्तृस्मरणाभावरूपवेदापौरुषेयत्वहेतोरत्रापि तुल्यत्वात् इतरथा तस्यानैकान्तिकत्वेन वेदस्याप्यपौरुषेयत्वानापत्तेः स्वाध्यायानाध्यायपरिपालनस्य च तुल्यत्वादह इति समाख्यायाश्च

रूढत्वेनापि नेतुं शक्यत्वात्। इतरथा कर्तृस्मरणाभावेऽपि समाख्याबलेन पौरुषेयत्वाङ्गीकरणे काठकादिसमाख्यया वेदस्यापि पौरुषेयत्वापत्तेरपौरुषेय ऊहग्रन्थ इति प्राप्ते—

ऊह वितर्क इति स्मृत्या तर्कप्रभवत्वरूपयोगेनैव समाख्योपपत्तौ रूढत्वे प्रमाणाभावात्, ऊहग्रन्थे च योनिग्रन्थे योन्युत्पन्नस्यैव साम्नो 'यद्योन्यां गायति तदुत्तरयोर्गायति' इत्यादिनाऽतिदिष्टस्य न्यायेनोत्तरादौ पठनीयस्य सौकर्यार्थं पाठादस्यापि वेदत्वे सर्वासामाम्नानसिद्धतया योनित्वप्रसङ्गेन योन्युत्तरादिविभागस्य अतिदेशशास्त्रस्य च वैयर्थ्यापत्तेः पौरुषेयत्वमेव। अत एव बलवत्पौरुषेयत्वसाधकप्रमाणान्तराभावविशिष्टकर्तृस्मरणाभाव एव पौरुषेयत्वाभावसाधक इति नानैकान्तिकता।

यद्यपि च तत्रत्या ऋचः सामानि च स्वरूपेणापौरुषेयाण्येव तथाऽप्युत्तरादिषु न्यायसिद्धातिदिष्टसामरचनाप्रकारः पौरुषेयः। अत एव स्वाध्यायानाध्यायादिपरिपालनं ऋगादिविषयत्वादन्यथासिद्धम्। कर्तृस्मरणाभावस्तु मूलश्रुतिकल्पनाभावादप्युपपद्यते। मन्वादिस्मृतिषु हि मन्वादिवैशिष्ट्येन श्रुतिकल्पनार्थं कर्तृस्मरणमावश्यकम्। प्रकृते तु न्यायमूलकत्वात् तदभावेऽपि न काचित् क्षतिः। अत एव सन्नचायविरोधे अस्याप्रामाण्यं न त्वन्यस्मृतिवत् मूलभूतश्रुतिकल्पनया न्यायस्यैवाभासीकरणम्। अत एवाग्रे सामोहन्यायविचारोपि सङ्गच्छते ॥ १ ॥

(२)—कर्म वा विधिलक्षणम् ॥ ३ ॥ तद्द
ग्द्रव्यं वचनात्पाकयज्ञवत् ॥ ४ ॥ तत्रा-

विप्रतिषिद्धो द्रव्यान्तरे व्यतिरेकः प्रदेशश्च ॥ ५ ॥ शब्दार्थत्वात्तु नैवं स्यात् ॥ ६ ॥ परार्थत्वाच्च शब्दानाम् ॥ ७ ॥ असम्बन्धश्च कर्मणा शब्दयोः पृथगर्थत्वात् ॥ ८ ॥ संस्कारश्चाप्रकरणेऽग्निवत्स्यात्प्रयुक्तत्वात् ॥ ९ ॥ अकार्यत्वाच्च शब्दानामप्रयोगः प्रतीयेत ॥ १० ॥ आश्रितत्वाच्च ॥ ११ ॥ प्रयुज्यत इति चेत् ॥ १२ ॥ ग्रहणार्थं प्रयुज्येत ॥ १३ ॥

साम्नां किं ऋचं प्रति प्राधान्यं उत गुणत्वमिति सन्देहे सत्यपि क्रमप्रकरणाभ्यां ऋचां स्तोत्राङ्गत्वेन विनियोगे साम्नामपि तत एव स्तोत्राङ्गत्वोपपत्तेर्न तावत्परस्परं गुणप्रधानभावः। यदि तु योग्यतारूपं लिङ्गं पुरस्क्रियते ततस्स्तोभाक्षरवद्गक्षराणामपि गीतिकालपरिच्छेदकत्वयोग्यत्वात् सामाङ्गत्वम्। न च साम्नामपि ऋगक्षराभिव्यञ्जकत्वलिङ्गेन ऋगङ्गता। उभयथोपपत्तौ 'ऋच्यध्यूढं साम गायति, यद्योन्यां गायति तदुत्तरयोर्गायति, कवतीषु रथन्तरं गायति' इत्यादौ सप्तम्याश्रुत्या ऋचां सामाङ्गत्वप्रतीतेः। संयुक्ताक्षरस्यैव गुणाभिधानरूपस्तोत्रजनकत्वेन विश्लिष्टाक्षराभिव्यञ्जकसाम्नः प्रयोजनविरोधितयाऽभिव्यञ्जकत्वानुपपत्तेश्च। अत एव प्रयाजशेषन्यायेन सप्तम्याः प्राधान्यलक्षणेत्यप्यपास्तम्। निषादस्थपत्यधिकरणन्यायविरोधेन

प्राचीनप्रयाजशेषन्यायस्यापभ्रंशितत्वात् । एवं च स्तोत्राङ्गतया ऋचां पृथगुच्चारणं कृत्वा सामाधारतया पुनः कार्यम् ॥

किञ्चैवं क्रमप्रकरणसहकृतलिङ्गेनैव साम्नां ऋगक्षराभिव्यक्तिद्वारा स्तोत्रोपयोगे 'यज्ञायज्ञियेन स्तुवीत, बृहत् पृष्ठं भवति, रथन्तरं पृष्ठं भवति' इत्यादिस्तोत्रे विनियोगवैयर्थ्यम् । अतश्च वैयर्थ्यपरिहारार्थमप्यारादुपकारकतया साम्नां स्तोत्राङ्गत्वम् । न चैवं करणत्वनिर्देशानुपपत्तिः, आरादुपकारस्यापि बृहस्पतिसववदपूर्वद्वारा स्तोत्रोपकारं प्रति करणत्वोपपत्तेः । ऋचां तु सामाङ्गभूतानामपि पृथगुच्चारणाभावेऽप्यानुषङ्गिकं स्तोत्रोपकारकत्वमित्यपि सुवचमिति प्राप्ते—

स्तोत्रशब्दस्य याज्ञिकवृद्धव्यवहारेण प्रगीतमन्त्रसाध्यगुणाभिधानवाचित्वावगतेः इतरथा शस्त्रापेक्षया स्तोत्रस्य भेदानुपपत्तेरवश्यं गानविश्लिष्टाक्षरवृत्तिसंश्लेषज्ञानजन्यगुणाभिधानस्यैव स्तोत्रत्वावसायात् तादृशस्तोत्रस्य च गानाभिव्यक्ताक्षररसाध्यत्वेन गानं विनाऽनुपपत्तेः युक्तमेव साम्नो ऋगक्षराभिव्यक्तिद्वारा स्तोत्रसाधनत्वमिति क्रमप्रकरणसहकृतलिङ्गेनैव ऋचां स्तोत्राङ्गत्वमिव साम्नामपि ऋगक्षराभिव्यक्त्यर्थत्वम् ।

अत एव ऋगक्षराभिव्यक्त्यर्थस्यैव साम्न आनुषङ्गिकतया ऋगाधारत्वस्यापि प्राप्तेः 'ऋच्यध्यूढं साम गायति' इत्यनुवादः । आवश्यकं चास्यानुवादकत्वं तत्तत्साम्नां तत्तदगाधारत्वस्य पाठादिनैव प्राप्तेः ऋचस्सामाङ्गत्ववादिनोऽपि । 'यद्योन्यां गायति तदुत्तरयोः' इत्यादौ तु सप्तम्या प्राधान्यलक्षणा, अन्यथा अतिदेशानुपपत्तेः । न ह्यत्रोत्तरयोस्सामाधारत्वविधेस्सम्भवति । गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् । 'एकं साम

तृचे क्रियते' इत्यनेन तृचाधारत्वस्य भवन्मते विधानेन ऋक्-यस्य विकल्पानुपपत्तेश्च । 'एकं सामः' इत्यनेन तृचाधारत्व-सिद्धेः पाठादिना च विवक्षितऋक्प्राप्त्युपपत्तेः 'यद्योन्यां' इत्यस्य वैयर्थ्यापत्तेश्च । अतोऽतिदेश एवानेनोत्तरयोर्विधेय इति तयोः प्राधान्यसिद्ध्यर्थं लक्षणाऽऽवश्यकी ।

एतेन ऋचामुक्तवचनैस्सामाङ्गत्वेऽप्यानुषङ्गिक्या अक्षरा-भिव्यक्तेरपि जायमानत्वात् तामादायैव स्तोत्रपदार्थनिर्वाहोप-पत्तेर्न साम्नां ऋचं प्रत्यङ्गत्वमिति परास्तम् । ऋगङ्गत्वाभावे साम्न ऋगन्तरेऽतिदेशानुपपत्तेः । अतो ऋचां प्राधान्यादुत्तरा-वर्णवशेन साम्नोऽन्यथाभावात्मक ऊहोपि वक्ष्यमाणो नानु-पपन्नः ॥ २ ॥

(३)—तृचे स्याच्छ्रुतिनिर्देशात् ॥ १४ ॥ श-ब्दार्थत्वाद्विकारस्य ॥ १५ ॥ दर्शयति च ॥ १६ ॥ वाक्यानां तु विभक्त-त्वात् प्रतिशब्दं समाप्तिस्स्यात्संस्कार-स्य तदर्थत्वात् ॥ १७ ॥ तथा चा-न्यार्थदर्शनम् ॥ १८ ॥ अनवानोपदे-शश्च तद्वत् ॥ १९ ॥ अभ्यासेनेतरा श्रुतिः ॥ २० ॥

तच्च साम योन्यामुत्पन्नमप्युत्तरयोरतिदिष्टत्वात् तृचे गेय-मित्यविवादमेव । तत्रापि च यद्यपि ऋचां प्रधानत्वात् प्रतिप्र-

धानं गुणावृत्तेर्न्याय्यत्वात् प्रत्यृचं परिसमापनीयमित्यपि सिद्धमेव। तथाऽपि तदेवाक्षिप्य समाधीयते। 'एकं साम तृचे क्रियते स्तोत्रीयम्' इति वचनेन हि न तावदगुद्देशेन सामविधिः, तस्य लिङ्गादेव प्राप्तेः। नापि त्रित्वविशिष्टऋगुद्देशेन, विशिष्टोद्देशे वाक्यभेदात्। नापि स्तोत्रीयऋगुद्देशेन त्रित्वविधिः, एकप्रसरताभङ्गापत्तेः। तत्तत्स्तोत्रेषु स्तोमान्तरविधानेन त्रित्वविध्यनुपपत्तेश्च।

अत एव स्तोत्रोद्देशेनापि न त्रित्वस्य ऋक्परिच्छेदद्वारा साक्षाद्वा विधिः, अस्य ज्योतिष्टोमप्रकरणे समाम्नानेऽपि स्तोत्रविशेषप्रकरणाभावात्, प्रकरणेन स्तोत्रस्योद्देश्यत्वानुपपत्तेश्च। स्तोत्रस्य सामविशेषणत्वेनोपादानात् स्तोत्रीयपदेनापि तत्प्रतिपादनानुपपत्तेश्च। त्रित्वस्य ऋग्विशेषणत्वेनोपात्तस्य स्तोत्रोद्देशेन विध्यनुपपत्तेश्च। स्तोत्रोद्देशेन त्रित्वविशिष्टऋग्विधानं तु ऋचां प्रकरणादेव स्तोत्रे प्राप्तत्वात्पूर्वोक्तदूषणगणापत्तेश्चानुपपन्नम्। अतस्सप्तमीबलात् त्रित्वविशिष्टऋचामेव सामोद्देशेन विधिः। उद्देश्यसमर्पकं च स्तोत्रीयपदम्। स्तोत्रीयं च योग्यताबलात् सामैवेति सामेत्यनुवादः। सामपदमेव वा तथाऽस्तु। अवभृथाद्यङ्गसामस्वपि च तृचाधारत्वविधिरस्तु। स्तोत्रीयपदं चोपलक्षणम्। सर्वथा त्रित्वविशिष्टानां ऋचां साम प्रति गुणत्वात् गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात् व्यासज्य गेयम्। एवं च 'यद्योन्यां' इति वाक्यं नातिदेशविधायकं अपि तु सामसाधारण्यानुवादस्त्रित्वापेक्षितऋग्विशेषसमर्पकमिति प्राप्ते

सामाधारतया तृचविधौ पाठादेव योनिऋक्प्राप्तेरुत्तरयोरपि उत्तराग्रन्थपठितयोः क्रमप्रकरणादिना तत्तत्सामाधारत्वेन प्राप्तिसम्भवात्। इतरथा तत्तत्सामाधारत्वेन तदुत्तराप्राप्तेस्त-

व्याप्यसम्भवापत्तेः 'यद्योन्यां गायति तदुत्तरयोर्गायति' इत्यस्य वैयर्थ्यापत्तिः। अतोऽवश्यं क्रमप्रकरणादिना तत्तत्स्तोत्राङ्गतया प्राप्तानां योन्युत्तरादिरूपाणां ऋचां स्तोमविधिवशेन समुच्चयावगतावुत्तरयोरपि स्तोत्राङ्गत्वनिर्वाहार्थं यत्किञ्चित्सामप्राप्तौ 'यद्योन्यां इत्यतिदेशेन योनिसाम नियम्यते। यथाप्राप्तस्यैव च नियम इति साम्नो ऋगक्षराभिव्यक्त्यर्थत्वेनैव प्राप्तत्वात् ऋचां प्राधान्यावगतेः प्रतिप्रधानं गुणावृत्तिन्यायेन प्रत्येकमेव गेयम्।

एवं च—'एकं साम तृचे क्रियते' इत्यनेन तृचोद्देशेन स्तोत्रीयविधानादवभृथाद्यङ्गभूतसाम्नां चयनाद्यङ्गभूतषाडहिकसाम्नां च नोत्तरासु गानम्। अत्र हि त्रित्वस्य ऋच्यन्वयव्युत्पत्तेर्न विशिष्टोद्देशे वाक्यभेदः। 'यद्योन्यां' इत्यनेनोपसंहाराच्च स्तोत्रीयस्य सामरूपतासिद्धेः सामेत्यनुवादः।

वस्तुतस्तु—उत्तराणामवान्तरप्रकरणात् तत्तत्स्तोत्राङ्गत्वेनैव प्राप्तेरवभृथाद्यङ्गत्वे प्रमाणाभावात् तत्र तृचगानाप्रसक्तेः 'एकं साम' इत्यादेर्नोक्तप्रयोजनलाभः। अत एव तत्र सामविध्यन्यथानुपपत्त्या तदाश्रययोनिमात्रस्यैव विनियोगात् तज्जन्यगुणाभिधानस्यैवावभृथादावुपयोगः। किन्तु तृचोद्देशेन सामैकत्वविधिः, सामेति विशिष्टकारकविधानेऽपि सामैकत्वविधेस्तात्पर्यात्। एकपदं स्तोत्रीयपदं चानुवाद एव।

सामैकत्वविधिप्रयोजनं च यत्र विकृतावग्निष्टुदादौ 'आग्नेयीषु स्तुवते' इति प्राकृतयोन्युत्तराबाधेन ऋगन्तरविधानं तासां च न विकृतिप्रकरणे पाठः अपि तु दाशतयीभ्यः आनयनं तत्र तु स्तोमसङ्ख्यानुरोधेनानीतासु ऋक्षु प्राकृतसामपाठे अनियमेन द्वित्रितावत्सङ्ख्याकसाम्नां त्रिणवादिसङ्ख्याकऋक्षु

पाठप्रसक्तौ तूच एवैकैकसाम्नां पाठः, ऋगन्तरेषु माध्यंदिनादिपवमाने सामान्तरागम इति ॥ ३ ॥

(४)–तदभ्यासस्समासु स्यात् ॥ २१ ॥ लिङ्गदर्शनाच्च ॥ २२ ॥

तिसृषु प्रत्येकं गीयमानमेकं साम समास्वेव गेयं न विषमासु, न्यूनासु गाने सामैकदेशस्य लोपाख्यसंशरापत्तेः । अधिकपरिमाणासु गाने ऋक्शेषे सामादर्शनरूपविलेशापत्तौ तत्र सामैकदेशस्यावृत्त्यापत्तेः । तस्मात् समासु गानम् । इदं चाग्निष्टुदादिविषयमेव । तत्रागम्यमानानां ऋचां सामपरिमितछन्दस्कानामेवानयनात् । न त्वन्यत्र समयोर्विषमयोर्वा उत्तराग्रन्थपठितोत्तरयोः योनेश्च क्रमप्रकरणादिविनियुक्तत्वेन त्यागायोगात् तत्र साम्यवैषम्यचिन्तानुपपत्तेः ॥ ४ ॥

(५)–नैमित्तिकं तूत्तरात्वमानन्तर्यात्प्रतीयेत ॥ ऐकार्थ्याच्च तदभ्यासः ॥ २४ ॥

'यद्योन्यां गायति तदुत्तरयोः' इत्यत्रोत्तराशब्देन योन्युत्तरयोरुत्तराग्रन्थपठितयोश्चोत्तरयोर्ग्रहणं उत उत्तराग्रन्थपठितयोरेवेति सन्देहे उत्तराशब्दस्य 'प्रस्तरमुत्तरं बर्हिषस्सादयति, तूष्णीमुत्तरा दोहयति' इत्यादौ सम्बन्धिशब्दत्वदर्शनात् यैव योनेः परतः पठिता सैवोत्तरा । ततश्च योनिग्रन्थे रथन्तरयोनेः परतो बृहद्योनेः पाठात् तस्यां रथन्तरस्य गानं उत्तराग्रन्थे च रथन्तरयोनेः परतो 'न त्वा वामन्यो दिव्यो न पार्थिवः' इत्यस्याः पाठात् तस्यामपि विकल्पेनेति प्राप्ते—

बह्योनेः रथन्तरयोन्युत्तरत्वेऽपि तस्यामुत्तराशब्दस्य वैदिकैरप्रयुज्यमानत्वात् उत्तराशब्दोऽयमुत्तराग्रन्थपठितोत्तरासु वैदिकप्रयोगादसम्बन्धिकतयैव रूढः। ततश्च सम्बन्धिशब्दस्य प्रतिसम्बन्धिप्रतिसन्धानसापेक्षत्वेन विलम्बेनार्थोपस्थापकत्वादन्यत्र सम्बन्धिशब्दत्वेऽपि प्रकृते असम्बन्धिशब्द एवायम्। ततश्चोत्तराग्रन्थपठितोत्तराणामेव झडित्युपस्थापक इति तासामेव ग्रहणम्। प्रकरणक्रमाभ्यां वोत्तराग्रन्थपठितानामुत्तराणां तत्तत्स्तोत्राङ्गत्वप्रतीतेरिदमेव युक्तम्॥

एवं वा—द्वादशाहे 'षडहगतं चतुर्थमहरेकविंशः षोडशी वैराजं साम' इत्याम्नातम्। अत्र प्रकृतिप्राप्तसर्वस्तोत्रेष्वेकविंशस्तोमषोडशिसंस्था पृष्ठस्तोत्रे च वैराजं साम इत्यनेकगुणविशिष्टं कर्म विहितम्। तत्र च 'त्रैशोकं नाम ब्रह्मसाम अतिजगतीषु स्तुवीत' इति ब्राह्मणाच्छंसिस्तोत्रे त्रैशोकं साम विहितं, तच्चातिजगत्यामुत्पन्नं उत्तराग्रन्थे चोत्तरे द्वे बृहत्यौ, तत्र संशयपरिहारार्थं उत्तराग्रन्थपठितयोरप्युत्तरयोर्वाचस्स्तोमादौ सार्थक्यमङ्गीकृत्य अतिजगत्यामेव द्वे दाशतयीभ्यः समानीय समास्वेव गानम्।

न चानीतानामङ्गत्वे प्रमाणाभावः। न्यायसहकृततृचगानविधेरेव नियामकत्वात्। न च प्रकरणेन न्यायबाधः अतिजगतीषु स्तुवीत' इति अतिजगतीबहुत्वविधिना न्यायस्योज्जीवनात्। न च प्राप्तस्तोत्रानुवादेन त्रैशोकातिजगतीबहुत्वयोर्विधाने वाक्यभेदः। अतिदेशप्रवृत्तेः पूर्वमस्य प्रवृत्त्या विशिष्टस्तोत्रविध्युपपत्तेः। अत एव 'यद्योन्यां' इति सामान्यवचनं सामान्तरविषयमिति प्राप्ते—

बाहिष्पवमानातिरिक्तस्तोत्रे एकविंशस्तोमानुरोधेन ऋगभ्यासस्यावश्यकत्वात् एकस्या अप्यतिजगत्यास्सप्तकृत्वः आवृत्तेर्बहुत्वस्य प्राप्ततयाऽनुवादोपपत्तेरस्य साममात्रविधिपरत्वादुत्तराग्रन्थपठितबृहतीप्रकरणानुरोधेन न्यायस्यैव बाधात् संशरमपि स्वीकृत्य बृहत्योरेव गेयम् ॥ २५ ॥

(६)–प्रागाथिकं तु ॥ २५ ॥ स्वे च ॥ २६ ॥ प्रगाथे च ॥ २७ ॥ लिङ्गदर्शनाच्चयतिरेकाच्च ॥ २८ ॥

ज्योतिष्टोमे बृहद्रथन्तरे सामनी बृहत्योरुत्पन्ने, तयोरुत्तराग्रन्थे एकैकस्यैकैका पङ्क्तिश्छन्दस्कोत्तरा। तत्रेदं वचनं 'न वै बृहद्रथन्तरमेकं छन्दः यत्तयोः पूर्वा बृहती ककुभावुत्तरे' इति। तत्र किं पङ्क्तिश्छन्दस्कामुत्तरां परित्यज्य द्वेद्वे ककुभौ दाशतयोभ्यः समानेतव्ये उत बृहतीयोनिं उत्तरां च पङ्क्तिं प्रगृह्य ककुभावुत्तरे सम्पादनीये इति चिन्तायां–

प्रग्रथनेन मुख्यककुप्सम्पत्त्यभावादक्षरसाम्यमात्रेण मुख्यककुप्छन्दस्य गौणत्वापत्तेर्जघन्यांत्तराशब्दस्यैव असम्बन्धिशब्दत्वं परित्यज्य कार्यलक्षणां योन्युत्तरकाललक्षणां वाऽङ्गीकृत्य ककुब्विध्यङ्गीकारात्स्वाभाविककककुभोरेवानयनम्, एवं च मुख्यतृचगानसम्पत्तिरपीति प्राप्ते—

तथात्वे 'पादं पुनरारभते' इत्यस्य वैयर्थ्यापत्तेः ककुप्पदमेव गौणमङ्गीकृत्योत्तरोद्देशेन ककुप्त्वविधानात् तयोरेव प्रग्रथनेन ककुप्त्वसम्पादनम्। एवं वैदिकानां प्रग्रथनस्मरणं, बार्ह-

तत्प्रगाथसमाख्योत्तराग्रन्थे पङ्क्तेः पाठश्चोपपन्नो भवति। तृचत्वोपपत्तिस्सामान्यविधित्वात्तथाऽनुपपन्नाऽपि न दुष्यति।

प्रग्रथनं च आद्यां बृहतीं सकृत्पठित्वा तस्या अन्त्यपादेन सह द्वितीयाया अर्धर्चं पठित्वा तदन्त्यपादेन सह द्वितीयान्त्यार्धर्चपठनरूपं बोध्यम्। तेन द्वितीया ककुप् अष्टाविंशत्यक्षरैव। आद्यायास्सप्तविंशत्यक्षरत्वेऽपि अल्पान्तरत्वान्न दोषः।

एवं वा—ज्योतिष्टोम एव माध्यन्दिनपवमाने 'त्रिच्छन्दा आधापो माध्यन्दिनः पवमानः पञ्चसामा' इति श्रुतम्। तदर्थविवरणानि च 'गायत्रामहीयवे गायत्र तृचे भवतः रौरवयौधाजये बार्हते तृचे भवतः औशनसमन्त्यं त्रिष्टुप्' इति। तत्र रौरवयौधाजययोः पूर्वा बृहती, उत्तरा विष्टारपङ्क्तिस्समाम्नाता। तदिह विशिष्यैव बार्हते तृच इति बार्हततृचत्वाम्नानात् उत्तरे द्वे बृहतीछन्दस्कावेव समानेतव्ये इति प्राप्ते—

नात्र रौरवयौधाजयोद्देशेन बार्हतविधिः, योनेस्तादृश्याः प्राप्तत्वात्। नापि तृचाधिकरणत्वविधिः, प्राप्तत्वादेव। नापि बार्हततृचाधिकरणत्वविधिः, विशिष्टस्याव्युत्पन्नत्वात्। अत एव न विशिष्टोद्देशेन सामद्वयविधिः। तत्र तृचोद्देशेन बृहतीछन्दस्कत्वविधिः परं भवेत्, सोऽप्यवच्छेदकावच्छेदेन वा सामानाधिकरण्येन वा, उभयथाऽप्यसम्भवः। अवच्छेदकावच्छेदेनाश्रीयमाणे प्रगाथस्मरणसमाख्योत्तरापाठादिबाधप्रसङ्गापत्तेस्तदनुरोधेन सामानाधिकरण्येनैवाश्रीयते। एवं च वस्तुतस्तस्य प्राप्तत्वादेतानि वाक्यानि पूर्ववाक्यार्थविवरणार्थान्यनुवादकानीत्येव ध्येयम्। न ह्येतान्युत्तरासु सामप्राप्त्यर्थानीति केषांचिदुक्तं युक्तं, 'यद्योन्यां' इत्यनेनैव तत्प्राप्तेः। सर्वथा सिद्धमत्रापि प्रग्र-

थनम्। न चैवं बार्हत इतिवचनस्य योनिबृहतीवत्त्वेनैवोपपत्तेः प्रग्रथने प्रमाणाभावः। तृचसम्पत्तिप्रगथनस्मरणादिनैव तत्सिद्धेः। एवं च प्रग्रथितबृहतीवत्त्वस्यावच्छेदकावच्छेदेन विशेषणत्वोपपत्तावपि लक्षणापत्तेस्तथा नाश्रितमिति ध्येयम्।

तत्र आद्यां बृहतीं षट्त्रिंशदक्षरां पठित्वा तदन्त्यपादस्य द्विरावृत्त्या उत्तरायाः विष्टारपङ्क्तेश्चत्वारिंशदक्षरायाः आद्यार्धचैनैका बृहती, तदन्त्यपादस्य द्विरावृत्त्या द्वितीयार्धचैनापरा इत्येवंरूपं प्रग्रथनं बोध्यम्। अत्र सर्वत्रालपान्तरत्वात् किञ्चिदक्षरन्यूनत्वेऽपि न तच्छन्दस्कत्वविघातः।

यत्तु भाष्यकारेण 'षष्टिस्त्रिष्टुभो माध्यन्दिनं सवनम्' इति लिङ्गमपि प्रग्रथन एवोपपद्यते। तथाहि – माध्यन्दिने सवने पञ्च स्तोत्राणि, एको माध्यन्दिनः पवमानः पञ्चदशस्तोमकः, सप्तदशानि चत्वारि पृष्ठानि, तत्र पवमाने गायत्रामहीयवसान्नोष्णङ्गायत्रयः, रौरवयौधाजययोः षड्बृहत्यः, औशनससान्नस्तिस्रस्त्रिष्टुभः। होतुः पृष्ठे पञ्च बृहत्यो द्वादश ककुभः। विष्टुतिप्रकारे तथैवाम्नानेन तृचस्य तावद्वारमभ्यासात्। मैत्रावरुणपृष्ठे सप्तदश गायत्रयः, ब्राह्मणाच्छंस्यच्छावाकपृष्ठयोरपि सप्तदश सप्तदश बृहत्यः एकैकतृचाभ्यासेनैव। एवं पञ्चचत्वारिंशद्बृहत्यो मुख्याष्षण्णां गायत्रीणां चतुर्विंशत्यक्षराणां त्रिपदानां मध्ये चतसृणां गायत्रीणां द्वादशभिरष्टाक्षरैः पादैः सहिता द्वादश। पूर्वोक्ता अष्टाविंशत्यक्षराः ककुभो द्वादश षट्त्रिंशदक्षरात्मिका बृहत्यो भवन्ति। तदेवं सप्तपञ्चाशद्बृहत्यः। ता एताः षण्णां गायत्रीणां मध्ये अवशिष्टाभ्यां द्वाभ्यां गायत्रीभ्यां सह सप्तदशाभिर्गायत्रीभिरेकैकेन पादेन मिळिता सप्तपञ्चाशद्बृहत्यः चतुश्चत्वारिं-

शदक्षरात्मिकास्सप्तपञ्चाशत्त्रिष्टुभो भवन्ति । एवमाद्याभिस्त्रिभिस्त्रिष्टुभिः षष्टिस्त्रिष्टुभः । तदेतल्लिङ्गं प्रग्रथन एवोपपद्यते । अन्यथा पवमाने अन्यासां बृहतीनां, होतुः पृष्ठे चान्यासां ककुभां दाशतयीभ्यस्समानयने षष्टिसङ्ख्यानुपपत्तेः । अत्र हि न 'षष्टिः त्रिष्टुभो माध्यंदिनं सवनम्' इति यथाश्रुतं सामानाधिकरण्यमुपपद्यते बाधात् । अतो जघन्यमाध्यंदिनसवनपद एव लक्षणामङ्गीकृत्य माध्यंदिनसवनाङ्गभूताः यास्सामवेदे समाम्नताः ताः षष्टिः इत्यर्थावगतेर्दाशतयीभ्यस्समानयने लिङ्गानुपपत्तेरित्युक्तम् ।

लक्षणाया आवश्यकत्वे लाघवान्माध्यन्दिनसवनस्तोत्रीयाणामेव लक्षणादानीतानामपि तत्त्वोपपत्तेरुपेक्षितम् ।

एवं वा—'पञ्चच्छन्दा आवापः आर्भवः पवमानः सप्तसामा' इत्येतद्विवरणार्थेषु 'गायत्रसंहिते गायत्रे तृचे भवतः इयावाश्वान्धीगवे आनुष्टुभे तृचे भवतः उष्णिहि शफं ककुभि पौष्कलं कावमन्त्यं जगतीषु' इत्येतेषु इयावाश्वान्धीगवयोः पूर्वाऽनुष्टुप् उत्तरे गायत्रचौ श्रुते । तत्र किं तास्वेव प्रग्रथनं विनैव तृचे गानं उत प्रग्रथनेनेति चिन्तायां—

पूर्वत्र लक्षणां विनैव तृचत्वसामानाधिकरण्येन बृहतीछन्दस्कत्वोपपत्तावपि एकस्या एवोत्तरायाः पाठेन तृचगानानुपपत्तेः युक्तं प्रग्रथनम् । प्रकृते तु उत्तरार्धयस्यापि पाठात् तृचगानोपपत्तेः प्रग्रथने प्रमाणाभाव इति प्राप्ते—

प्रमाणान्तराभावेऽपि प्रगाथस्मरणसमाख्ययोरेव प्रमाणत्वात् प्रग्रथनम् । तच्च न पूर्ववत् द्विरावृत्त्या, अपि तु अन्त्यान्त्यपादस्य सकृदावृत्त्यैव । तावतैव तृचस्यानुष्टुभतोपपत्तेः ।

अष्टाक्षरेण हि पादेनान्विता गायत्री द्वात्रिंशदक्षराऽनुष्टुप् भवति । स्मरणवशादपि चैवं प्रग्रथनम् । लिङ्गं च 'चतुर्विंशतिजगत्यस्तृतीयसवने एका च ककुप्' इति प्रग्रथन एवोपपद्यते ।

तथा हि तृतीयसवने स्तोत्रद्वयम् । सप्तदशः आर्भवः पवमान एकविंशं चाग्निष्टोमस्तोत्रम् । आर्भवे आद्यसाम्नो षड्गायत्र्यः तास्तिस्रो जगत्योऽष्टचत्वारिंशदक्षरात्मिकाः; ततस्तृतीयचतुर्थसाम्नोष्णडनुष्टुभः ताश्चतस्रो जगत्यः; पञ्चमषष्ठसाम्नोरुष्णिक्ककुभौ द्वे ऋचौ अष्टाविंशत्यक्षरे सैका जगती अष्टौ अक्षराण्यवशिष्यन्ते; सप्तमे साम्नि तिस्रो जगत्यः; अग्निष्टोमस्तोत्रे च प्रग्रथनपूर्वाभ्यासे सप्त बृहत्यः; चतुर्दश ककुभः; तत्र सप्त बृहत्यः पञ्च जगत्यः; द्वादशाक्षराण्यवशिष्यन्ते चतुर्दशानां च ककुभां अष्टौ जगत्यः; ≠ अष्टौ अक्षराण्यवशिष्यन्ते । तदेवं चतुर्विंशतिजगत्योऽवशिष्टाक्षरैश्च मिलितैरेका ककुप् । तदिदं प्रग्रथन एवोपपद्यते । न तु यथाश्रुतगायत्रीपाठे, अल्पाक्षरत्वापत्तेः । तस्मादपि प्रग्रथनम् ।

यत्तु भाष्यकारेण पूर्ववदन्ययोर्वाऽनुष्टुभोस्समानयनं प्रग्रथनं वेति चिन्तितं तत् पौनरुक्त्यापत्तेरुपेक्षितम् ।

यदपि तन्त्ररत्नादौ लिङ्गान्तरप्रदर्शनार्थं वर्णकान्तरमित्युक्तं तदपि भाष्योक्तविचारे लिङ्गानुपपत्तेः पूर्ववर्णक एव प्रदर्शितत्वादयुक्तम् ॥

एवं वा—गवामयने एकषष्ट्यधिकशतत्रयसुत्यात्मके अशीतिशतं पूर्वे पक्षः; तथोत्तरे; मध्ये विषुवान् । तत्र पूर्वस्मिन् पक्षसि प्रायणीयं प्रथममहः चतुर्विंशं द्वितीयं चत्वारोऽभिप्लवाष्षडहाः एकः पृष्ठ्यष्षडहः स मासः स द्वितीयः स तृतीयः

स चतुर्थः स पञ्चमः त्रयोऽभिप्लवाष्षडहाः एकः पृष्ठ्यष्षडहः अभिजिद्विश्वामैकाहः, त्रयस्स्वरसामानः इत्यष्टाविंशतिरहानि आद्याभ्यामहोभ्यां सह षण्मासाः। गवामयनप्रकरणे ब्रह्मसामस्तोत्रावान्तरप्रकरणे च 'चतुश्शतमैन्द्राबार्हताः प्रगाथाः' इति श्रुतम्। तत्र किं तिसृषु ऋक्षु गानं उत द्वयोः प्रग्रथनेनेति चिन्तायां—

प्रगाथस्मरणात् प्रग्रथनेनैवेति सिद्धान्तः। प्रग्रथनं च रौरवादिवत् द्विरावृत्त्या बोध्यम्। एवं च 'पञ्चसु मास्सु बार्हताः प्रगाथास्समाप्यन्ते' इति लिङ्गमप्युपपद्यते। तथा हि सत्यपि ब्रह्मसामस्तोत्रावान्तरप्रकरणे 'त्रयः प्रगाथाः न ब्राह्मणाच्छंसिस्तोत्रस्थाः अपि तु बृहद्रथन्तरकालेयस्तोत्रीया इन्द्रक्रतुध्यान्यत्र स्थानाः' इति वाक्यादवान्तरप्रकरणं बाधित्वा ज्योतिष्टोमात्मकप्रथमादिनस्थस्तोत्रान्तरेष्वेव निविशन्ते; भाष्यलेखनात्।

छन्दोगसूत्रानुसारात्तु चतुर्विंशस्तोमकद्वितीयदिनस्थस्तोत्रान्तरेष्वेव। तत्रापि पवमाने रथन्तरस्य प्रगाथः, होतुः पृष्ठे बृहतः, अच्छावाकस्य पृष्ठे कालेयस्येत्येवं बोध्यम्।

एवमुक्तवचनादेवेन्द्रक्रतुप्रागाथोऽपि उत्तरस्मिन् सर्वस्मिन् पक्षसि। एतस्य च ब्रह्मसामस्तोत्रस्थत्वेऽपि तत्राभीवर्तसामाभावात् 'अभीवर्तादन्यत्र स्थानाः' इति वचनार्थो न विरुध्यते। अवशिष्टाः शतं प्रगाथास्तंत्र शतस्यैको भाष्यकारलेखनात् प्रथमादिनीयब्रह्मसामस्तोत्रे। परं तु भाष्यकारीयं नौधसग्रहणं नौधसस्मारकब्राह्मणाच्छंसिस्तोत्रोपलक्षणार्थम्। वस्तुतस्तस्य बृहत्सामकपृष्ठवत्त्वेन इयैतस्यैव प्रसक्तौ नौधसप्रसक्त्यभावात्। गवामयने अभीवर्तस्यैव ब्रह्मसामत्वेन विशिष्य विहितत्वाच्च।

छन्दोगसूत्रानुसारात्तु द्वितीयदिनीयब्रह्मसामस्तोत्रे शतस्यैकः प्रगाथो बोध्यः। अवशिष्टा नवनवतिप्रगाथास्ते पञ्चसु मासेषु यावन्तोऽभिप्लवास्तेषां प्रतिषडहं तृतीयदिनवर्जं प्रतिमासं विंशत्यहानि पञ्चसु मासेषु शतम्। तेषु उत्तमवर्जं नवनवतिप्रगाथा इन्द्रदेवत्या बृहतीछन्दस्काश्च समाप्यन्ते। षडहतृतीयेषु उत्तमे च सतोबृहतीनां तृचानामाम्नानात्। अत एव 'तान्येकविंशतिर्दिनानि षष्ठमासस्याद्यानि द्वादशेत्येवं त्रयस्त्रिंशतं सतोबार्हतास्तृचाः' इति वाक्येन तेषां सतोबृहतीनां विधानम्।

एवं पञ्चमासपर्यन्तं पृष्ठ्यषडहेष्वपि सतोबृहतीनां विधानं भाष्यकारलेखनादवगन्तव्यम्। शेषेषु त्वहस्सु विशेषवचनाभावे तिसणामुष्णिहां त्रिभिर्गायत्रीपादैस्संयोगेन बृहतीत्रयसम्पादनम्। न तु क्वापि ब्रह्मसामस्तोत्रे प्रगाथः। तदेतत् पञ्चसु मास्सु बार्हताः प्रगाथास्समाप्यन्त इति लिङ्गं द्वयोः प्रग्रथने उपपद्यते न तु तृचगाने क्रियमाणे भाष्यलेखनात्।

अष्टोत्तरशतद्वयसङ्ख्याकानामृचां पञ्चप्रगाथसम्पादकदशऋङ्न्यूनत्वादष्टनवत्यधिकशतावशिष्टानां षट्षष्टिस्तृचा भवन्ति। ते च सप्ताधिकेषु त्रिषु मासेषु समाप्येरन् तथाहि—पूर्वोक्तरीत्या प्रतिमासं दशदिनानां सतोबृहतीछन्दस्कत्वात् विंशतिदिनान्यवशिष्टानि तानि मासत्रयेण षष्टिस्सम्पद्यन्ते अवशिष्टानि षट् चतुर्थमासस्याभिप्लवतृतीयवर्जमुपादेयानीति सप्ताधिकेषु त्रिषु मासेषु समाप्तिस्स्यात्। यदा तु तुल्यन्यायत्वात् पञ्चस्वपि प्रगाथेषु मुख्यतृचे गानं तदा पञ्चदशानां ऋचां न्यूनत्वादवशिष्टाश्शिणवतिशतं ऋचः तासां तृचाश्चतुष्षष्टिरेका

च ऋगिति पञ्चाधिकैस्त्रिभिर्मासैस्तृचसमाप्तावपि एका ऋगवशिष्यत इति तद्वैयर्थ्यं च। सर्वथा लिङ्गानुपपत्तिः। प्रगाथशब्दानुपपत्तिश्च। न चैकं तृचं पठित्वा अन्त्यां ऋचं पुनरुपादायाग्रिमऋग्द्वयपाठ इत्येवं ऋक्प्रग्रथनमेव किं न स्यादिति वाच्यं 'अन्या अन्या ऋचो भवन्ति' इति वचनेन तन्निरासात्। अतः पादप्रग्रथनमेवेति सिद्धम्।

इयं च लिङ्गानुपपत्तिर्भाष्यकारलेखनानुसारात् प्रकरण एव तावत्सङ्कचाकऋक्पाठमङ्गीकृत्य। यदा तु 'चतुश्शतमैन्द्राबार्हताः प्रगाथाः दाशतयीषु' इति कल्पसूत्रकारवचनात् दाशतयीभ्यस्समानयनं तदा पूर्वपक्षिणोपि चतुश्शतं तृचानामेव समानयनोपपत्तेर्लिङ्गोपपत्तिरविकलैवेति प्रगाथपदादेव प्रग्रथनम्॥ ६॥

(७)—अर्थैकत्वाद्विकल्पस्स्यात्॥ २९॥ अर्थैकत्वाद्विकल्पस्स्यादृक्सामयोस्तदर्थत्वात्॥ वचनाद्विनियोगस्स्यात्॥३१॥

सामवेदे शाखाभेदेनैकस्यैव स्वरसमूहात्मकस्य साम्नः आरोहावरोहादिभेदेन प्रकारभेदा आम्नाताः—एकस्यैव रागस्य देशभेदेन प्रकारभेदवत्। तेषां च प्रकाराणामेकगीत्यर्थत्वात् व्रीहियवादिवदेव विकल्पः सिद्ध एव प्रसङ्गात् स्मार्यते।

एवं वा—विकृतिविशेषे कानिचिदप्राकृतानि स्तोत्राणि विहितानि। तेषु च यूपावटावस्तरणबर्हिर्न्यायेन न प्राकृतानां यथान्तरादिसाम्नामृचां वा प्राप्तिः, प्राकृतस्तोत्रविशेषेष्वेव तेषां

निबद्धत्वात्। तत्प्रकरणे चेदं श्रुतम्—'यदृचा स्तुवते तदसुरा अन्ववायन् यत्साम्ना स्तुवते तदसुरा नान्ववायन् तस्मात् य एवं विद्वान् साम्ना स्तुवीत' इति। तत्र ऋक्छन्दोऽप्रगीतऋक्परः। प्रगीतायास्सामविधिनैव प्राप्तेः। न हि ऋगाभयत्वं विना साम्नस्स्तोत्रसाधनता सम्भवति। स्तोभानामर्थशून्यत्वेन तदाश्रितानृक्साम्नां गुणाभिधानरूपस्तोत्रसाधनत्वासम्भवात्। अतस्तत्र प्रगीताप्रगीतऋचोर्विकल्पेन साधनता उत प्रगीताया एवेति चिन्तायां—

अन्तिमस्याख्यातस्य यच्छब्दोपबद्धत्वेन सामविधायकत्वाभावात् आद्ययोरेवाप्राप्तार्थत्वादिना लेट्त्वनिश्चयात् ऋक्सामयोरुभयोरपि विधिः। अर्थाच्च तुल्यकार्यत्वसिद्धौ विकल्पः। न चासुरागमनेन ऋचो निन्दितत्वात् कथं तद्विधिः, निषेधैकवाक्यतां विना निन्दात्वस्यैवाप्रतीतेः। अतो अत्यन्तदुराराध्यानामपि ऋचा वशीकरणात् विध्येकवाक्यतयाऽस्य स्तुतित्वमेवेति प्राप्ते—

वाक्यभेदविषमशिष्टविकल्पादिदोषभिया यच्छब्दोपबद्धस्यापि लिङ एव सामविधायकत्वं न तु लट्त्वेन सन्दिग्धयोः। एवं च साम्न एवेयं सर्वा स्तुतिः। ऋङ्निन्दाऽपि न हि निन्दान्यायेन विधेयसामस्तुत्यर्थैवेति तस्याः प्रगीताया एव साधनत्वम्। इदं चाधिकरणं यत्र स्तोत्रावान्तरप्रकरणे साम, तद्योनिरुत्तराश्च न पाठिताः तद्विषयम्। इतरत्र साम्नः ऋचां च प्रकरणादिनैवाङ्गत्वोपपत्तेः सामविधिवैयर्थ्यात्। अत एव प्रकृतोदाहरणे साम्ना इत्येकवचनोपादानात् एकमेव सामसाध्यभेदादानेयम्। ऋक्च तत्र योनिरूपैव। 'एकं साम तृचे क्रियते

यद्योर्म्यां गायति' इत्यादेर्दीक्षणीयावाङ्नियमन्यायेन प्राकृततत्तत्स्तोत्रीयर्चामेवोद्देशेनाप्राकृते अप्रवृत्तेः। ऋतुगतप्राकृतचतुस्स्तोत्रत्वादिगुणानुरोधात्तु एकस्या एव प्रगीताया ऋचस्तावद्भ्यासः।

मन्वेवं यत्राप्राकृतस्तोत्रावान्तरप्रकरणे योनिरुत्तरा चाम्नाता तत्रोत्तरयोस्साम्नि प्रमाणाभावः। यत्र च संज्ञादिभिन्नं स्तोत्रान्तरमुपात्तं न च प्रकरणे ऋचः पठिताः न वा प्रकृतोदाहरणवत् सामविधिस्तत्र स्तोत्रविध्यन्यथानुपपत्त्या ऋचामानयनेऽपि सामानयने प्रमाणाभावः। अथ तत्र प्रगीतमन्त्रसाध्यगुणाभिधानस्यैव स्तोत्रतया स्तोत्रविध्यन्यथानुपपत्त्यैव सामानयनम्, ततोऽत्रापि तत एव सामप्राप्तेः 'साम्ना स्तुवीत' इति विधिवैयर्थ्यापत्तिरिति चेत् 'साम्ना स्तुवीत' इत्यस्यानारभ्याधीतत्वेन प्रकृतावानर्थक्येनानिवेशे सर्वत्रैव विकृतावप्राकृतस्तोत्रविषये सामविधायकत्वोपपत्तेः भाष्यकारादिलेखनस्वारस्यादस्य विकृतिविशेषप्रकरणपठितत्वाङ्गीकारे तु नायं वस्तुतस्सामविधिः; अपि तु स्तोत्रपदशक्तिग्राहकयाज्ञिकप्रसिद्ध्युपोद्बलकस्सन्नुवाद एव, अप्राकृतस्तोत्रविधिस्तुत्यर्थः एकत्वविधानार्थो वेति ध्येयम्॥

एतदस्वरसादेव वर्णकान्तरं--क्वचित्कर्मविशेषे 'अयं सहस्रमानवः' इतीयं ऋक् प्रगीता अप्रगीता च पठिता। पुनश्च 'अयं सहस्रमानव इत्येतया आहवनीयमुपतिष्ठते' इत्यनेन विनियुक्ता। सा द्विविधायाः पठितत्वात् द्विविधाऽपि विकल्पेन विनियुज्यत इति प्राप्ते—

अप्रगीतायाः प्रगाणार्थ एव पाठः। न ह्यनवधारितस्वरूपायां सुखं गानमर्थावबोधो वा सम्भवति। प्रगीता त्वन-

म्यार्थी प्रयोजनमपेक्षमाणोपस्थाने विनियुज्यत इति सैव ग्राह्या। योऽप्रगीताया एव शाखान्तरे पाठः सोऽपि तत्पुरुषान् प्रति ऋक्स्वरूपज्ञानार्थ एवेति न शाखान्तरीयप्रगाणाख्यसंस्कार-विरोधः ॥

एवं वा—साममन्त्रप्रसङ्गात् ऋग्यजुर्मन्त्रयोस्स्वराश्चिन्त्यते—ते हि क्वचित् उदात्तानुदात्तस्वारितप्रचयरूपचातुस्स्वर्येणाधीताः। क्वचित्त एव शाखान्तरे प्रचयवर्जं त्रैस्वर्येण। तत्रोभयोरपि गीतिप्रकारवद्विकल्प एव। न च 'तानो यज्ञकर्मण्यजपन्यूङ्खसामसु' इति स्मृत्या तानस्वरस्य विहितत्वादुभयबाध इति वाच्यं, श्रौतानामध्ययनविध्यध्यापितानां स्वराणां पाठादिना तत्तत्क्रत्वपूर्वसाधनीभूतमन्त्रवृत्तित्वस्य प्रबलप्रमाणप्रमितत्वेन स्मृत्या बाधायोगात्। अन्यथा 'अग्निर्मूर्धा' इत्यादीनां स्मृत्या नवग्रहाङ्गभौमार्चने विनियोगात् क्रमादिना आग्नेयाद्यङ्गत्वानापत्तेः। न चैवं नवग्रहहोमाङ्गत्वानापत्तिः, सौर्याकांक्षयैव नवग्रहहोमाकांक्षयैव वा वाक्येन विनियोगोपपत्तेः। प्रकृते तु श्रौतस्वराविरोधात् तानस्मृतेरप्रामाण्यमेवेति प्राप्ते—

श्रौतस्य स्वरस्याध्ययनविधिनाऽध्यापितस्य प्रयोजनापेक्षायां 'यद्यच्छक्नुयात् तत्तत्कुर्यात्' इत्युपबन्धेन प्रकरणादिसहकृतमन्त्रवृत्तिपाठेन च प्रयोजनद्वयमवगम्यते एकं तावत् प्रयोगकालात्पूर्वमेवार्थविशेषनिर्णायकत्वम्। न च मन्त्राणां प्रयोगकाल एवार्थस्मारकत्वात् पूर्वमर्थविशेषावधारणाभावेऽपि बाधकाभावः, विध्यवगतस्याप्यर्थविशेषस्य प्रयोगकाले मन्त्रप्रतिपाद्यत्वसन्देहेप्रयोगप्राशुभावभङ्गापत्तेः। अतस्तदर्थं प्रयोगाद्बहिरेव मन्त्रार्थनिर्णयार्थं, 'बहुव्रीहौ प्रकृत्या पूर्वपदं' इत्यादि-

स्वरोपयोगः। अपरं च पूर्वमवधारितस्याप्यर्थस्य प्रयोगमध्ये विस्मरणे पुनर्निर्णायकता। तस्य च कादाचित्कत्वेऽपि मन्त्रनैयत्यवदेव स्वरनैयत्योपपत्तिः; मन्त्रोच्चारणवदेव च स्वरोच्चारणसिद्धेर्न स्वरानुसन्धानमात्रेण निर्णायकता।

तदेवं द्विविधः स्वरस्य क्रतूपयोगः प्रकरणादिना सिद्ध्येत्। तत्र च विशेषरूपेण स्मृत्या यज्ञप्रयोगे तानस्वरविधायिकया बाधात् सामान्यरूपस्य प्रकरणादेः प्रयोगबहिर्भूतार्थनिर्णयोपयोगित्वविषयतैव कल्प्यते। प्रयोगमध्ये विस्मरणादौ तु स्वरानुसन्धानेनैवार्थविशेषस्मरणम्। अत्र च तानस्यार्थविशेषोपयोगाभावेनादृष्टार्थत्वेऽपि एकमन्त्रवृत्तित्वादेव त्रैस्वर्यादिबाधकता। इतरथा गुणानुरोधेन मन्त्रावृत्त्यापत्तेः। अज्ञपेत्यादिना पर्युदासाच्च जपादौ त्रैस्वर्यादिप्रतिप्रसवः। जपाः जपतिचोदनाचोदिता मन्त्राः। न्यूङ्खाः शस्त्रेषु मन्त्रविशेषाः॥ ७॥

(८)—सामप्रदेशे विकारस्तदपेक्षस्स्याच्छास्त्रकृतत्वात्॥ ३२॥ वर्णे तु बादरिर्यथाद्रव्यं द्रव्यव्यतिरेकात्॥ ३३॥

एवं सामोहोपोद्घातं सप्रसङ्गं निरूप्याधुना सामोहो निरूप्यते। 'कवतीषु रथन्तरं गायति, यद्योन्यां गायति' इत्यादौ यत्र सामातिदेशः तत्र साम्न ऋगक्षराभिव्यक्त्यर्थत्वात् यत्र स्थाने योनौ एकाद्यक्षरसंस्कारिका आईभावादिरूपा गीतिश्श्रुता तत्र स्थानान्तरे यत्रैवैकारपाठ उत्तरादौ तत्रैव आईभावरूपा गीतिरूहितव्या, न तु प्राकृतस्थानपठिताक्षरा-

न्तरे कर्तव्या, तत्र गीतेस्तदक्षराभिव्यञ्जकत्वासम्भवेनाराद्उपकारकत्वप्रसङ्गात् । आईभावो हि प्रकृतौ अवर्णेवर्णात्मकस्य सन्ध्यक्षरस्यैकारस्य विश्लेषरूपसंस्कारार्थः । न हि एकारो नाम वर्णान्तरं, प्रमाणाभावात् अपितु स्मृतिसहकृतप्रत्यक्षेणावर्णेवर्णात्मक एव । अतश्च तद्विश्लेषकस्य आईभावस्य तत्स्थानपठिताक्षरविश्लेषकत्वासम्भवात् यत्रैवोत्तरादावेकारस्तत्रैवाईभावः कार्यः ।

यद्यपि चायं विश्लेषादिरूपः संस्कारो नार्थाभिधानोपयोगितया दृष्टार्थः, तद्व्यतिरेकेणैव सन्ध्यक्षरेणार्थाभिधानस्य जायमानत्वात् । तथाऽपि गानसंस्कृतमन्त्रजन्यगुणाभिधानव्यक्तेरेव स्तोत्रतया स्तोत्रत्वसिद्ध्यर्थतयैवोपयुज्यते । न चैवं न विश्लेषादिरूप एव संस्कारः प्रमाणाभावादननुगमाच्च । न हि विश्लेष एव सर्वत्र संस्कारः 'ए इ ऐ ई इत्येतानि तालव्यम्' इति स्मृत्या ईकारयोरपि तालव्यत्वात् 'तालव्यमाईयद्वृद्धम्' इति स्मृत्या च तत्रापि आईभावविधानेन तत्र सन्ध्यक्षरत्वाभावेन विश्लेषासम्भवात् । अतस्सर्वानुगतो वर्णान्तरागमेन पूर्वाक्षरपरिलोप एव संस्कारस्तोत्रत्वघटकः । तस्य चैकारस्थानस्थितवर्णान्तरेऽपि सम्भवान्नोहसिद्धिरिति वाच्यम् । तथात्वेऽपि संस्कार्यतावच्छेदकस्यैकारत्वस्याक्षरान्तरेष्वभावेनोहोपपत्तेः ।

वस्तुतस्तु—परिलोपाख्यसंस्काराङ्गीकारे श्रुतस्य वर्णस्य स्तोत्रसाधनत्वानापत्तेर्लोपस्य क्वापि संस्कारत्वादर्शनाच्च विश्लेषादिरेव सामगप्रसिद्धोऽननुगतोपि संस्कार इति सिद्ध ऊहः । एवं च प्रधानभूतोत्तरादिऋगक्षरानुरोधेन यत्र ऋगक्षरा-

ल्पत्वं तत्रावशिष्टगीतेर्लोपः । यत्र वा ऋगक्षराधिक्यं तत्र गीतिविशेषस्यावृत्तिः इत्याद्यापद्यमानमपि न दुष्यति ॥ ८ ॥

(९)—स्तोभस्यैके द्रव्यान्तरे निवृत्तिमृग्वत् ॥ ३४ ॥ सर्वातिदेशस्तु सामान्यालोकवद्विकारस्स्यात् ॥ ३५ ॥ अन्वयं चापि दर्शयति ॥ ३६ ॥ निवृत्तिर्वाऽर्थलोपात् ॥ ३७ ॥ अन्वयो वा अर्थवादस्स्यात् ॥ ३८ ॥

साम्नः कश्चिदंशो ऋगक्षराधिरूढः कश्चिच्च स्तोभाक्षराधिरूढः । प्रजापतिहृदयादौ स्तोभाक्षराधिरूढ एव । तत्र सामातिदेशे स्तोभानामप्यतिदेशो भवेन्न वेति चिन्तायां—

साम्न ऋगक्षराभिव्यक्त्यर्थत्ववत् स्तोभाक्षराभिव्यक्त्यर्थत्वस्य तुल्यत्वात् गुणानुरोधेन प्रधानभूतानामृचामिव स्तोभानामपि नातिदेशः । न च स्तोभानां प्रायशोऽनर्थकत्वात् स्तोत्रसाधनत्वासम्भवेन निष्प्रयोजनानां प्राधान्यानुपपत्तेर्गीतिकालपरिच्छेदकत्वेन गीत्यङ्गत्वात् तदतिदेशे अतिदेशोपपत्तिरिति वाच्यम् । अग्निष्टपतीत्यादिभाष्यकारोक्तस्तोभाक्षराणां ऋगेकवाक्यत्वासम्भवेऽपि स्यात्रचेणैव गुणाभिधानरूपस्तोत्रकरणत्वसंभवेन ऋग्वदेव प्राधान्योपपत्तेः । येषामपि हुंफडादिस्तोभाक्षराणामर्थशून्यत्वं तत्रापि तदुच्चारणस्यादृष्टद्वाराऽनुष्ठानसादेश्यात् प्रधानऋगङ्गत्वं, प्रकरणादिना स्तोत्राङ्गत्वमेव वेति न सामाङ्गत्वकल्पनावसरः । न च साम्नो वाऽदृष्टार्थत्वं, स्तो-

भानां वेत्यत्र नियामकाभावः । साम्नोऽशे दृष्टार्थत्वमंशे चादृष्टार्थत्वमित्येवंविधवैरूप्यापत्तेरेव नियामकत्वादिति प्राप्ते—

'यज्ञायज्ञियेन स्तुवीत' इत्यादौ तत्र तत्र साम्नां सामान्यतो विशेषतश्च विनियोगस्यैव नियामकत्वेन सामोच्चारणस्यैव तदंशे अदृष्टार्थत्वं, स्तोभानां त्वर्थशून्यानां गीतिकालपरिच्छेदकत्वेन दृष्टार्थत्वमेव । अन्यथा हि साम्नः प्रकरणादिनैव सर्वस्यापि विवक्षितार्थस्य लाभे विनियोगविधिवैयर्थ्यापत्तिः । अतो विनियोगवशेन झडिति प्रयोजनलाभे द्वारभूतादृष्टस्यापि तत्रैवेति झडिति कल्पना, न तु स्तोभेषु; स्तोत्रादिरूपद्वारिसम्बन्धकल्पना सोपक्षत्वात् । अतस्स्तोभादीनां गीत्यङ्गत्वात् तदतिदेशेनातिदेशोपपत्तेर्न तदंशस्य लोपाख्योऽन्यथाभावः । अर्थवत्स्तोभाक्षरेषु तु ऋगक्षरवदेव स्तोत्राद्युपयोगोपपत्तेः गीतेरेव तदङ्गत्वमिति तु प्रतिभाति । अत एवानर्थकस्तोभेषु ऋक्सत्वे साम्नः आश्रयिकर्मत्वं तदभावे शुद्धादृष्टार्थत्वमेव ॥ ९ ॥

(१०)—अधिकं च विवर्णं च जैमिनिः स्तोभशब्दत्वात् ॥ ३१ ॥

प्रसङ्गात् स्तोभलक्षणमुच्यते । ये अक्षरेभ्यो ऋगर्थाभिधानोपयोगिभ्योऽधिका ऋगक्षरविलक्षणा वर्णास्ते स्तोभाः । अत्र ऋगक्षरेभ्योऽधिकत्वेऽपि श्वाद्रिश्श्वाद्रिरित्यभ्यासे ऋगक्षरविलक्षणत्वाभावात् अन्त्यं विशेषणम् । ओ म्रा ई इत्यादिविकारे ऋगक्षरविलक्षणत्वेऽपि आधिक्याभावादाद्यम् ।

वस्तुतस्तु—विलक्षणत्वस्यार्थानभिधायकत्वरूपत्वे अर्थाभिधायकेषु अग्निष्टपतीत्यादिस्तोभेष्वव्याप्तेरन्यस्य च विलक्षण-

त्वस्य निर्वक्तुमशक्यत्वात् यत्राभियुक्तानां स्तोभ इति प्रसिद्धिः ते स्तोभाः । स्तोभत्वं च मन्त्रत्वादिवदेवाखण्डोपाधिरिति न शक्यतावच्छेदकाप्रसिद्धिः । अत्र च ये अर्थवन्तस्स्तोभाः तेषां ऋङ्मन्त्रवदेव गुणनिष्ठगुणाभिधानजनकत्वादेव प्रामाण्यम् । गुणाभिधानस्य चादृष्टार्थत्वेऽपि ज्ञानस्य स्वतः प्रमाणत्वात् दोषाभावेन चाप्रामाण्यायोगात् विषयासिद्धेः प्रमाणत्वाविघातो ऋग्वदेव नानुपपन्नः ॥

यदि तु देवताविग्रहादिप्रसङ्गभिया तात्पर्यविषयीभूतस्यैवार्थस्य सिद्धिः । प्रकृते तु सदृष्टान्तं गुणाभिधानस्यादृष्टार्थत्वान्न तात्पर्यकल्पना अपि त्वाहार्यज्ञानजनकत्वमेव तदाऽस्तु पदार्थविधया प्रामाण्यं अनर्थकस्तोभाक्षरवत् । अथ वा सर्वत्रैवमादिस्थले प्रामाण्याभावेऽपि प्रयोजनवत्त्वमात्रेण स्वाध्यायविधेरुपयोगः । न हि वेदत्वावच्छेदेन प्रामाण्यमिति राजाज्ञा 'वेदोऽखिलो धर्ममूलम्' इति मूलपदस्य जनकत्वज्ञापकत्वोभयसाधारण्येनाप्युपपत्तेः ॥ १० ॥

(११)—धर्मस्यार्थकृतत्वाद्द्रव्यगुणविकारव्यतिक्रमप्रतिषेधे चोदनानुबन्धः समवायात् ॥ ४० ॥

तदेवं त्रिविधस्याप्यूहस्य प्राकृतदेवतादिस्थानापन्न एव वैकृतदेवतादौ प्रसक्तेः स्थानापत्तेरिदानीं निरूप्यते । तत्र मूले तत्कार्यकारित्वरूपां स्थानापत्तिमङ्गीकृत्य तस्याः पञ्चविधत्वमुक्तम् । यद्यपि च सर्वत्र विधिरेव स्थानापत्तौ बीजं, तथाऽपि तत्सहकारीणि पञ्चेति पञ्चविधत्वम् । प्रत्यक्षादनुमानात्

श्रुतस्वशब्दात् प्रतिषेधार्थानुमितस्वशब्दात् अभावे विध्यनुमितप्रतिषेधकल्पितस्वशब्दादिति।

तेषां चोदाहरणानि 'नैवारश्चरुः' इति नीवाराणां व्रीहिकार्यकारित्वं प्रत्यक्षात्। न च नैवार इति विकारार्थतद्धितरूपस्वशब्दादेव तदिति शङ्क्यं, तस्य सम्बन्धसामान्यवाचित्वेनाप्युपपत्तौ चरोर्नीवारविकृतित्वस्य प्रत्यक्षाधीनत्वात्।

तथा 'नखावपूतश्चरुर्भवति' इत्यत्र नखानामुलूखलमुसलस्थानापन्नत्वमनुमानात्—नखानां हि आवपनमेव प्रत्यक्षेण कार्यमवधार्यते उलूखलमुसलयोश्चावघातः। आवपनावघातयोश्चैकवितुषीभावकार्यत्वात् तत्साधनयोरप्येकवितुषीभावप्रयोजनकत्वमनुमेयमेव।

तथा पाशुकचातुर्मास्येषु 'परिधौ पशुं नियुञ्जीत' इति श्रुतस्य परिधेः यूपकार्यकारित्वं श्रुतस्वशब्दादेव। न ह्यत्राप्राकृतनियोजनान्तरविधिः विशिष्टविध्यादिगौरवापत्तेः।

तथा 'न गिरागिरा' इति निषेधानुवादबलात् गिरापदकार्यवाचिस्वशब्दानुमानेनेरापदस्य गिरापदस्थानापन्नत्वम्।

तथा 'संस्थिते षडहे मध्वाशयेत् घृतं वा' इत्यत्र षडहाभावे मध्वशनादिविधिना षडहप्रतिषेधमनुमाय तेन षडहकार्यवाचिस्वशब्दानुमानेन षडहस्थानापन्नत्वं मध्वशनादेः। इदं च भाष्यकारोक्तमपि कृत्वाचिन्तयोदाहृतमिति मन्तव्यं, षडहसमाप्त्युत्तरं तदङ्गत्वेनात्र मध्वशनविधानेन षडहाभावे मध्वशनविधौ प्रमाणाभावात्।

स्थिरोदाहरणान्तरं मृग्यमित्युक्तम्। अत्र प्रतिभाति—न तावत् तत्कार्यकारित्वं तत्स्थानापन्नत्वं, ब्रह्मवर्चसादिफलस्य

सौम्यादिकरणस्य च स्वर्गाग्नेयादिकार्यकारित्वाभावेन स्थानापत्त्यनापत्तेः । न चेष्टापत्तिः, 'अगन्म सुवः' इत्यादौ यागानुमन्त्रणादौ चोहानापत्तेः । 'सूर्यस्याहं देव यज्यया' इत्यादियागानुमन्त्रणे यज्यापदे पदान्तरप्रक्षेपरूपभाक्तोहाभावेऽपि यागान्तरपरत्वेन अन्यथाभावात्मकस्य मुख्यस्योहस्य तादवस्थ्यात् । चरुनीवारनखादीनामवान्तरकार्यभेदेन स्थानापत्त्यनापत्तेश्च ।

तथोदाहरणान्यप्ययुक्तानि । तथा हि—नीवाराणां चरुविशेषजनकत्वस्यान्वयव्यतिरेकाभ्यामनुमेयत्वेन प्रत्यक्षाविषयत्वात् । न हि साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वादिरूपप्रत्यक्षायोग्यपदार्थघटितव्याप्तिघटितजनकत्वस्य लौकिकप्रत्यक्षं सम्भवति । अलौकिकप्रत्यक्षं तु नखादावपि तुल्यम् । किञ्चैवं नखेष्वप्युलूखलमुसलप्रयोज्यवितुषीभावप्रयोजकत्वस्य प्रत्यक्षत्वापत्तिः । तृतीयोदाहरणेऽपि यद्यपि परिधेः पशुनियोजनसाधनत्वं श्रुतं, तथाऽपि नियोजनस्य यूपीयत्वं न श्रुतमिति न यूपकार्यकारित्वस्य श्रुतस्वशब्दगम्यता । चतुर्थे तु गिरापदस्याग्निष्टोमस्तोत्रसाधनत्वाभावेन तत्कार्यस्यैवाप्रसिद्धेरर्थाभिधानमात्ररूपकार्यस्य च गीत्यादिधर्मग्राहित्वाभावात् सत्यपि तन्निवर्तकत्वे इरापदस्य नैव तत्कार्यापत्तिरित्युक्तमेव । पञ्चमेऽपि सत्यामपि षडहादिकार्यापत्तौ अभावे विधिनैवाशक्त्यादिना तदकरणे स्वशब्दमात्रकल्पनया तत्कार्ये मध्वशनादिविध्युपपत्तेः प्रतिषेधानुमानवैयर्थ्यम् ।

अतो मूलोक्तप्रकारानुपपत्तेरेवं वाच्यं यस्य पदार्थस्य येन रूपेण यादृशपदार्थाकांक्षापूरकत्वं तेनैव रूपेण तस्यास्तादृशा-

या वा भावनायास्तादृशाकांक्षापूरकत्वं यस्य पदार्थस्य तस्य पदार्थस्य तत्पदार्थस्थानापन्नत्वम् । अस्ति चेदं ब्रह्मवर्चसादौ स्वर्गादेर्हि येन रूपेण भाव्यत्वकरणत्वादिना 'किमस्या भाव्यं करणं वा' इत्यादि भावनाकांक्षापूरकत्वं प्रकृतौ, तेनैव रूपेण तद्भावनासदृशायां सौर्यादिभावनायां ब्रह्मवर्चसादेस्तादृशाकांक्षापूरकत्वात् स्वर्गादिस्थानापन्नत्वसिद्धिः । सौर्यस्य चाग्नेयस्थानापन्नत्वम् । नीवारनखादीनां च—'किमस्य प्रकृतिद्रव्यं; वैतुष्यसाधनीभूतक्रियासाधनं वा' इत्येवमाद्याकांक्षापूरकत्वं तेन तेन रूपेण व्रीहिमुसलादिवदेव समानमिति तत्स्थानापन्नत्वसिद्धिः । षडहस्य च येन रूपेण यस्यामेव भावनायां यादृशाकांक्षापूरकत्वं तस्यामेव तेन मध्वशनस्येति तस्यापि तत्स्थानापत्तिः कृत्वाचिन्तया न विरुद्ध्यते ।

ईदृशस्थानापत्तिघटकं च भाव्यत्वादिकं रूपं पञ्चधाऽवगम्यते । क्वचिदनुमानात् क्वचिच्छक्तस्वशब्दात् क्वचिल्लाक्षणिकात् क्वचित्प्रतिषेधानुमितात् क्वचिदभावेविध्यनुमितात् । तत्राद्योदाहरणं नीवाराः । अनुमानप्रकारश्च—नीवाराः प्रदेयचरुप्रकृतिभूताः चर्वन्वयव्यतिरेकानुविधायकान्वयव्यतिरेकवत्त्वे सति समवायित्वात् सामान्यमुखव्याप्त्या मृत्पिण्डवदिति । नखेष्वपि चैवमेवानुमानप्रकारो बोध्यः—नखा वैतुष्यप्रयोजकाः वैतुष्यान्वयव्यतिरेकानुविधायकान्वयव्यतिरेकवत्त्वात्, कुलालपितृदण्डत्वादिवत् । द्वितीयोदाहरणं तु—परिधिरेव यूपोपयत्वस्य शक्तशब्दगम्यत्वाभावेऽपि परिधिजन्यत्वस्य तद्गम्यत्वात् । तृतीयोदाहरणं 'शरमयं बर्हिः' इत्यत्र बर्हिःपदेन तत्कार्यलक्षणात शराणां बर्हिस्स्थानापन्नत्वम् । चतुर्थोदाहरणं 'ऋधक्सोमस्वस्तये' ादिऋचां प्रकृतौ बहिष्पवमानस्तोत्रे कल्पकार्याणां उपहव्या

ख्याविकृतौ अतिदेशेन प्राप्तौ 'न सोमेति ब्रूयात् इन्दो इति ब्रूयात्' इति निषेधानुवादबलेनेन्दुपदस्य सोमपदस्थानापन्नत्वम्। एवं 'न मित्रस्येति ब्रूयात् यज्ञस्येति ब्रूयात्' इत्याद्यपि वैकृतमुदाहर्तव्यम्। पञ्चमं तु निषेधकल्पनाभावेऽपि कृत्वाचिन्तया तदेव। स्थिरोदाहरणं 'यदि दीक्षितानां साम्युत्तिष्ठेरन् सोममपभज्य विश्वजिता यजेत यस्सत्रायागुरते स विश्वजिता यजेत' इत्यादौ; सोमाद्यभावे वैश्वानरेष्ट्यादौ बोध्यम्। तत्र च स्थानापत्तिसत्वेऽपि न सत्रादिधर्मप्राप्तिः, अङ्गापेक्षायामङ्गघटितसादृश्यस्यैव पुरस्स्फूर्तिकत्वेन स्थानापन्नयतिदेशापेक्षया चोदनालिङ्गातिदेशस्यैव बलवत्त्वात् ॥ ११ ॥

(१२)—तदुत्पत्तेस्तु निवृत्तिस्तत्कृतत्वात् स्यात् ॥ ४१ ॥ आवेक्ष्येरन् वाऽर्थवत्त्वात्संस्कारस्य तदर्थत्वात् ॥ ४२ ॥ आख्या चैवं तदावेशाद्विकृतौ स्यादपूर्वत्वात् ॥ ४३ ॥

परिधौ पुनराक्षिप्य समाधीयते। न परिधेर्यूपस्थानापन्नत्वं 'परिधौ पशुं नियुञ्जीत' इत्यत्र परिधेर्नियोजनानुवादेन विधावतिप्रसङ्गापत्तेः पशुनियोजनानुवादेन विधौ विशिष्टोद्देशापत्तेः नियोजनान्तरस्यैवाप्राकृतस्य विधेयत्वात्। अस्तु वा स्थानापत्तिः तथाऽपि न परिधौ यूपधर्माः, सत्यपि परिधेः पशुनियोजनं प्रति सप्तम्याऽङ्गत्वे पुरोडाशकपालन्यायेनाग्निपरिधानप्रयुक्तस्यैव परिधे पशुनियोजनशेषत्वेन तत्प्रयुक्तत्वाभा-

वात् धर्माणां चापूर्वीयपशुनियोजनप्रयुक्ताधिकरणार्थत्वेन तद्-प्रयुक्ताधिकरण परिधावसम्भवात्।

न च गौरवेण प्रयुक्तत्वस्य नोद्देश्यतावच्छेदककोटिप्रवेशः, शेषत्वसाधनत्वसम्बन्धित्वापेक्षया प्रयुक्तत्वस्यापि तदघटितत्वेन लघुत्वात्। किञ्चादृष्टघटिते यूपस्वरूपे वैयर्थ्याभावात् धर्माणां छेदनादीनां यूपोत्पत्त्यर्थत्वमेव न त्वपूर्वीयसाधनविशेषार्थत्वं आधानवत्।

न च परिधौ यूपत्वमस्ति; तद्धि दृष्टादृष्टसंस्कारसमुदायो वा स्यात्, तावत्संस्कारजन्यादृष्टान्तरं वा; तद्विशिष्टं काष्ठं वा. सर्वथा न परिधौ तत्सम्भवः। परिधानप्रयुक्तधर्माणामपि सत्त्वकत्वादीनां तत्रावश्यकत्वस्य वक्ष्यमाणत्वेन जोषणादीनां यूपधर्माणां बाधावश्यंभावेन तावत्संस्कारसमुदायासम्भवात्। न हि यूपशब्दः प्रत्येकमेकैकसंस्कारवाची, अनेकशक्तिकल्पनापत्तेः। कतिपयसंस्कारयुक्ते यूपशब्दप्रयोगाभावाच्च। 'यूपं छिनत्ति' इत्यादेस्तत्तत्संस्कारेण 'यूपं सम्पादयेत्' इत्यर्थाङ्गीकारेण समुदायादिघाचित्वेऽप्युपपत्तेः। अन्यथा एकैकसंस्कारस्यापि यूपत्वे तज्जनकच्छेदनादीनां विकल्पापत्तेः। अतो यूपत्वोत्पादकानां धर्माणामर्थलोपादेव परिधावसम्भव इति प्राप्ते—

न तावत्स्थानापत्त्यसम्भवः, सत्यपि नियोजनान्तरविधौ प्राकाशाध्वर्युदानवत् प्राकृतनियोजनकार्य एव तद्विधानेन तदुपपत्तेः।

वस्तुतस्तु—यावदतिदेशेन प्राप्यते तावत्पूर्वमेव परिधिविशिष्टप्राकृतनियोजनस्यैव परिधिप्राप्तिफलकतया पशूद्देशेन विधानोपपत्तेः स्थानापत्त्यविरोधः। न च धर्मासम्भवः, उद्दे-

श्यस्वरूपे आनर्थक्यप्रसक्तौ शास्त्रस्य महाविषयत्वसिद्ध्यर्थम् पूर्वसम्बन्धित्वस्यैवोद्देश्यताघटकत्वात् । सम्बन्धित्वं सम्बद्धाविति प्रतीतिसाक्षिकस्सकलतत्तत्सम्बन्धत्वव्यापकोऽखण्डोपाधिरूपो धर्मः | तेन तत्तत्सम्बन्धान्यतमत्वरूपतया सम्बन्धत्वस्य न गुरुभूतत्वाशङ्का; वक्ष्यते चैतत् 'अगन्म' इत्यादिमन्त्रस्यापूर्वार्थत्वसिद्ध्यर्थमुत्तराधिकरणे ।

यत्तु छेदनादीनां यूपत्वोत्पादकतया नायूपे परिधौ धर्मप्राप्तिरिति । तत्र पार्थसारथिः—"त्वदुक्तरीत्यैव यूपशब्दस्य दृष्टादृष्टसंस्कारसमुदाये शक्तिः । न तु तावत्संस्कारजन्यादृष्टान्तरे; प्रमाणाभावात् । तावत्संस्काराणामेव च नियोजनाङ्गत्वं; अतश्च परिधिखलेवाल्यादौ कतिपयधर्मबाधेऽपि धर्मान्तरकरणं नानुपपन्नम्" इति ।

तन्न—समुदायस्यातिरिक्तत्वे तस्यैव नियोजनाङ्गत्वापत्तेः संस्काराणां समुदायोत्पादकत्वापत्तौ परिध्यादौ तदभावेन धर्मप्राप्त्यनापत्तेः । अनतिरिक्तत्वे शक्यतावच्छेदकभेदेनानेकशक्तितादवस्थ्यात् । इतरथा लक्षणोच्छेदापत्तेः । अतो लाघवादाहवनीयादिपदवदेवादृष्टान्तरे तद्विशिष्टकाष्ठ एव वा यूपपदस्य शक्तिः । तच्चादृष्टं नोच्छ्रयणाञ्जनादिसकलसंस्कारजन्यं; अपि तु यूपाहुत्याद्यङ्गकच्छेदनजोषणाष्टाश्रीकरणजन्यमेव । अत एव याज्ञिकानां दीक्षाकाले तावतामेवापकर्षः ।

युक्तं चैतत् । दीक्षासु 'यूपं छिनत्ति' इत्यत्र यूपोत्पत्त्यनुवादेनैव दीक्षाकालविधानात् । इतरथा यूपच्छेदनोद्देशेन तद्विधाने वाक्यभेदात् । उच्छ्रयणादीनां तु अग्निसंमार्गन्यायेनोत्पन्नयूपसंस्कारकत्वादपूर्वसाधनीभूतपशुनियोजनाधारत्वलक्षणा-

वश्यंभावेनायूपे परिध्यादावपि प्राप्त्युपपत्तिः । उच्छ्रयणमात्रं परमर्थलोपादिना निवर्तते । न चैवं 'यूपायाज्यमानाय' इति मन्त्रे ऊहापत्तिः, भवन्मतेऽपि समानत्वात् । 'परिधये अज्यमानाय' इत्यायूहस्येष्टापत्त्यैव सुपरिहरत्वाच्च । सूत्रस्य ऊहपरत्वेनापि व्याख्यानसम्भवात् ॥ १२ ॥

(१३)–परार्थेन त्वर्थसामान्यं संस्कारस्य तदर्थत्वात् ॥ ४४ ॥ क्रियेरन्वाऽर्थनिर्वृत्तेः ॥ ४५ ॥

अभ्युदितेष्टौ दधिशृतयोः प्रदानार्थत्वात् प्रदेयधर्मास्सायंदोहादयो भवन्त्येव । तण्डुलश्रपणसाधनत्वस्यापि तु 'सह श्रपयति' इति विधिबलेनार्थसिद्धत्वादसत्यपि तत्प्रयुक्तत्वे तच्छेषत्वे वा साधनत्वसम्बन्धेनापूर्वसम्बन्धिश्रपणसम्बन्धित्वस्य सत्त्वात् दधिशृतयोः प्रणीताधर्मा अपि उत्पवनप्रणयनादयो भवन्ति । न हि धर्मसम्बन्धे उद्देश्यस्यापूर्वशेषत्वमपि प्रयोजकं, गौरवात् । अपि तु शास्त्रस्य महाविषयत्वसिद्धये अपूर्वसम्बन्धित्वमेव । अत एव 'अगन्म' इत्यादिमन्त्रस्याप्यपूर्वसाध्यफलार्थत्वम् । स च सम्बन्धः प्रकृते श्रपणसाधनत्वाख्यस्समस्त्येव ।

ननु दधिशृतयोस्तण्डुलश्रपणसाधनत्वेऽपि न प्रणीताधर्मप्राप्तिः, प्रणीतानां हि संयवनार्थत्वेन विनियोगात् । प्रकृते च संयवनाभावेन तदनुपपत्तेः । अत एव सौर्यादिचरुष्वपि बहिरूष्मणा पाकाभावात् कपालतद्धर्मनिवृत्तिवत् संयवनाभावात् प्रणीतातद्धर्मनिवृत्तिरेवेति चेत् ।

प्रणीतानां वाक्येन पिण्डसंयवनसाधनत्वावगमेऽपि आनुषङ्गिकहविःपाकसाधनत्वस्यापि सत्त्वात् सौर्यादिचरौ प्रकृते च प्रणीताधर्मोपपत्तेः ।

कृत्वाचिन्तया वाऽयं विचारः । इयं च प्रणीताधर्मप्राप्तिस्सत्यप्यकर्मान्तरत्वे दधिशृतयोः आग्नेयहविश्श्रपणसाधनत्वस्य नैमित्तिकसहश्रपणप्रयुक्तत्वेन नैमित्तिकतुल्यत्वात् फलचमसन्यायेन स्थानापत्त्यैव । न तु व्रीहियवन्यायेनेति ध्येयम् ॥ १३ ॥

(१४)—एकार्थत्वादविभागस्स्यात् ॥ ४६ ॥
निर्देशाद्वा व्यवतिष्ठेरन् ॥ ४७ ॥

ज्योतिष्टोमे 'पृष्टैस्स्तुवते' इत्यनेन षट् पृष्ठस्तोत्राणि विहितानि । तत्र बृहद्रथन्तरसामसाध्ययोः 'बृहद्वा रथन्तरं वा पृष्ठं भवति' इति वचनाद्विकल्पः । तथा नौधसश्यैतससाध्ययोरपि । तथा च नियतानि चत्वारीत्यादि चित्राधिकरणे कौस्तुभे स्पष्टम् । तत्र च रथन्तरपुरस्कारेण केचिद्धर्मा विहिताः । 'रथन्तरे प्रस्तूयमाने सम्मीलयेत् नोच्चैर्गेयम्' इत्यादयः । केचिच्च बृहत्पुरस्कारेण 'बृहति प्रस्तूयमाने समुद्रं मनसा ध्यायेत् उच्चैर्गेयम्' इत्याद्याः । अतः उभयत्रापि साम्नश्शेषित्वमेव न तु निमित्तत्वं उच्चैस्त्वादि प्रायपाठात् । ते किमुभयत्रापि सङ्कीर्णाः उत व्यवस्थिता इति चिन्तायां—

सत्यपि स्तोत्रभेदे तज्जन्यादृष्टस्य लाघवादेकजातीयस्यैव कल्पनादेकापूर्वसाधनीभूतार्थत्वेन धर्माणामवघातादिवत् सङ्करः । न ह्यनयोः प्रयाजानूयाजवत् समुच्चयः येनादृष्टवैजात्यमा-

वश्यकं स्यात्। अत एव विकल्पवचनस्याप्यदृष्टैक्य एव तात्पर्यमित्यपि सुवचम्। अतश्चापूर्वस्यैकत्वात् तत्तत्स्तोत्रसाम्नोश्च स्वरूपेणाप्रवेशाद्युक्तो धर्मसङ्करः।

अत एव रथन्तरस्य 'अभि त्वा शूर' इत्यस्यामृच्युत्पन्नत्वेन शूरादिप्रकारस्य, बृहतश्च 'त्वामिद्धि हवामहे' इत्यस्यामुत्पन्नत्वेन आवाहनादिप्रकारस्य च भेदेऽपि न प्रवेशः। अस्य ऋक्साधनताप्रकारत्वेन सामसाधनताघटकत्वाभावाच्च। न हि ऋगर्थभेदेऽपि साम्नः अक्षराभिव्यञ्जकता भिद्यते। कण्वरथन्तरे प्रकारद्वयस्याप्यभावेन धर्मप्राप्त्यनापत्तेश्च।

अत एव केषुचिद्धर्मेषु रथन्तरस्योपादानं केषुचित् बृहत इति प्रतिनियतनिर्देशाद्रथन्तरत्वादिविवक्षया धर्मव्यवस्थेत्यप्यपास्तम्।

न चैवमपि रथन्तरादिगीतेः ऋगक्षरवृत्त्यंशस्य दृष्टार्थत्वेऽपि स्तोभाक्षरवृत्त्यंशस्यादृष्टार्थत्वात् तददृष्टयोश्च गीतिभेदेन भेदात् तत्तदपूर्वसाधनत्वलक्षणया धर्माणां प्रकृतौ न साङ्कर्यं, कण्वरथन्तरस्य बृहद्रथन्तरस्थानापन्नत्वेन तद्गतस्तोभाश्रितगीत्यंशस्य प्राकृतस्तोभाश्रितगीत्यंशजन्यादृष्टार्थत्वेनैव हिरण्यगर्भमन्त्रन्यायेन कल्पनात् तत्रापि धर्मप्राप्त्युपपत्तिरिति वाच्यं, एवमपि ऋगक्षराधिरूढगीत्यंशे उच्चैस्त्वादिरूपधर्मसाङ्कर्यस्यानिवारणात्।

न च तथाऽपि सामद्वयजन्यनियमादृष्टभेदात् तन्नियमादृष्टसाधनत्वस्यैव च तद्धर्मविधावुद्देश्यतावच्छेदकत्वात् कण्वरथन्तरे च हिरण्यगर्भमन्त्रन्यायेन तद्भेदाभावात् साङ्कर्याद्यनापत्तिरिति वाच्यं, नियमादृष्टस्य नियमजन्यत्वेन सामजन्यत्वाभावात्। तज्जन्यत्वेऽपि वा दृष्टप्रयोजनस्यैवाक्षराभिव्यक्त्या

देः पुरस्स्फूर्तिकतया साधनतद्धर्मप्रयोजकत्वेन नियमादृष्टस्य तत्प्रयोजकत्वाभावात्। इतरथा कृष्णलचरावपि अवघाततद्धर्मप्राप्त्यापत्तेरिति प्राप्ते—

सत्यपि स्तोत्रद्वयजन्यापूर्वैक्ये अवान्तरकार्यभेदात् व्यवस्थासिद्धिः। तथा हि स्तोत्रत्वं तद्वच्चाप्यवैजात्यं वा न तावत्प्रतिगुणाभिधानव्यक्तिविश्रान्तं द्वादशस्तोत्रत्वानुपपत्तेः, अपि तु तत्तत्स्तोमकगुणाभिधानव्यक्तिषु व्यासज्यवृत्ति, तासां च न यौगपद्यं क्षणिकत्वात् क्रमिकत्वाच्च। अतस्तत्तद्गुणाभिधानेभ्यस्संस्काररूपाण्यदृष्टान्युत्पद्यन्ते। तैश्च सकलगुणसमूहालम्बनात्मिका तत्तद्विजातीयस्तोत्रत्वावच्छिन्ना अभिधानव्यक्तिरेका उत्पद्यत इत्यवश्यं वाच्यं, तत्र च विजातीयस्तोत्रजनकतावच्छेदकतया संस्कारेष्वपि वैजात्यावश्यंभावात्, दीक्षणीयावाङ्नियमन्यायेन तत्तत्संस्कारसमूहप्रयुक्ता एव तत्तद्धर्मा इति न प्रकृतौ साङ्कर्यम्।

कण्वरथन्तरे च हिरण्यगर्भमन्त्रन्यायेन तत्तत्संस्कारसमूहद्वयजनकतयैव ऋगन्तरजन्यसप्तदशसङ्ख्याकगुणाभिधानव्यक्तिविधानात् तत्तत्संस्कारसमूहप्रयुक्तधर्मप्राप्त्युपपत्तिरिति सर्वमनाकुलम्॥ १४॥

(१५)—अप्राकृते तद्विकाराद्विरोधाद्द्यवतिष्ठेरन्॥ १८॥

वैश्यस्तोमे 'कण्वरथन्तरं पृष्ठं भवति' इति श्रुतम्। तच्च प्रकृतौ बृहद्रथन्तरयोरेव पृष्ठशब्दसामानाधिकरण्यात् पृष्ठपदसमानाधिकरणसामत्वसादृश्येन होतुः पृष्ठ एव निविशते, न तु मैत्रावरुणादिपृष्ठेषु इति तत्रैव कौस्तुभे स्पष्टम्। अतश्च

बृहद्रथन्तराविकारत्वात् तद्धर्मप्राप्तिरपि पूर्वाधिकरणोक्तरीत्या अविवादैव। सा च किं समुच्चयेनोभयधर्मप्राप्तिः उत विकल्पेनेति चिन्तायां—

स्तोत्रद्वयजनकविजातीयसंस्कारसमूहयोः प्रकृतौ तत्तद्ऋक्सामादिसामग्रीभेदेन विकल्पेनोत्पत्तावपि वैश्यस्तोमे कण्वरथन्तरतदाश्रयभूतऋगादिरूपसामग्र्यैक्येनैकस्मिन्नेव सप्तदशसङ्ख्याकसंस्कारसमूहे तज्जन्यगुणाभिधानसमूहालम्बने वा वैजात्यद्वयाभिव्यक्तौ बाधकाभावात् प्रयोजकद्वयसत्त्वेनाविरुद्धसम्मीलनादिधर्माणां समुच्चयः विरुद्धोच्चैष्ट्वादीनां तु विकल्प इति प्राप्ते—

भाष्यकारेण तावदिष्टापत्त्यैव समाहितम्। वार्तिककारस्तु—पृष्ठद्वयजन्यापूर्वस्यैकजातीयत्वेनातिदेशेनेह प्राप्तौ तत्साधनत्वेन विकल्पेनैव पृष्ठस्तोत्रद्वयस्य तत्साधनीभूतसंस्कारसमूहद्वयस्य च प्राप्तेस्तादृशसाधनत्वेनैव चोपदिष्टयोः कण्वरथन्तरादिसामतदृचोर्विकल्पेनैव तज्जनकत्वम्। न च सामग्रीवशात् वैजात्यद्वयावच्छिन्नोत्पत्तिः, निमीलनादेरपि सामग्रीत्वसम्पादकतया ऋक्साममात्रस्य तदभावात्। न च सम्मीलनादेरपि समुच्चयः, सम्मीलनादिसमुच्चये सामग्रीसत्त्वाद्वैजात्यद्वयावच्छिन्नोत्पत्तिः, तदुत्पत्तौ च प्रयोजकसत्त्वात् सम्मीलनादिसमुच्चय इति इतरेतराश्रयात्। एकव्यक्तौ जातिद्वयाङ्गीकारे साङ्कर्यप्रसङ्गाच्च। अतस्सम्मीलनादीनामैच्छिको विकल्प एवेति ॥ १५ ॥

(१६)—उभयसाम्नि चैवमेकार्थापत्तेः ॥ ४१ ॥
स्वार्थत्वाद्वा व्यवस्था स्यात्प्रकृतिवत् ॥

यत्र संसवगोसवश्येनादौ बृहद्रथन्तरयोः प्रकृतित एव विकल्पे प्राप्ते—'उभे बृहद्रथन्तरे भवतः' इति श्रुतम्। तत्र यन्मते तावदेकं पृष्ठस्तोत्रं साधनसाम्नोरेव च तस्मिन् विकल्पः, तदा तेन वचनेन तयोस्समुच्चयमात्रविधानादेकस्मिन्नेव सप्तदशस्तोमके पृष्ठे अंशतस्सामद्वयं, तत्र च व्यवस्थिता एव तत्तद्धर्माः। यदा तु प्रकृतावेव पृष्ठस्तोत्रद्वयं वैकल्पिकं इह च तयोरेव बृहद्रथन्तरपदलक्षितयोः समुच्चयस्तदा तत्तत्सामकपृष्ठद्वयस्य प्रत्येकं सप्तदशस्तोमकस्य करणाद्धर्माणां व्यवस्थैव। न ह्यत्रैकैककार्ये समुच्चितस्तोत्रद्वयविधानं, येनैकैककार्ये उभयविधानात् उभयत्रोभयधर्मास्स्युः। विशिष्टविधिगौरवाद्प्राकृतकार्यतापत्तेश्च यथावस्थितयोरेव समुच्चयमात्रविधानाङ्गीकरणात्। अतस्तत्तत्साम्नि तत्तद्धर्मा एव सम्मीलनादयः।

नैमित्तिकग्रहाग्रतानियमस्तु सत्यपि सामद्वये तयोर्विरोधित्वाभावेन निमित्तत्वाभावान्न भवतीत्युक्तं कौस्तुभे। अत्र च पृष्ठद्वयजन्यापूर्वस्यैकजातीयत्वेऽपि समुच्चयानुरोधेन व्यक्तिद्वयोत्पत्तिरिति ध्येयम्। इदं च पृष्ठद्वयसमुच्चयोदाहरणं संसवगोसवादिरूपं मूले कृत्वाचिन्तनीयं द्रष्टव्यम्।

वस्तुतस्तु—तेषु 'उभे बृहद्रथन्तरे भवतः' इति प्रकृत्य 'पवमान रथन्तरं कुर्यात् बृहत्पृष्ठं भवति' इति पञ्चविंशब्राह्मणानुरोधेन लाट्यायनिकल्पे रथन्तरस्य पवमानस्तोत्रे निवेशाभिधानात् न पृष्ठस्तोत्रे उभयोः साम्नोर्न वा एकस्मिन् क्रतावुभयोः पृष्ठस्तोत्रयोस्समुच्चयः।

अत एव पवमानेऽपि रथन्तरं विधीयमानं न सम्मीलनादीन् धर्मान् गृह्णाति। रथन्तरस्य तैर्विनाऽपि जायमानत्वे-

न रथन्तरस्वरूपे आनर्थक्यादपूर्वसाधनत्वलक्षणायां पृष्ठजनकसंस्कारसमूहसाधनत्वस्यैव लक्षणीयत्वात् । तदभावे यूपावटास्तरणबर्हिर्वदप्राकृतकार्यापन्ने रथन्तरादावप्राप्तेः ।

अत एव यैर्विना रथन्तरमेव पठितुं न शक्यं यथास्तोभादिभिः तत्रेतराक्षेपकत्वे प्रमाणाभावात् यदा तदाश्रयभूता ऋचोपि ऋगन्तरग्राहकप्रमाणाभावे आक्षिप्येरन् तदा तदङ्गभूतस्तोभादिनां 'प्रधानं नीयमानं हि तत्राङ्गान्यपकर्षति' इति न्यायेनानुष्ठाने न काचन क्षतिः । अतः ऋत्वन्तरे एतादृशवाक्यसत्त्वे स्तोत्रान्तरे विनियोगाभावे चेदमधिकरणं द्रष्टव्यम् ॥ १६ ॥

(१७)-पार्वणहोमयोस्त्वप्रवृत्तिः समुदायार्थसंयोगात् तदभिज्ञा हि ॥ ५१ ॥ कालस्येति चेत् ॥ ५२ ॥ नाप्रकरणत्वात् ॥ ५३ ॥ मन्त्रवर्णाच्च ॥ ५४ ॥ तदभिज्ञेऽग्निवादिति चेत् ॥ ५५ ॥ नाधिकारिकत्वात् ॥ ५६ ॥

दर्शपूर्णमासयोः—'स्रुवेण पार्वणौ होमौ जुहोति' इति श्रुतम् । तत्र सङ्ख्याभिज्ञं कर्मद्वयं स्रुवपर्वदेवताविशिष्टं विधीयते । न च हविस्समभिव्याहाराभावात् नायं देवतातद्धितः, सम्बन्धसामान्यवाचिन एव योग्यतया देवतापरत्वोपपत्तेः । तदिदं होमद्वयं विकृतावतिदिश्यते न वेति चिन्तायाम्—२

प्रयाजवदतिदेशसम्भवः। न च पर्वशब्दवाच्यकर्मसमुदायस्यैवात्र देवताभूतस्य उद्देशांशे संस्कारात् तस्य च विकृतावभावान्नातिदेशः, पर्वशब्दस्य काले मुख्यतया कर्मणि लक्षणाङ्गीकारे प्रमाणाभावात्। अतोऽत्र कालस्यैव देवतात्वात् तस्य चासंस्कार्यत्वादारादुपकारकयोरनयोर्युक्त एवातिदेशः।

यदि तु कालस्यापि कर्माङ्गतयोपयोगात् स्मृतिबलेन सर्वादौ स्मृतस्यापि पुनराकालिकत्वसम्भावनानिमित्तकाश्रद्धापरिहारार्थं कर्मवदेव स्मरणोपपत्तेः सामवायिकत्वलाभाय कालसंस्कारकत्वमिष्येत तथाऽपि विकृतौ तत्कालीनायामतिदेशे वाधकाभावात्। अन्यकालीनायामपि पशुपुरोडाशादिवत् ऊहेनातिदेशोपपत्तेर्न काचित् क्षतिः।

अस्तु वा पर्वशब्दस्य पृणातेर्दानवाचित्वादधिकरणव्युत्पत्त्या कालवाचित्ववत् भावव्युत्पत्त्या कर्मवाचित्वस्यापि सम्भवात् प्रकरणात्कर्मपरत्वमेव, तथाऽपि पर्वशब्दवाच्यस्याप्याग्नेयादिसमुदायस्य विकृतावपि देवतात्वसम्भवादारादुपकारकयोरनयोरतिदेशे न किञ्चिद्बाधकम्।

यदि तु सन्निपत्योपकारकत्वलाभार्थं देवतासंस्कारकत्वमिष्येत तथाऽपि पर्वत्वस्य दानत्वापरपर्यायस्य प्रत्येकमाग्नेयादिवृत्तितया समुदायवृत्तित्वाभावादपूर्वसाधनत्वेन रूपेणाग्नेयादीनां प्रत्येकमेवोद्देश्यत्वावगतेः हविरभिमर्शनमन्त्रवद्विकृतावतिदेशोपपत्तिः।

न च तत्र शब्दत एव हविषामुद्देश्यत्वावगतेरुद्देश्यसाहित्यस्य चाविवक्षितत्वाद्युक्तोऽतिदेशः। प्रकृते तु तद्धितशब्देन देवतात्वेनैतेषामुपादानात् साहित्यविवक्षोपपत्तेः। सत्य-

पि वैमृधन्यायेनोद्देश्यवाचकपदान्तरकल्पनयाऽऽग्नेयादीनां प्रत्येकमुद्देश्यत्वे उपादेयतादशायां विवक्षितसाहित्यानामाग्नेयादीनामेव देवतात्वावगमात् विकृतौ च तेषामनुपयोगित्वेन संस्कार्यत्वानुपपत्तेर्देवतासंस्कारकयोः पार्वणहोमयोरनतिदेश इति वाच्यम्। उद्देश्यसामर्थ्यानुरोधेनाग्नेयादीनामपि अपूर्वसाधनत्वेनैव रूपेण देवतात्वावगतेर्विकृतावातिदेशोपपत्तेः। इतरथा स्वाहाकारपशुपुरोडाशादावप्यग्नीषोमत्वादिनैव देवतात्वापत्तेस्सौर्यसवनीयादौ तेषामतिदेशानापत्तिः। इदं च सर्वं तद्धितस्य देवताविधायकत्वमङ्गीकृत्योक्तम्।

वस्तुतस्तु—विशिष्टविधौ गौरवापत्तेर्हविस्समभिव्याहाराभावेन च देवतातद्धितत्वानिश्चयात् पर्वणि भवौ पर्वसंस्कारकौ चेत्येवमपि तद्धितोपपत्तेर्योग्यतयाऽपि तदवधारणायोगात् नायं देवतातद्धितः। मन्त्रवर्णादेव तु क्रमावगताङ्गभावाद्देवताप्राप्तिसिद्धेः पार्वणपदं नामधेयमेव।

अत एव याज्ञिकानां 'ऋषभं वाजिनं वयम्, पूर्णमासं यजामहे, अमावास्या सुभगा सुशेवा' इतिमन्त्रगतपूर्णमासामावास्याशब्दयोरेव त्यागवेलायामुद्देशः न तु पर्वशब्दस्य। एवं च तत्रत्यपूर्णमासामावास्याशब्दयोः काले प्रयोगाभावात् मन्त्रार्थपर्यालोचनया कर्मपरत्वावगतेरेकैकस्याग्नेयादित्रिकसंस्कारकत्वेऽपि पूर्वोक्तरीत्या पशुपुरोडाशादिवत् सौर्यादावातिदेशे बाधकाभावः। न ह्युद्देशांशस्य प्रयोजकसत्त्वे परप्रयुक्तदेवतोपजीवित्यागांशे स्वरूपेणाग्नेयादेर्देवतात्वं सम्भवति। अतो येनैवापूर्वसाधनविशेषरूपेणोद्देशांशं प्रति संस्कार्यता तेनैव रूपेण त्यागांशं प्रति देवतात्वमिति युक्त एव पशुपुरोडाशादेरिव पार्वणहोमयोरप्यतिदेशः। एवं वैमृधेऽपि येनैव रूपेणापूर्वसाधनविशेष-

त्वादिना पौर्णमास्या उद्देश्यता तेनैव रूपेणोत्तरकालप्रतियोगित्वं दृष्टार्थत्वात् न तु समुदिताग्नेयत्वादिरूपेणेति उद्देश्यतावच्छेदककोटौ साहित्यस्याग्नेयत्वादेश्चाविवक्षितत्वाद्युक्त एव वैमृधस्यापि विकृतावतिदेशः।

अस्तु वा तत्रोद्देश्यतावच्छेदककोटौ साहित्याद्यविवक्षायामप्युत्तरकालप्रतियोगित्वे, उपादेयत्वात् 'दर्शपूर्णमासाभ्यामिष्ट्वा' इतिवत् विवक्षा। अतश्च सोमे विकृत्युत्तरत्वप्रसङ्गवत् सौर्यादावपि पौर्णमास्युत्तरत्वाभावात् नातिदेशप्रसङ्गः। अन्वारम्भणीयायां तु साहित्यादेरविवक्षा दर्शपूर्णमासत्वस्योद्देश्यतावच्छेदककोटिप्रविष्टत्वाभावादिति युक्तस्तस्या अतिदेशः। प्रकृते पार्वणहोमयोस्तु आश्रयिकर्मत्वेन परप्रयुक्तदेवतोपजीवित्वात् स्वरूपेणाग्नेयादीनां देवतात्वानुपपत्तेर्युक्त एवातिदेशः।

यत्तु समुदायापूर्वप्रयुक्तत्वात् पार्वणहोमयोर्विकृतौ च सौर्यादौ तदभावादनतिदेश इति। तन्न—एवमपि वैश्वदेवादिपर्वणि तत्सत्त्वेनातिदेशापत्तेः। प्रयाजादेरपि तत्प्रयुक्तत्वेन सौर्यादावनतिदेशापत्तेश्च। न हि प्रयाजादीनां प्रकृतौ परमापूर्वप्रयुक्तत्वं द्विःकरणानापत्तेः। अपि तु समुदायापूर्वप्रयुक्तत्वमेव।

अथ तस्य प्रयोजकता न समुदायापूर्वत्वेन, अपि तु उत्पत्त्यपूर्वाव्यवहितापूर्वत्वेनेति तेषां सौर्यादावतिदेशः, ततः पार्वणहोयोरपि तुल्यमिति प्राप्ते—

सत्यमेवं तथाऽपि केषामपि याज्ञिकानां विकृतौ पार्वणहोमाननुष्ठानात् आचारस्यैव प्रकृतौ साहित्यस्याग्नेयत्वादेश्चोद्देश्यतावच्छेदककोटौ विवक्षा न तु व्रीहित्वादिवदविवक्षा

इत्येवंविधतात्पर्यग्राहकत्वावसायात्; तस्य च विकृतावभावादनतिदेशः पार्वणहोमादीनाम्। अत एव नाचारेण तत्तद्विकृतिपर्युदासरूपेणानन्तश्रुतिकल्पना गौरवापत्तेः। सूत्राण्यप्याचारमेवोररीकृत्य समुदायार्थतारूपहेतुपरतया व्याख्येयानि ॥ १७ ॥

(१८)–उभयोरविशेषात् ॥ ५७ ॥ यदभीज्या वा तद्विषयौ ॥ ५८ ॥

सङ्ख्यया कर्मभेदावगतेरेकवाक्योपात्तकर्मद्वयस्यापि सन्निधानादवान्तरप्रकरणाद्वा एकैकमन्त्रं प्रति शेषित्वावगतेः कर्मद्वयस्यापि पूर्णमासदेवताकतया तत्संस्कारकत्वं; अमावास्यादेवताकतया चामावास्यासंस्कारकत्वं प्रधानद्वयानुरोधेनैव मन्त्रद्वयस्यापि तत्र तत्रावृत्तिः। एकपदोपादानावगतकर्मद्वयसाहित्यवत्त्वाच्च सकृत्स्मृतस्यापि पुनस्स्मरणं 'तां चतुर्भिः' इतिवन्नानुपपन्नम्। न ह्यत्र यथाक्रमं पाठः येनैकस्य कर्मण एक एव मन्त्रो भवेत्। एकपदोपादानात्तु उभयोरप्युभयाङ्गत्वम्। अत एव नात्र सूक्तवाकविभागन्याय इति प्राप्ते—

समसङ्ख्याङ्गप्रधानविषये यथाक्रममेव सम्बन्ध इति न्यायस्यौत्सर्गिकत्वात् एकस्य प्रधानस्यैकेनैव मन्त्रेण निराकांक्षत्वाच्च अश्रुतमन्त्रावृत्तिकल्पने पुनस्स्मारकाकांक्षाकल्पने च प्रमाणाभावादेकस्यैकसंस्कारार्थत्वमेवेति प्रयोजनवशाद्विभागः ॥ १८ ॥

(१९)–प्रयाजेऽपीति चेत् ॥ ५९ ॥ नाचोदितत्वात् ॥ ६० ॥

समिदादीनां चतुर्णां प्रयाजानां यदि समिदादिपदैर्द्वितीयान्तैः 'विष्णुं यजति' इतिवत् देवताविधिः; यदि वा विशिष्टविधिगौरवापत्तेर्मन्त्रवर्णादेव समिदादिदेवताविधिः; उत्पत्तिवाक्यस्थं तु समिदादिपदं देवतानुवादी, नामधेयमेव वा; सर्वथा सन्निपत्योपकारकत्वबलाभाय तत्तद्देवतासंस्कारार्थत्वमेव—पार्वणहोमस्वाहाकारोक्तमानुयाजादिवदिति । न च समिदादीनामुपयोगाभावः, वेदे सर्वत्र समिदादिपदानामग्निसामानाधिकरण्यदर्शनेनाग्नेये उपयोगसम्भवात् । समिन्मात्रस्यैव वा समिन्धनादावुपयोगसत्त्वेन तस्यैव सन्निपत्योपकारकत्वामिति प्राप्ते—

सत्यपि वेदे समिदादिपदानामग्निपदसामानाधिकरण्ये, इन्द्रमहेन्द्राधिकरणन्यायेन समिदादिपदैस्तत्तत्प्रकाशनानुपपत्तिः । शब्दस्य देवतात्वेन तद्भेदे पदान्तरप्रयोगानुपपत्तेः ।

न च पूर्णमासादिशब्दस्य पार्वणहोमयोर्देवतात्वेऽपि तदर्थस्याप्याग्नेयादेरुद्देशांशविषयशब्दप्रतिपाद्यत्वसम्बन्धेनोद्देश्यसम्बन्धित्वात् पार्वणहोमसंस्कार्यत्ववदिहापि समिदादिपदस्य देवतात्वे तत्प्रतिपाद्यस्याग्नेस्संस्कार्यत्वोपपत्तिरिति वाच्यं, तथात्वेऽपि 'समिधो अग्न आज्यस्य वियन्तु । तनूनपादग्न आज्यस्य वेतु' इत्यादिमन्त्रवर्णेष्वग्नेस्सम्बोधनेन ततो भिन्नस्यैव समिदादिपदार्थस्य क्रियान्वयप्रतीतेस्समिदादिपदस्याग्निप्रतिपादकत्वाभावात् अग्निसंस्कारकत्वे पशावतिदेशानुपपत्तेश्च ।

यत्तु इतरप्रयाजानामारादुपकारकत्वेऽपि समिद्यागस्य समिन्धनाङ्गभूतसमित्संस्कारकत्वमिति । तन्न । तथात्वे 'यो वै प्रयाजानां मिथुनं वेद, समिधो बर्ह्षीरिव यजति' इति लिङ्गानुपपत्तेः । अत्र हि इवशब्देन वस्तुतो बहुत्वाभावेनारोपितं बहुत्व-

मिति सूच्यते। न च तत्सम्मिन्धनाङ्गसमित्सु युज्यते, वस्तुत-एव तासां बहुत्वात्। आरादुपकारकत्वपक्षे तु सत्यपि बहुव-चनान्तसमित्पदस्य देवतात्वे प्रातिपदिकसंज्ञाबलेनैकस्यैव समि-त्पदार्थस्य सिद्धौ लिङ्गवशेन युक्तो बहुत्वारोपः। तस्मात् चत्वारोपि प्रयाजा आरादुपकारका एवेति न विकृतावू-हितव्याः ॥ १९ ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
नवमस्याध्यायस्य द्वितीयः पादः

अथ नवमस्याध्यायस्य तृतीयः पादः.

(१)—प्रकृतौ यथोत्पत्तिवचनमर्थानां तथो-त्तरस्यां ततौ तत्प्रकृतित्वादर्थे चाकार्य-त्वात् ॥ १ ॥ लिङ्गदर्शनाच्च ॥ २ ॥

'अग्नेरहं देवयज्यया, व्रीहीणां मेध' इत्यादिमन्त्रेषु समवे-तार्थत्वादियुक्तिबलेन अग्निव्रीह्यादिपदानां सौर्यनीवारादिषु द्वा-रान्तरसम्बन्धनिमित्तान्यथाभावात्मक ऊहस्सिद्ध एव प्रोक्षणा-दिवत्। तद्वशेन पदान्तरप्रक्षेपात्मको भाक्त ऊहः परमर्थसिद्धोऽ-प्याक्षिप्य समाधीयते। प्रकृतौ हि अग्निव्रीह्यादिपदेनाग्निव्रीह्या-दीनां लक्षणयैवापूर्वसाधनत्वेन रूपेण प्रतिपादनात् सूर्यनीवा-

रादीनामपि तेनैव रूपेण प्रकाशनोपपत्तेः न पदान्तरप्रक्षेपो युक्तः। अत एव 'पाशान्' इति बहुवचनान्तस्य मन्त्रस्य प्रकृतावेकपाशकायां विकृतावपि लक्षणयैवैकत्वप्रकाशकत्वान्नोहः। न ह्यग्निव्रीह्यादिपदं शक्त्या अपूर्वसाधनीभूतद्रव्यदेवतादिपरं अपि तु लक्षणयैव। 'शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा' इति न्यायात्। विशेषतश्च शब्दस्यैव देवतात्वात्तस्य चाग्निपदेन लक्षणयैव प्रतीतेस्सूर्यस्यापि तयैव प्रतीतिसिद्धौ नोहसिद्धिरिति प्राप्ते—

सत्यप्यपूर्वसाधनत्वस्य प्रकृतावुद्देश्यतावच्छेदकत्वे अग्निव्रीह्यादिपदेन स्वशक्तिजन्यबोधद्वारा अपूर्वसाधनीभूतद्रव्यदेवतादि संस्कुर्यादित्यर्थोऽवगम्यते। अत एव शक्तिजन्यबोधोऽपि व्रीहित्वाग्नित्वादिप्रकारक एव न त्वपूर्वसाधनत्वप्रकारकः। लिङ्गकल्प्यश्रुतिवाक्येन तदवच्छिन्नस्योद्देश्यत्वेऽपि मन्त्रान्तर्गतव्रीह्यग्न्यादिपदे लक्षणायां प्रमाणाभावात्। अत एव तादृशबोधेनापि प्रोक्षणजन्यादृष्टवत् विशेष्य एव द्रव्यदेवतादौ संस्कारो जन्यते न तूद्देश्यतावच्छेदकेऽप्यपूर्वसाधनत्वे। अतश्चोपकारपृष्ठभावेन द्वारस्य शक्तिजन्यबोधस्य विकृतावतिदेशे, तत्पृष्ठभावेन प्राप्यमाणस्याग्न्यादिपदस्य सौर्यादौ बाधात् द्वारासिद्ध्यर्थं पदान्तरप्रक्षेपो युक्त एव।

अत एवाग्निव्रीह्यादिपदानामवघातादिवत् तत्त्वेनैव रूपेणप्रकृतौ निरुक्तकार्यजनकत्वेन विधानेऽपि तत्कार्याभाव इव तत्कार्यस्य तेन कर्तुमशक्यत्वेऽपि युक्त एव तस्य विकृतौ लोपः। तत्र त्वेतावान् विशेषः। कार्याभावे लोप एव, अशक्यत्वे तु तज्जनकोपायान्तरानुष्ठानमिति।

यत्तु मूले प्रकृतविव नावघातस्य तत्त्वेन विधेयता, अपि तु अपूर्वसाधनविशेषोपायत्वेन; इतरथा अदृष्टार्थत्वापत्तेः। अत श्चाग्न्यादिपदस्य स्वरूपेणाविवक्षितत्वात् युक्त एव पदान्तर-प्रक्षेप इति। तन्न—तथात्वे प्रकृताविव व्रीहिपर्यायाणां विदलना-देश्चानुष्ठाने वैगुण्यानापत्तेः। येनैव रूपेण मुख्यकार्यं प्रति जन-कता तेनैव रूपेण नियमादृष्टं प्रत्यपि जनकत्वौचित्याच्च।

यत्तु अग्निपदेन शब्दरूपदेवताप्रकाशनार्थं लक्षणाऽवश्यं-भाव इति। अत्र ब्रूमः। सत्यामपि लक्षणायां येन स्वशक्य-वाचकत्वसम्बन्धेन प्रकृतौ शब्दलक्षणा न तेनैव सम्बन्धेन विकृताविति द्वारभेदायुक्तः पदान्तरप्रक्षेपः।

वस्तुतस्तु—शब्दस्य देवतात्वेऽपि अपूर्वीयदेवतारूपशब्द-वाच्यत्वसम्बन्धेनार्थस्याप्यपूर्वसम्बन्धात्प्रकाश्यत्वोपपत्तेः न म-न्त्रान्तर्गताग्न्यादिशब्दे शब्दलक्षणेति युक्तो व्रीहिपद इव पदा-न्तरप्रक्षेपः।

अत एव सर्वत्रैव तत्प्राप्तौ 'पूयति वा एतदृचोऽक्षरं यदे-नदूहति तस्मादृचं नोहेत्' इति ऋगक्षरोहपर्युदासोपि सङ्ग-च्छते। अत एव तत्कार्यप्रकाशनार्थं तत्प्रकाशनसमर्थ ऋगन्तरोह एव कार्यः, वैदिकत्वसामान्यात्; तदसम्भवे लौकिकवाक्योहः। तथा 'अन्वेनं माता मन्यताम्' इत्याद्यधिगुप्रैषे मात्रादिशब्दोहप्रति-षेधोपि 'न माता वर्धते न पिता' इत्यादिरूपोऽन्यत्रोहलिङ्गम्।

यद्यपि च नायं प्रतिषेधविधिः न्यायप्राप्तत्वादित्युक्तं मन्त्रा-धिकरणकौस्तुभे तथाऽपि नित्यानुवाद एवायमन्यत्रोहलिङ्गम्। न चोहस्य न्यायसिद्धत्वे विकृतिविशेषे 'विश्वेषां देवानामुस्रा-णां वपानां मेदसोऽनुब्रूहि, छागस्य वपाया मेदसोऽनुब्रूहि'

इत्यादिमन्त्रपाठवैयर्थ्यं, तस्य मन्त्रभ्रेषप्रायश्चित्तप्राप्तिफलकमन्त्रत्वसिद्ध्यर्थत्वात् ॥ १ ॥

(२)—जातिनैमित्तिकं यथास्थानम् ॥ ३ ॥ अविकारमेके अनार्षत्वात् ॥ ४ ॥ लिङ्गदर्शनाच्च ॥ ५ ॥ विकारो वा तदुक्तहेतुः ॥ ६ ॥ लिङ्गं मन्त्रचिकीर्षार्थम् ॥ ७ ॥ नियमो वोभयभागित्वात् ॥

मौद्गे चरौ 'पौण्डरीकाणि बर्हींषि भवन्ति' इति श्रुतम्-तत्र बर्हिःपदेन तत्कार्याणि हविरासादनवेदिस्तरणहोतृषदनपवित्रकरणादीनि लक्षयित्वा तदुद्देशेन पुण्डरीकाणि विधीयन्ते । जन्यत्वसम्बन्धार्थकश्च तद्धितः । तत्र वेदिस्तरणे प्रकृतिप्राप्ते 'स्तृणीत बर्हिः परिधत्त वेदिं जामिं मा हिंसीरनुया शयाना । दर्भैस्तृणीत हरितैस्सुपर्णैः निष्का इमे यजमानस्य व्रध्ने' इति मन्त्रोऽवश्यं बर्हिःपदे दर्भपदे चोहितव्य एव; हारितपदेऽप्यूहितव्यो न वेति चिन्तायां—

गुणस्य प्रकृतावविहितत्वेन तत्प्रकाशकपदस्यासमवेतार्थत्वादनूहः । कथञ्चिन्मान्त्रवर्णिकगुणविधिकल्पनया वा समवेतार्थकत्वेऽपि इह पुण्डरीकपदस्य गुणविशिष्टपद्मवाचित्वात् दर्भपदस्थाने ऊहितेन पुण्डरीकपदेनैव गुणप्रकाशनोपपत्तेः न पुनः पदान्तरेण प्रकाशनापेक्षा, अतो हरितपदलोप एव, न तु तत्स्थाने पदान्तरप्रक्षेप इति प्राप्ते—

विधौ श्रुतस्य पुण्डरीकपदस्य गुणविशिष्टपद्मवाचित्वेऽपि प्रकृतौ दर्भादिपदस्य जातिमात्रवाचित्वात् तन्मात्रप्रकाशनार्थं जातिमात्रवाचकस्य पद्मादिपदस्यैव दर्भादिपदस्थाने ऊहितव्यत्वात् प्रकृताविव पदान्तरेण गुणप्रकाशनार्थं हरितपदस्थाने पुण्डरीकपदशक्यगुणवाचिपदान्तरोह आवश्यक एव।

तच्च यद्यपि 'पुण्डरीकं सिताम्भोजम्' इति त्रिकाण्डिस्मरणात् सितपदं प्रसज्यते तथाऽपि 'यथा कप्यासं पुण्डरीकमेवमक्षिणी' इति वेदे प्रयोगात् पुण्डरीकाक्ष इत्यादौ रक्ताम्भोज एव शास्त्रस्थानां पुण्डरीकपदप्रयोगाच्च रक्ताम्भोजस्यैव विधेयत्वेन रक्तपदमेवोहितव्यम्।

शास्त्रदीपिकायां तु दर्भपदस्थाने पुण्डरीकपदोहं वदतः पार्थसारथेः रक्तगुणस्यापि तेनैव प्रकाशनान्न रक्तपदोहस्सिध्येदिति ध्येयम्॥ २॥

(३)—लौकिके दोषसंयोगादपवृक्ते हि चोद्यते निमित्तेन प्रकृतौ स्यादभागित्वात् ॥ ९ ॥

दैक्षे पशौ "यूपो वै यज्ञस्य दुरिष्टमामुञ्चते यद्यूपमुपस्पृशेत् यज्ञस्य दुरिष्टमामुञ्चते तस्माद्यूपो नोपस्पृश्यः यद्येकं यूपमुपस्पृशेत् एष ते वायो इति ब्रूयात्, यदि द्वावेतौ ते वायू इति, यदि बहून् एते ते वायव" इति श्रुतम्। तत्र यूपस्य प्रकरणादिना प्राप्तत्वात् तत्सङ्ख्याकस्पर्श एवेदं मन्त्रविधानमित्यविवादम्। स्पर्शः परं विहितो अविहितो वेति चिन्तायां—

प्रकरणादिना अश्वप्रतिग्रहेष्टिन्यायेन च विहितस्पर्शाङ्गतया तन्निमित्तकतया वा नैमित्तकमिदं कर्माङ्गतया विधीयते । न होदं दोषनिर्घातार्थं येन विहिते तदभावादप्रवृत्तिः, यज्ञस्य विहितत्वेन दुरिष्टजनकत्वासम्भवेनार्थवादमात्रत्वात् । यदि त्वत्र स्पर्शनिषेधाधिक्यात् यदिशब्दोपादानाच्चाश्वप्रतिग्रहेष्टिवैलक्षण्यमाशङ्क्येत ततोऽस्त्वयं विहितस्यैव यूपान्वारम्भादेस्स्पर्शस्य ग्रहाणाग्रहणवत् पाक्षिकत्वसिद्ध्यर्थो निषेधः । ततश्च तत्करणपक्षे अयं मन्त्रपाठोऽङ्गमिति यदिशब्दाविरोधः ।

यदि त्वष्टदोषदुष्टविकल्पभिया निषेधस्य रागप्राप्तयूपस्पर्शविषयत्वमाशङ्क्येत ततो निषेधस्यापि क्रतुमध्यप्रसक्तगमनागमनादिप्रयुक्तयूपस्पर्शविषयत्वेन 'नानृतं वदेत्, न स्त्रियमुपेयात्' इत्यादिवत् क्रत्वङ्गत्वोपपत्तेः स्पर्शस्य क्रतुवैगुण्यापादकत्वावसायात् तत्प्रायश्चित्तत्वेनायं मन्त्रविधिः क्रत्वर्थ एव - एवं च यूपानेकत्वे न्यायादेव एतौ ते इत्यादूहो मन्त्रत्वसिद्ध्यर्थं पुनः पठ्यते । न चैवमप्यूहितमन्त्रपाठमात्रस्य प्रयोजनालाभेऽपि, यदि द्वावित्यादिविनियोगप्रयोजनाभावः । दैक्षसन्निधिपठितानां त्रयाणामेषां पाशाधिकरणन्यायेन तत्रैव विकल्पप्रसक्तावुत्कर्षसिद्ध्यर्थत्वादिति प्राप्ते—

वस्तुतो यज्ञस्य पापापरपर्यायदुरिष्टजनकत्वाभावेऽपि निन्दार्थवादे यज्ञप्रयोगजन्ययूपनिष्ठदुरिष्टस्य यूपस्पर्शकर्तरि सञ्चारसङ्कीर्तनेनास्य निषेधस्य यज्ञप्रयोगसमाप्त्युत्तरकालीनत्वावगमात् पुरुषार्थत्वावगतेरस्यापि तद्दोषनिवारणार्थस्य प्रायश्चित्तस्य लिङ्गेन प्रकरणं बाधित्वा पुरुषार्थत्वमेव । अत एव सूत्रभाष्यस्वारस्याद्यूपकार्यापवर्गोत्तरमेवेदं प्रायश्चित्तं न तु वार्तिकादिस्वारस्यात् क्रतुमध्यगतलौकिकस्पर्शेऽपीति ध्येयम् ।

अत एव यज्ञस्यैव यूपनिष्ठदोषजनकत्वात् यज्ञात्पूर्वं कारणाभावेन अशुचित्वापरपर्यायदोषाभावात् ऋतुमध्यगत-लौकिस्पर्शेऽपि न दोषः।

अत एव 'यूपचित्याद्युपस्पर्शने स्नायात्' इति स्मार्तमपि प्रायश्चित्तं बहिःऋतुविषयमेव निषेधस्य मूलान्तराकल्पनात्।

अस्तु वा तस्य सामान्यविषयत्वादन्तःऋतुगतलौकिक-विषयत्वमपि। तदा तु ऋत्विक्कर्तृको विहितोपि स्पर्शः शामित्रवन्निषेधविषय एव। तमतिक्रम्य प्रवृत्तस्यार्त्विज्यविधानोपपत्तेः। सर्वथा यूपकार्यापवर्ग एवायं पुरुषार्थो मन्त्रपाठः। अत एव निषेधवाक्यप्राप्तयूपमनूद्य मन्त्रत्रयमिदं स्वतन्त्रमेव तत्तत्सङ्ख्याकस्पर्शे निमित्ते तज्जन्यदोषनिर्घातार्थं विधीयते। न तु कश्चित् कस्यचिदूह इति सिद्धम्॥ ३॥

(४)—अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वाद्-विशेषाच्च तेनास्य ॥ १० ॥ विकारो वा तदर्थत्वात् ॥ ११ ॥ अपि त्वन्याय-यसम्बन्धात्प्रकृतिवत् परेष्वपि यथार्थं स्यात् ॥ १२ ॥ यथार्थं त्वन्यायस्या-चोदितत्वात् ॥ १३ ॥ छन्दसि तु य-थादृष्टम् ॥ १४ ॥

दैक्ष एव पशुपाशप्रमोचनेऽनुमन्त्रणत्रयमाम्नातम्—'अदितिः पाशं प्रमुमोक्त्वेतं' इत्येकवचनान्तमेकं 'अदितिः पाशान् प्रमु-

मोक्त्वेतान्' इति बहुवचनान्तमपरम्। तत्रान्त्यस्यापि विकल्पेनैकपाशिकायामेव प्रकृतौ निवेश इति वक्ष्यते। तदेतन्मन्त्रद्वयं द्विपाशिकायां विकृतौ अतिदेशेन प्राप्तम्। तत्र एकवचनान्तस्य तावत् प्रकृतौ समवेततया पाशसङ्ख्याप्रकाशकत्वात् द्विवचनेनोह इत्यविवादमेव। न च प्रतिपाशमस्यावृत्तेरनूहः शङ्क्यः, अस्यानुमन्त्रणमन्त्रत्वेन तन्त्रेणैव प्रयोगात्। बहुवचनस्य तु प्रकृतावसमवेतार्थकत्वेनादृष्टार्थं साधुत्वार्थं वा प्रयोगाद्विकृतावनूहः।

अस्तु वा लक्षणयाऽप्यर्थप्रकाशकत्वे सम्भवति साधुत्वार्थकत्वस्यान्याय्यत्वात् बहुवचनस्यैकत्वलक्षणार्थकत्वं, तथाऽपि स्वशक्याश्रयावयवजन्यावयविवृत्तिसङ्ख्यात्वसम्बन्धेन प्रकृतावेकत्वलक्षणाया इव विकृतौ द्वित्वलक्षणाया अपि सम्भवादनूहः। न चेयं निषिद्धा 'सुपां सुलुक्' इत्यनुशासनेनैव विहितत्वात्। न च 'दृष्टानुविधिश्छन्दसि' इत्यनुशासनात् प्रकृतावस्य दृष्टत्वेनैकत्वलक्षकत्वेऽपि विकृतावदृष्टत्वेन द्वित्वलक्षकत्वानुपपत्तिरिति वाच्यं, प्रकरणेन प्रकृतौ दृष्टत्ववत् अतिदेशेन विकृतावपि दृष्टत्वात्। इतरथोत्कर्षेणाप्यस्य मन्त्रस्योपपत्तेरेकत्वस्यापि लक्षणानापत्तेः। अतो द्विपाशकायामपि विकल्पेन द्विवचनवत् बहुवचनप्रयोग इति प्राप्ते—

सत्यं निरुक्तसम्बन्धेन द्वित्वलक्षणासम्भवः तथाऽपि सा किं 'सुपां सुलुक्' इत्यनुशासनाशिष्टतया निरूढलक्षणा वा स्यात् गङ्गायां घोष इतिवत् साम्प्रतिकी वा। नाद्यः अनुशासनस्य 'दृष्टानुविधिः छन्दसि' इत्यनेन यत्रैव पाठाख्यदर्शनं तद्विषयत्वेनैव नियतत्वात्। अन्यथा वैदिकप्रमाणप्रमितमात्रस्य दृष्टपदा-

र्थत्वे विश्वजिति स्वर्गकामपदे ऊहादौ च छान्दसविधिप्रवृत्त्यापत्तेः। अतश्छान्दसविधेः पठितमात्रविषयत्वात् विकृतावतिदिष्टमन्त्रेऽप्रवृत्तेः नानुशासनिकानिरूढलक्षणया द्वित्वोपस्थितिः।

नान्त्यः—अनुशासनाविषयीभूतेऽपि बहुवचनस्य लक्षणाङ्गीकारे अनुशासनवैयर्थ्यापत्तेः।

अस्तु वा सा तथाऽपि प्रकृतौ यया वृत्त्या एकत्वोपस्थितिर्न तया विकृतौ द्वित्वोपस्थितिरिति प्राकृतवृत्तिबाधात् तद्द्वारकस्य बहुवचनस्यापि बाधे द्वित्वप्रकाशनरूपकार्यानुरोधेन शक्तद्विवचनप्रक्षेपावश्यंभावः। स्वाधीने शब्दप्रयोगे किमित्यवाचकं पदं प्रयोक्ष्यामह इति न्यायात्

अत एव द्वित्वोपस्थित्यर्थं अङ्गुलिविन्यासोऽप्यनाशङ्क्यः मन्त्रपदान्तराणामप्यर्थबोधकत्वानापत्तेः। अत एव बहुपाशकस्थले बहुवचनप्रयोगेऽपि न तस्य मन्त्रत्वम्। प्रकृतौ निरूढलक्षणया एकत्वप्रकाशक एव तस्मिन् मन्त्रत्वात्। इह शक्त्या बहुत्वप्रकाशके तस्मिन् मन्त्रत्वानुपपत्तेः ॥ ४ ॥

(५)—विप्रतिपत्तौ विकल्पस्स्यात् समत्वात् गुणे त्वन्यायकल्पनैकदेशत्वात् ॥ १५ ॥ प्रकरणविशेषाच्च ॥ १६ ॥ अर्थाभावात्तु नैवं स्यात् गुणमात्रमितरत् ॥ १७ ॥ द्यावोस्तथेति चेत् ॥ १८ ॥ नोत्पत्तिशब्दत्वात् ॥ १९ ॥

बहुवचनान्तपाशमन्त्रस्य दैक्ष एव निवेशमङ्गीकृत्य विकृतावूहश्चिन्तितः । स एव त्विह चिन्त्यते । किं बहुपाशिकायामुत्कर्षः उत दैक्ष एव निवेश इति । तत्र बहुत्वप्रकाशनलिङ्गादनुष्ठानसादेश्यादेर्बाधे पूषानुमन्त्रणादिवत् विकृतावुत्कर्षः । न च तद्वत्सामान्यसम्बन्धबोधकप्रमाणाभावः, ज्योतिष्टोममहाप्रकरणस्यैवानर्थक्यतदङ्गन्यायसहकृतस्य क्रतुपशुषु सामान्यसम्बन्धबोधकस्य सत्त्वात् ।

न चैवमपि पाशप्रातिपदिकार्थस्य पाशस्य द्वितीयार्थस्य कर्मत्वस्य प्रमोचनभावनायाश्च प्रधानभूताया दैक्षेऽपि सम्भवेन तत्प्रतिपादकपदानां लिङ्गविरोधाभावेनानुष्ठानसादेश्यादिबाधे प्रमाणाभावात् न गुणभूतबहुवचनमात्रानुरोधेनोत्कर्षकल्पना युक्तेति वाच्यं, अनेकेषामपि पदानामेकव्रीह्यादिपदानुरोधेन व्रीहिप्रयोग एव सङ्कोचवदुत्कर्षस्याप्युपपत्तेः । इतरथा एकपूषपदानुरोधेनेतरपदानामुत्कर्षानापत्तेश्च । गुणभूतलिङ्गानुरोधेन प्रातिपदिकादेर्मेषीवर्जं सङ्कोचवत् गुणभूतवचनानुरोधेनापि तदुत्कर्षोपपत्तेश्च ।

प्रातिपदिकार्थवत् लिङ्गसङ्ख्यादेरपि कारक एवान्वयेन प्रातिपदिकार्थं प्रति सङ्ख्यादेर्गुणत्वे प्रमाणाभावाच्च । एवं चैकवचनान्तपाशमन्त्रेण विकल्पोऽप्यष्टदोषदुष्टो न भवेदिति प्राप्ते —

नात्रोत्कर्षः गुणभूतबहुवचनानुरोधेन प्रधानभूतानां बहूनामुत्कर्षे प्रमाणाभावात् । विभक्त्युपात्तलिङ्गसङ्ख्यान्वायित्वरूपसत्त्वसमाख्यानुरोधेन पार्ष्टिकान्वयवेळायां लिङ्गसङ्ख्यादेः प्रातिपदिकार्थप्राधान्येनैवान्वयाच्च ।

न चैवं लिङ्गाद्यनुरोधेन प्रधानभूतबहुतरेतरपदसङ्कोचस्याप्यनापत्तिः, गुणभूतानुरोधेन प्रधानभूतस्य सङ्कोचेऽपि प्रकरणादिबाधप्रसङ्गेनोत्कर्षे प्रमाणाभावात्। सङ्कोचे त्ववर्जनीयतया नान्तरीयसन्निधिबाधेऽप्युत्कर्षे नान्तरीयकत्वाभावेन तद्बाधस्यान्याय्यत्वाच्च।

. पूषादिपदानां तु गुणत्वाभावात्, तद्व्यतिरेकेणेतरपदानां प्रकृतोपयोग्यर्थप्रतिपादकत्वाभावाच्चोत्कर्ष इति वैषम्यम्। प्रकृते तु पशुपाशकर्मकोन्मोचनमात्रप्रकाशनस्यैवोपयोगित्वात् सङ्ख्यायास्स्वरूपेण प्रकाशनानपेक्षत्वात् सङ्ख्यावाचकपदवैयर्थ्यपरिहारार्थं तस्य पाशसङ्ख्याप्रकाशनोपयोगकल्पनेऽपि नेतरपदानां तद्व्यतिरेकेण प्रकृतोपयोग्यर्थाप्रतिपादकत्वमिति विशेषः।

अत एव बहुवचनं 'सुपां सुलुक्' इत्येवं स्वशक्यबहुत्वाश्रयीभूतपाशावयवजन्यपाशरूपावयविवृत्तित्वसम्बन्धेनैकत्वलक्षणार्थमेव। एवं च फलमुखत्वात् विषमांशघ्नोऽपि विकल्पो न दोषायेति ध्येयम्। इतरथोत्कर्षपक्षेऽप्येकवचनान्तमन्त्रस्यैवोहेन बहुपाशिकायामन्यस्यामिव क्रतुपशुष्वपि बहुवचनान्तत्वोपपत्तेस्तत्पाठफलं मन्त्रत्वमात्रसिद्धिरूपं मन्दं स्यात् ॥ ५ ॥

(६)—अपूर्वे त्वविकारेणैवोपदेशात्प्रतीयेत ॥२०॥

अत एव दर्शपूर्णमासयोः 'पत्नीं सन्नह्य' इत्येकवचनान्तो मन्त्र एकपत्नीकप्रयोग इव द्विबहुपत्नीकप्रयोगयोरप्यविकारेणैव प्रयोक्तव्यः। न च लिङ्गेनैकपत्नीकप्रयोग एव मन्त्रोऽङ्गं द्विबहुपत्नीकप्रयोगयोस्तूहेनातिदिश्यत इति युक्तम्, प्रयोगयोः परस्परं प्रकृतिविकारभावे प्रमाणाभावात्। लिङ्गस्य वक्ष्यमाणरीत्या सर्वसाधारणत्वाच्च, यत्र ह्युपदेशाख्यप्रापकप्रमा-

णस्यैकमात्रविषयत्वं अन्यत्र च कार्यमुखेनातिदेशतः प्राप्तिस्तत्रैवोहो न तु प्रापकप्रमाणस्य सर्वविषयत्वे । अत्र च पाशन्यायेन प्रातिपदिकादिलिङ्गस्य सर्वविषयत्वोपपत्तेरेकवचनानुरोधेन सङ्कोचायोगान्नास्य प्रापकप्रमाणस्यैकपत्नीप्रयोगमात्रविषयत्वम् ।

न च क्रतुपशूनां समानविधानत्वकृत्वाचिन्तायां 'प्रास्मा' इत्यस्य लिङ्गानुरोधेन मेषीवर्जं सङ्कोचवदिहाप्येकवचनानुरोधेन मन्त्रसङ्कोचोपपत्तिरिति वाच्यं, विना कारणं पुलिङ्गस्य लक्षणायां प्रमाणाभावेन तत्र सङ्कोचोपपत्तावपि प्रकृते सङ्कोचे प्रमाणाभावात् । न ह्यत्र द्विबहुपत्नीकप्रयोगे एकवचनस्य लक्षणा, प्रत्येकव्यक्तिगतैकत्वाभिप्रायेण तदुपपत्तेः । यथैव हि शुक्ला घटा इत्यादौ शुक्लगुणस्य प्रत्येकवृत्तित्वेनान्वयः तथैकवचनाभिहितस्यैकत्वस्यापि प्रत्येकव्यक्तिवृत्तित्वेनान्वये न काचित् क्षतिः । न चैवं 'बहुषु बहुवचनम्' इत्याद्यनुशासनस्य निर्विषयत्वापत्तिः, बहुत्वस्य शाब्दबोधविवक्षायां तदुपपत्तेः ।

न चैवं 'पशुना यजेत' इत्यादौ द्वित्रिपशुग्रहणेऽपि बाधकानापत्तिः । प्रथमातिक्रमे कारणाभावेनैकवचनस्यैच्छिकपश्वन्तरव्यावृत्तिफलकत्वोपपत्तेः । अतश्च द्विबहुपत्नीकप्रयोगे एकवचनान्तस्यैव मन्त्रस्य प्रयोगोपपत्तेर्न तत्रोहो न वा 'व्रीहीणां मेध' इतिवत् लोप इति सिद्धम् ॥ ६ ॥

(७)–विकृतौ चापि तद्वचनात् ॥.२१ ॥

एवं प्रकृतावेव समवेतार्थकत्वेन द्विबहुपत्नीकप्रयोगयोरपि मन्त्रस्याविकारे सिद्धे विकृतौ द्विबहुपत्नीकप्रयोगयोरपि प्रत्येकव्यक्तिगतत्वेनैवैकवचनस्य प्रयोगोपपत्तेर्नोहः ।

न चैवमनेकपाशिकायां विकृतावप्येकवचनान्तस्य पाशमन्त्रस्योहानापत्तिः एकवचनस्य प्रत्येकव्यक्तिगतत्वेनोपपत्तेरिति वाच्यं, प्रकृतौ पाशस्यैकत्वेन तद्गतैकवचनस्यापूर्वसाधनव्यक्तिपरिच्छेदकीभूतसङ्ख्याप्रकाशकत्वेन विकृतावपि तादृशसङ्ख्याप्रकाशनार्थमूहावश्यंभावात् । प्रकृते त्वेकवचनस्य प्रमाणान्तरानवधृतपल्लघनेकत्वावरुद्धप्रयोगविषयेऽपि पाशाधिकरणन्यायेन प्रवृत्त्यवगतेः न परिच्छेदकीभूतसङ्ख्याप्रकाशकत्वमिति वैषम्यम् ॥ ७ ॥

(८)—अग्निगौ सवनीयेषु तद्वत्समानविधानाश्चेत् ॥ २२ ॥

एवं क्रतुपशूनां समानविधानत्वपूर्वपक्षे 'प्रास्मा' इत्यग्निगुप्रैष एकवचनान्त एव तेषु प्रयोक्तव्यः पत्नीशब्दवत् । न त्वेकवचनानुरोधेनैकपशुक एव दैक्षादौ, एकवचनस्य प्रत्येकव्यक्त्यभिप्रायेण गणेऽपि श्रुत्यैव सम्भवात् । अत एव यस्य पुल्लिङ्गस्य श्रुत्या स्त्रीपुंसगणे असम्भवस्तत्रात्यन्तनिषिद्धलक्षणायां प्रमाणाभावात् मेषीवर्जं पुंपशुष्वेव सङ्कोच इति वैषम्यम् ।

असमानविधानत्वसिद्धान्ते तु 'प्रास्मा' इत्ययं वचने लिङ्गे च 'प्रैभ्यो अस्या अग्निं भरतात्' इत्येवमूहितव्य एव । तदेतत् तार्तीयस्य समानविधानत्वविचारस्य प्रयोजनमात्रकथनम् ॥ ८ ॥

(९)—प्रतिनिधौ चाविकारात् ॥ २३ ॥ अनाम्नानादशब्दत्वमभावाच्चेतरस्य स्यात् ॥

तादर्थ्याद्वा तदाख्यं स्यात् संस्कारैरविशिष्टत्वात् ॥ २५ ॥ उक्तं च तत्त्वमस्य ॥ २६ ॥

यत्र तु अवयवसादृश्येन प्रतिनिधिनियमः यथा नीवारपूतीकादौ तत्र व्रीह्यादिशास्त्रेणैव नीवारादिगतव्रीह्यवयवसमानजातीयावयवानामपि साधनत्वावगतेः संस्कारविधीनां मुख्यद्रव्यसमानविधानत्वस्य तृतीये स्थापितत्वात् 'व्रीहीणां मेध' इति मन्त्रोऽप्यविकारेणैव प्रवर्तते न तु नीवाराणामित्येवमूहितव्यः। एवं सोमपदघटितमन्त्रा अपि प्रतिनिधौ मुख्यमुख्यस्थानापत्त्यतिदेशे प्रमाणाभावात्।

न च नीवारगतव्रीह्यवयवादौ व्रीहित्वजातौ प्रमाणाभावेन तत्र कथं व्रीहिपदप्रयोगः, पुरोडाशप्रकृतित्वस्य षष्ठ्यर्थत्वेन व्रीहिपदवाच्यव्रीहित्वजातेः प्रकृतित्वायोगे व्रीहिपदेन लक्षणया व्रीहित्वसाधनताक्षिप्तसाधनताकत्वसम्बन्धेन व्रीह्यवयविन इव तदवयवानामप्युपादानेन नीवारगतव्रीह्यवयवानामपि प्रकाशनोपपत्तेः। 'व्रीहिभिर्यजेत' इत्यनेन व्रीहित्वजातेस्साधनता शब्देनोच्यते तदाश्रयावयविनस्तदवयवानां च साधनत्वमर्थादाक्षिप्यते इत्युक्तं तृतीये।

वस्तुतः पुरोडाशस्य व्रीह्यवयवतण्डुलप्रकृतित्वस्यैव सत्त्वेन व्रीहिपदेन व्रीह्यवयवानामेव लक्षणाच्च सोमत्वादिकं त्ववयवावयविवृत्तिजातिरिति पूतीकगतसोमावयवेष्वपि साऽस्त्येव। पूतीकगतविजातीयावयवबाहुल्यात्तु सा नाभिव्यज्यते। अतस्तत्रापि नोहः।

यदि हि नीवारत्वादिना नीवाराणां प्रतिनिधौ साधनत्वं भवेत् तदा तेषां साङ्गप्रधानकरणासम्भवे कर्मविध्याक्षिप्तानां संस्कारविध्युत्तरप्रवृत्तिकतया समानविधानत्वाभावात् भवेदप्यूहः।

वस्तुतस्तु तदाऽपि नीवारेषु व्रीहिधर्मातिदेशे प्रमाणाभावः। सत्यपि व्रीहिकार्यापन्नत्वे लौकिकधर्मग्रहणेनैव तेषां निराकांक्षत्वात् यूपावटास्तरणबर्हिषीवातिदेशकल्पनानुपपत्तेः। अन्यथा यूपावटास्तरणेऽपि बर्हिस्साध्यत्वसादृश्यादतिदेशापत्तेः। फलचमसे तु 'तमस्मै भक्षं प्रयच्छेत्' इति लिङ्गादेवातिदेश इति वैषम्यम्।

यदि तु द्रव्यमात्रासम्भवे कर्मविधिमात्रालोचनयैव संस्कारविधिभ्यः पूर्वमेव नीवारणां साधुत्वावगम इति विभाव्यते तर्हि तेषां प्रोक्षणादिधर्मांशे समानविधानत्वेऽपि 'व्रीहीणां मेध' इति मन्त्रस्य यवप्रयोग इव नीवारप्रयोगेऽपि लोपो भवेत् न तूहः। इयमेव च द्वयी गतिः, यत्र नावयवघटितसादृश्येन प्रतिनिधिः यथा अवघातप्रतिनिधितया नखविलुञ्छनादौ तत्र सर्वथैव धर्माणां लोपः 'अधिषवणमसि वानस्पत्यम्' इत्यादिमन्त्रमात्रलोपो वा। प्रकृते तु नीवारपूतीकादीनामवयवघटितसादृश्येन प्रतिनिधित्वात् द्रव्यशास्त्रेणैव साधनत्वावगतेस्संस्काराणामिव व्रीह्यादिपदघटितमन्त्रस्याप्यनूहेन प्राप्तबाधः। तदेतदपि तार्तीयाधिकरणस्य प्रयोजनमात्रकथनम्॥

(१०)—संसर्गिषु चार्थस्यास्थितपरिमाणत्वात् ॥ २७ ॥ लिङ्गदर्शनाच्च ॥ २८ ॥

दैक्षे अध्रिगुप्रैषे 'उदीचीनाꣳ अस्य पदो निधत्तात्। सूर्यं चक्षुर्गमयतात्। वातं प्राणमन्ववसृजतात्। अन्तरिक्षमसुम्। दिशश्श्रोत्रम्। पृथिवीं शरीरम्' इति श्रुतम्। तत्र पशुगणे अस्येत्येकवचने द्विबहुवचनेनोहो निरपवादः पदः इत्यत्रानूहोऽपि। चक्षुरादिपञ्चकविषये तूहानूहचिन्तायां सत्यप्यधिष्ठानभेदे इन्द्रियं लाघवाद्व्यासज्यवृत्त्येकमेव कल्प्यते। अभिमतं च परेषामपीदं प्राणवायौ। अतश्च तस्यैकत्वादेकवचनं समवेतार्थकमेव पशुभेदे तद्भेदादूहितव्यम्। प्राणपदवाच्यघ्राणं त्वधिष्ठानस्याप्येकत्वादेकमेवेति तत्र सुतरामूहः। शरीरस्य तु प्रत्यक्षत एकत्वात्ततोऽपि। न च चक्षुषो व्यासज्यवृत्तित्वे एकगोळकविनाशेऽपि चाक्षुषानापत्तिः, एकगोळकमात्रवृत्तिखण्डचक्षुरन्तरेणैव चाक्षुषोपपत्तेरिति प्राप्ते—

भिन्नदेशावस्थिताश्रयभेदे तदाधेयभेदस्य रूपादावौत्सर्गिकस्य त्यागेन व्यासज्यवृत्तित्वकल्पने प्रमाणाभावात्, अन्यथा सर्वप्राणिसाधारण्येनैवैकचक्षुःकल्पनापत्तावस्मदिष्टसिद्ध्यापत्तेः प्रत्यधिष्ठानं नानैवेन्द्रियम्। तच्च प्रमाणान्तरवशात्तेजसादित्यन्यदेतत्। तत्र च पत्नीन्यायेनैकत्वस्य प्रत्येकवृत्त्याभिप्रायेणाप्युपपत्तेरनूह एव।

वस्तुतस्तु—गोळकाधिष्ठितस्य सूर्यगमनासम्भवात् ततो निर्गतस्यैवात्र चक्षुःपदेनाभिधानम्। न च पर्यग्निकरणोत्तरमेवाध्रिगुप्रैषात्तदानीं चक्षुरादीनां गोळकस्थत्वात् न निर्गमनमिति वाच्यं अनन्तरभाविसंज्ञपनफलस्यैव पूर्वमुच्यमानत्वेन बाधकाभावात्। अतश्च निर्गतस्यैव चक्षुषः प्रदीपप्रभावदनेकस्यापि संसर्गेणैकीभावात् प्रकृतावेकवचनं निर्वाह्यम्। ततश्च

विकृतावपि तथैव सम्भवादनूहः। न हि निर्गतचक्षुषां प्रदीपानामिव भिन्नदेशावस्थानस्यैव कल्पनान्नैकीभावः। एकगोलकनिर्मीलने तत्पुरःप्रदेशावस्थितघटादेर्गोलकान्तरस्थितचक्षुषा दर्शनेन निर्गतचक्षुषो विस्फारणकल्पनादेकीभावोपपत्तेः।

अत्र च तेजस्त्वादिवत् चक्षुष्ट्वादिकमप्यवयवावयविवृत्तिजातिः, तेन तत्तद्गोलकस्थिततत्तच्चक्षुर्भिरारब्धोऽवयव्यपि चक्षुरेवेति नोहप्रसक्तिः। एवं प्राणपदवाच्यघ्राणेन्द्रियेऽपि बोध्यम्। शरीरे तु यद्यपि नैकीभावसम्भवः। तथाऽप्युच्यमानस्य कारणीभूतसूक्ष्मपृथिव्यां लयापरपर्यायगमनस्य प्रत्यक्षबाधितत्वात् प्रकृतावेव स्तुत्यर्थमुच्यमानतयाऽसमवेतार्थकत्वादनूहो द्रष्टव्यः। शरीरे ऊहं केचिदिच्छन्ति ॥ १० ॥

(११)——एकधेत्येकसंयोगादभ्यासेनाभिधानं स्यात् ॥ २९ ॥ अविकारो वा बहूनामेककर्मवत् ॥ ३० ॥ सकृत्त्वं त्वैकध्यं स्यादेकत्वात्त्वचोऽनभिप्रेतं तत्प्रकृतित्वात्परेष्वभ्यासेन विवृद्धावभिधानं स्यात् ॥३१॥

तत्रैव प्रैषे 'एकधाऽस्य त्वचमाच्छ्यतात्' इति श्रुतम्। तत्र षष्ठ्यन्तं द्वितीयान्तं च पशुगणे द्विबहुवचनान्तेनोहितव्यमित्यविवादम्। एकधाशब्दस्य त्वविकारोऽथवा अभ्यासात्मको भाक्त ऊह इति चिन्तायां—

एकधाशब्दस्य एकप्रयत्नसाध्यत्व एकदेशकालकत्वे च लौकिकप्रयोगेण नानार्थकत्वावगतेः प्रकृतावेकत्वात्त्वचो देशतः

कालतो वा साहित्यरूपार्थासम्भवेन त्वचस्साकल्यसम्पत्तये एकप्रयत्नसाध्यत्वस्यैव ग्राह्यत्वेऽपि विकृतावश्रुताभ्यासकल्पने प्रमाणाभावात् एकधाशब्देनार्थान्तरभूतं देशतः कालतो वाऽनेकत्वच्छेदनसाहित्यमेव शक्त्या प्रकाश्यत इत्यविकारादनूहः। यदि तूपकारपृष्ठभावेन पदार्थानामतिदेशात् प्रकृतौ यस्य शब्दस्य योऽर्थो निर्णीतस्तस्य तदर्थपृष्ठभावेनैव प्राप्तयवगतेर्नार्थान्तरप्रकाशनस्य प्रयोजनत्वकल्पनमुपपत्तिमदिति विभाव्यते तदाऽस्तु एकप्रयत्नसाध्यत्वमेव विकृतावप्येकधाशब्दार्थः। तथाऽपि तु नाभ्यासः सकृदुच्चरितेनैवैकधाशब्देन सर्वत्वग्गतैकप्रयत्नसाध्यच्छेदनकत्वस्य वक्तुं शक्यत्वात्।

यद्यपि च सहितानां सर्वासां त्वचामेकप्रयत्नसाध्यच्छेदनकत्वं बाधितं, तथाऽपि प्रतिप्रधानं गुणावृत्तेर्युक्तत्वादुद्देश्यानां त्वचां साहित्याविवक्षणाच्च प्रत्येकमेव सम्मार्गादिवत्तास्वेकप्रयत्नसाध्यच्छेदनकत्वस्यान्वयबोधोपपत्तेः नार्थोऽभ्यासेनेति प्राप्ते—

प्रकृतौ यादृशनिर्णयं प्रति यादृशपदज्ञानस्य यादृशसामग्रीसत्त्वे फलोपधायकता विकृतावपि तादृशसामग्रीसत्त्व एव तादृशपदज्ञानस्य तादृशनिर्णयोपधायकत्वं वाच्यं, इतरथा प्रकृतिवद्भावानुपपत्तेः। तदिह प्रकृतौ एकधाशब्देन सहकार्यन्तरैरपेक्ष्येणैव त्वक्त्वं विशेष्यतावच्छेदकीकृत्य त्वग्विशेष्यकैकप्रयत्नसाध्यच्छेदनकत्वप्रकारकः पर्याप्तिसंसर्गको निर्णयो जनितः। न चासौ विकृतौ सकृदुच्चरितेनैकधाशब्देन सहकार्यन्तरनैरपेक्ष्येण सम्भवति। तस्य समुदितत्वकत्वं विशेष्यतावच्छेदकीकृत्यापि तादृशबोधजनकत्वात्। अतश्च तादृशबोधे बाधितविषयत्वप्रतिसन्धानस्याप्युक्तनिर्णये सहकारिकारणता वाच्येति

अधिकसामग्रीकत्वात् प्रकृतिवद्भावबाधापत्तिः। अतः प्राकृतसहकारिकारणमात्रेण प्रत्येकत्वग्विशेष्यकनिरुक्तबोधजननार्थमेकधापदस्य यावत्त्वचमभ्यास आवश्यक एव। सोऽयमभ्यासमात्रेण प्रकृतितोऽन्यथाभावादूह इति व्यवह्रियते। न त्वयं वस्तुतस्संस्कारोहादिसाधारणोहलक्षणाक्रान्त इति ध्येयम् ॥ ११ ॥

(१२)—मेधपतित्वं स्वामिदेवतस्य समवायात्सर्वत्र च प्रयुक्तत्वात् तस्य चान्यायनिगदत्वात् सर्वत्रैवाविकारस्स्यात् ॥ अपि वा द्विसमवायोऽर्थान्यत्वे यथासङ्ख्यं प्रयोगस्स्यात् ॥ ३३ ॥ स्वामिनो वैकशब्द्यादुत्कर्षो देवतायां स्यात्पत्न्यां द्वितीयशब्दस्स्यात् ॥ ३४ ॥ देवता तु तदाशीष्ट्वात् सम्प्राप्तत्वात् स्वामिन्यनर्थिका स्यात् ॥ ३५ ॥ उत्सर्गाच्च भक्त्या तस्मिन् पतित्वं स्यात् ॥ उत्कृष्येतैकसंयुक्तो द्विदेवते सम्भवात् ॥ ३७ ॥ एकस्तु समवायात् तस्य तल्लक्षणत्वात् ॥ ३८ ॥ संसर्गित्वाच्च तस्मात् तेन विकल्पस्स्यात् ॥ ३९ ॥ एकत्वेऽपि गुणानपायात् ॥ ४० ॥

तत्रैव प्रैषे 'उपनयत मेध्या दुरः। आशासाना मेधपतिभ्यां मेधम्' इति श्रुतम्। केषांचित्तु शाखिनां 'मेधपतये मेधम्' इति। तत्र न तावच्छाखाभेदेनात्र मन्त्रभेदः एकदेशवैलक्षण्येऽपि शाखान्तराधिकरणन्यायेन प्रत्यभिज्ञानबलेन तदेकत्वावगतेः। ततश्च तदर्थोऽप्येक एव वाच्यः। तेन मेधस्य पशोः पतिः यजमानो देवता वा अर्थो वाच्यः न तूभयम्।

न च मेधपतित्वस्य शक्यतावच्छेदकस्यैकत्वात् तदवच्छिन्नोभयाभिधानेऽपि न दोष इति वाच्यं, तथात्वेऽपीतरपदानां तत्तदर्थघटिततत्तद्वाक्यार्थविषयकविलक्षणबोधद्वयजनकत्वानुपपत्तेः। तथाहि—यजमानपरत्वे यजमानाय यो मेधः पशुः भोगसाधनत्वेनासीत् तं मेध्याः भवन्तः ऋत्विजः दुरः यज्ञद्वारं चात्वालोत्करयोर्मध्यं उपनयत स्वकीयदक्षिणां यजमाननिष्ठं फलं वा आशासानास्सन्त इत्यर्थः। देवतापक्षे देवतायै मेधं पशुं आशासाना मेध्या भवन्तः तं दुरः प्रति उपनयत इत्यर्थः।

केचित्तु देवतापक्षे देवतायै पशुमाशासाना भवन्तो मेध्यास्तदीया दुरो यज्ञद्वाराणि हृदयादीनि उपनयत इत्यर्थ इत्याहुः। सर्वथा विलक्षणबोधद्वयजनकत्वानुपपत्तेरेकरूप एवार्थो वाच्यः।

न च बोधद्वयजनकत्वे सकृदुच्चारितस्य सकृदर्थप्रत्यायकत्वमिति नियमभङ्ग एव दूषकतावीजम्, न च तदत्रास्ति शाखाभेदेन द्विरश्रुतस्य सकृच्छ्रवणाभावादिति वाच्यं, तथाऽपि लिङ्गकल्पितश्रुतेरनेकत्वकल्पनागौरवभिया एकस्यैवार्थस्य वाच्यत्वात्। तदिह किंपरत्वमिति चिन्तायां—

देवताया विग्रहाद्यभावेन स्वामित्वापरपर्यायपतित्वानुपपत्तेर्यजमानपरत्वमेव । न च तस्यैकत्वेन द्विवचनानुपपत्तिः । पाशन्यायेन तदुपपत्तेः । वस्तुतस्तु—दम्पत्योर्व्यासज्यवृत्तिकर्तृत्वैक्यात् यजेतेतिवदेकवचनं; पत्नीयजमानाभिप्रायेण च वसानाविति द्विवचनम् । अत एवैकपत्नीकप्रयोगे द्विवचनान्त एव मन्त्रः अन्यत्र त्वेकवचनान्त एवेति नास्मन्मते विकल्पोऽपीति प्राप्ते—

यजमानपरत्वे पशोराशासनस्य तावत्सिद्धत्वेनैव वैयर्थ्यम् । दक्षिणादीनां चाश्रुतानां कल्पनात् न तदाशासनमपि सम्भवि । अतो देवस्वादिव्यवहारसिद्ध्यर्थं देवताया अपि स्वीकाराख्यसम्बन्धस्य तृतीये साधितत्वात् तमादाय मेधपतित्वोपपत्तेर्देवतापरत्वमेव । वचनं तु त्वदुक्तरीत्यैव देवतात्वस्य अग्नीषोमयोर्व्यासज्यवृत्तित्वादेकत्वोपपत्तेरधिष्ठानभेदेन च द्वित्वोपपत्तेर्ममाप्युपपन्नमेव । कर्तृत्व इव च देवतात्वेऽपि मेधपतित्वं सामानाधिकरण्यादेवोपपन्नमिति न काचिदनुपपत्तिः । एवं च विकल्पोपि फलमुखत्वान्न दोषाय ।

प्रयोजनं पूर्वपक्षे सत्रे द्वयोरप्यूहो; विकल्पश्च ✗ अर्थद्वयानुसन्धाने । सिद्धान्ते त्वग्रिमाधिकरणे वक्ष्यते ॥ १२ ॥

(१३)—नियमो बहुदेवते विकारस्स्यात् ॥ विकल्पो वा प्रकृतिवत् ॥ ४२ ॥

यत्र देवतात्वमेकं अधिष्ठानं त्वेकं बहु वा तत्र द्विवचनान्तस्याधिष्ठानपरत्वात् तदनुरोधेनोहः । एकवचनान्तस्य त्वविकार एव देवतात्वस्यैकत्वात् । यथा 'वायव्यं श्वेतमालभेत,

वैश्वदेवं घूम्रमालभेत, स एतान् पशूनादित्येभ्य आलभेत' इत्यादौ। अत्र वायुरेकमधिष्ठानं विश्वशब्दस्य समस्तवाचित्वात् बहवो देवा अधिष्ठानम्।

यद्यपि च शब्दस्यैव देवतात्वात् नात्र शब्दानां बहुत्वं तथाऽपि देवस्यादिव्यवहारसिद्ध्यर्थं कल्प्यस्य स्वीकारस्याप्यर्थनिष्ठस्यैव कल्पनात् स्वीकारघटितमेधपतित्वस्याप्यर्थ एवोपपत्तेरर्थ एवात्राधिकरणे परम्परया देवतात्वाधिष्ठानपदेनोच्यते इति तद्बहुत्वोपपत्तिः। एवमादित्यानामपि बहूनामेवाधिष्ठानत्वं बहुवचनानुरोधात्।

न च शब्दस्य देवतात्वपक्षे चतुर्थ्युपात्तदेवतात्वे प्रातिपदिकलक्ष्यस्यादित्यपदस्यैवान्वयात् तस्य चैकत्वेन बहुवचनेनाप्येकत्वस्यैव लक्षणात् कथमधिष्ठानानेकत्वमिति वाच्यं, सत्यामपि लक्षणायां स्वशक्याश्रयवाचकपदवृत्तित्वसम्बन्धेनैव लक्षणादाश्रयरूपेऽर्थे बहुत्वोपपत्तेः। अतश्च तत्रतत्राधिष्ठानसङ्ख्यानुरोधेन द्विवचनान्तस्योहः देवतात्वं त्वेकम्, अनेकत्वे प्रमाणाभावात्। 'आदित्येभ्यः' इत्यत्रापि न बहुत्वं विभक्त्युपात्तदेवतात्वान्वयि। अपि तु बहुत्वस्यार्थिकमर्थसम्बन्धं गृहीत्वा तल्लक्षितैकत्वमेवेति तत्रापि देवतात्वैकत्वम्।

अस्तु वा बहुवचनबलात् तत्र देवतात्वभेद इति न तदिहोदाहरणं किन्त्वग्रिमसूत्र एव। तदेतत्पूर्वाधिकरणस्य प्रयोजनमात्रकथनमिति मन्तव्यम्॥ १३॥

(१४)–अर्थान्तरे विकारस्स्यादेवतापृथक्त्वादेकाग्निसमवायात्स्यात् ॥ ४३ ॥

यत्र तु देवतात्वान्यनेकानि अधिष्ठानं त्वेकमनेकं वा तत्रैकवचनान्तस्याप्यूहः यथा 'त्वाष्ट्रं पाल्लीवतं, अग्नये पावकाय पशुमालभेत, आग्नेयः कृष्णग्रीवः, सारस्वती मेषी, बभ्रुस्सौम्यः' इत्यादौ। अत्र त्वष्टृपत्नीवतोरग्निपावकयोश्चाधिष्ठानैकत्वेऽपि तद्धितचतुर्थीभेदात् देवतात्वभेदः। तृतीयोदाहरणे तूभयभेदः। अतस्तत्रोभयोरपि मन्त्रयोस्तत्तत्सङ्ख्यावशेनोहः। न चानयोर्मन्त्रयोरर्थद्वयपरत्ववशेनोहाङ्गीकारे प्रकृतौ विकृतौ वा देवतात्वतदधिष्ठानरूपार्थभेदात्समुच्चयापत्तिरिति वाच्यं, उभयोरप्युभयार्थप्रतिपादकत्वेन विकल्पोपपत्तेः।

एकवचनान्तो हि देवतात्वे परंपरासम्बन्धेन मेधपतित्वं वदन् परम्परासम्बन्धघटकतयाऽधिष्ठानमप्युपस्थापयति। अग्नीषोमत्वादिना तदुपस्थितिस्तु मेधपतिपदादशक्यैव। द्विवचनान्तोऽपि अधिष्ठाने मेधपतित्वं वदन् स्वीकाराख्यसम्बन्धस्य देवतात्वाधीनत्वात् देवतात्वमप्युपस्थापयतीति सत्यपि विषयताभेदे उभयोरप्युभयोपस्थापकत्वाद्विकल्पोपपत्तिः॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
नवमस्याध्यायस्य तृतीयः पादः
समाप्तः.

अथ नवमस्याध्यायस्य चतुर्थः पादः.

(१)–षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वात् गुणस्य प्रविभक्तत्वादविकारे हि तासामकात्स्न्र्येनाभिसम्बन्धो विकारान्न समासस्स्यादसंयोगाच्च सर्वाभिः ॥ १ ॥ अभ्यासेऽपि तथेतिचेत् ॥ २ ॥ न गुणादर्थकृतत्वाच्च ॥ ३ ॥ समासेऽपि तथेति चेत् ॥ ४ ॥ नासम्भवात् ॥ ५ ॥ स्वाभिश्च वचनं प्रकृतौ तथेह स्यात् ॥ वङ्क्रीणां तु प्रधानत्वात् समासेनाभिधानं स्यात्प्राधान्यमध्रिगोस्तदर्थत्वात् ॥ ७ ॥ तासां च कृत्स्नवचनात् ॥ ८ ॥ अपि त्वसन्निपातित्वात्पत्नीवदाम्नातेनाभिधानं स्यात् ॥ ९ ॥ विकारस्तु प्रदेशत्वाद्यजमानवत् ॥ १० ॥ अपूर्वत्वात्तथा पत्न्याम् ॥ ११ ॥ आम्नातस्त्वविकारात्सङ्ख्यासु सर्वगामित्वात् ॥ १२ ॥ सङ्ख्या

त्वेवं प्रधानं स्यात् वङ्क्रयः पुनः प्रधानम् ॥ १३ ॥ अनाम्नातवचनमवचनेन हि वङ्क्रीणां स्यान्निर्देशः ॥ १४ ॥ अभ्यासो वाऽविकारात्स्यात् ॥ १५ ॥ पशुस्त्वेवं प्रधानं स्यादभ्यासस्य तन्निमित्तत्वात् तस्मात्समासशब्दस्स्यात् ॥१६॥

तत्रैव प्रैषे 'षड्विंशतिरस्य वङ्क्रयः। ता अनुष्ठ्योच्चावयतात्' इति श्रुतम्। तत्रास्य मन्त्रस्य करणमन्त्रत्वाभावेऽपि समवेतप्रकाशकत्वसम्भवेऽसमवेतार्थस्यान्याय्यत्वादविकार एव पशुगण इति तावदनाशङ्क्यम्। विकारोपि कीदृग्विध इति चिन्तायां—

प्रकृतिदृष्टपदान्यथात्वे प्रमाणाभावादश्रुतपदान्तरकल्पनानुपपत्तेः यावत्पशुगतसमस्तवङ्क्रिप्रकाशनार्थं 'षड्विंशातिरस्य' इति पदद्वयावृत्तिरेव। अत एव प्राकृतपदबाधे प्रमाणाभावात् न क्वचिदाप एकवचनोहः। 'अदितिः पाशं, मेधपतये मेधम्' इत्यादावपि अभ्यासेनैव सर्वपाशादिप्रकाशनोपपत्तेः, अश्रुताद्विवचनाद्यध्याहारापेक्षया श्रुतस्यैवाभ्यासकल्पने लाघवाच्च। अन्यथा द्विधा त्रिधा इत्येवमूहेनैव प्रकाशनोपपत्तौ एकधापदस्याप्यभ्यासानापत्तेः।

न चैकत्वादीनां प्रकृतावेकत्वत्वादिनाऽनुद्देश्यत्वात् अपूर्वसाधनीभूतसङ्ख्यात्वेन प्रकाशने च विकृतावपि पशुबहुत्वादेरपूर्वसाधनीभूतस्य प्रकाशनार्थं बहुवचनादिप्रक्षेपावश्यंभाव

इति वाच्यं, 'आग्नेयं कृष्णग्रीवं सौम्यं बभ्रुम्' इत्यादौ पश्वेकत्वस्यैव तत्तदपूर्वसाधनत्वेन बहुत्वस्याविहितत्वात् 'प्राजापत्यान्' इत्यादावपि यागबहुत्वार्थमेव बहुवचनोपादानेनातिदेशप्राप्तस्य पश्वेकत्वस्यैव तत्तदपूर्वसाधनत्वाच्च। अतश्च तत्प्रकाशनार्थमावृत्तिरेव श्रुतपदस्य युक्ता, न तु सूर्यादिपदवत् पदान्तरप्रक्षेपः।

यत्तु मूले एतत्पक्षसाधनार्थं षड्विंशतिसङ्ख्यापशूभयसम्बन्धप्रधानमिदं वाक्यं प्रतिपशु भेदेन तत्सम्बन्धं प्रकाशयितुमभ्यसनीयमिति युक्तिरुपन्यस्ता, सा सम्बन्धस्य षष्ठ्यर्थस्य गुणत्वेन प्राधान्यशङ्कानुपपत्तेर्वाक्यार्थरूपस्य चाशाब्दत्वेन सुतरां तदनुपपत्तेः। प्राधान्येऽपि च तस्य प्रतिपशूहे नापि प्रकाशनोपपत्तेरभ्यासे प्रमाणाभावादुपेक्षिता।

अत उक्तयुक्त्यैव पदद्वयाभ्यासः प्रसाध्यत इति प्रथमः पक्षः।

द्वितीयस्तु पशुगणे एकप्रयोगविधिपरिगृहीतानामनेकेषां साङ्गानां यागानां यौगपद्यावगतेरर्थप्रकाशनकार्यस्यापि यौगपद्यावगमात्तदनुरोधेन युगपदनेकप्रकाशकपदप्रक्षेपस्यावश्यकत्वात् न क्वचिच्छ्रूयमाणस्यैवाभ्यासः। 'अदितिः पाशं' इत्यादौ तु गुणानुरोधेन प्रधानप्रातिपदिकस्याभ्यासे प्रमाणाभावादपि नासौ, अपि तु बहुवचनाबूह एव। यद्यपि च बहुत्वं न कस्यचिदङ्गं तथाऽपि पाशप्रातिपदिकेनानेकपाशोपादाने साधुत्वार्थं तत्प्रक्षेपस्यैवावश्यकत्वात्।

न चैकवचनान्तपत्नीशब्दवत् प्रत्येकव्यक्त्यभिप्रायेणैकवचनप्रयोगः, तस्य पाशैकत्वानेकत्वसन्देहजनकतया निर्णायकत्वाभावात् प्रकृतिवद्भावबाधप्रसङ्गेनाप्रयोजकत्वात्।

अत एव 'द्विधाऽनयोस्त्वचा वाछ्यतात्' इत्यूहाङ्गीकारेऽप्येकैकत्वचि प्रयत्नद्वयसाध्यच्छेदनकत्वशङ्काजनकतया निर्णाय-

कत्वाभावादेवागत्या एकधापदेऽभ्यासाङ्गीकरणम् । प्रकृते तु विवक्षितार्थविषये संशयजनकत्वाभावात् यौगपद्यसम्पत्तये ऊहाङ्गीकरणमेव युक्तम् । तत्रापि षड्विंशतिप्रातिपदिके अन्यथात्वे प्रमाणाभावात् षड्विंशती षड्विंशतयः इत्येवं वचन एवोहः ।

सङ्ख्याप्रधानत्वाच्चास्य वाक्यस्यायमर्थो निर्णीयते । तथा हि सर्वत्र द्वौ त्रयः इत्यादयस्सङ्ख्याशब्दाः सङ्ख्येयप्रधाना एव, विंशत्याद्यास्तु सङ्ख्याप्रधानाः । दृष्टार्थता च तत्प्राधान्ये अन्यूनयोः पार्श्वयोरवद्यति' इति वचनात्साकल्यावगमेन तत्प्रकाशनस्य व्यङ्ग्यत्वात् । अतः प्रधानभूतषड्विंशतिप्रातिपदिकेनान्यथाभावः ।

न चैवं विंशतिर्गवामितिवत् वङ्क्रीणां गुणत्वे वङ्क्रिशब्दस्य षष्ठ्यन्तत्वापत्तिः, सङ्ख्याप्राधान्येऽपि देवदत्तादयः षट् 'पञ्चपञ्चाशतस्त्रिवृतस्संवत्सराः' इत्यादौ लक्षणया सङ्ख्येयशब्दस्य सङ्ख्यासामानाधिकरण्यदर्शनेन वङ्क्रिमल्लक्षणया वङ्क्रिशब्दस्यापि सामानाधिकरण्योपपत्तेः ।

न च लक्षणाभियैव सङ्ख्येयवङ्क्रिप्राधान्यं विंशतिर्गाव इति वदिति वाच्यं, तथात्वेऽपि षड्विंतिशब्दस्य सङ्ख्येयसामानाधिकरण्यसम्पत्तये तल्लक्षणाङ्गीकारस्यावश्यकत्वात्, नामार्थयोः पार्ष्ठिकान्वयवैलायामप्यभेदेनैवान्वय इति नियमानङ्गीकारे तु ममापि वङ्क्रीणां समवेतत्वसस्वन्धेन सङ्ख्यायामन्वयोपपत्तेर्न लक्षणा ।

न च वङ्क्रिशब्दस्य वङ्क्रिमल्लक्षणया सङ्ख्याविशेषणत्वे तस्या एकत्वेनैकवचनापत्तिः, बहुवचनस्य स्वशक्याश्रयसमवेतवृत्तित्वसम्बन्धेनैकत्वलक्षणार्थत्वात् । तव मतेऽपि सङ्ख्येय-

प्राधान्ये षड्विंशतिरित्येकवचनेन स्वशक्याश्रयसमवायिवृत्तित्व-सम्बन्धेन बहुत्वलक्षणाया आवश्यकत्वाच्च ।

न चैवं विनिगमनाविरहः, वङ्क्रिपदे जघन्यत्वस्यैव नियामकत्वात् । अतश्च प्रधानभूतषड्विंशतिपदेऽन्यथाभावानुपपत्तेः षड्विंशती अनयोर्वङ्क्रय इत्येवं वचनोह एवेति प्राप्ते—

'ता अनुष्ठ्योच्यावयतात्' इति वङ्क्रीणामेव परामर्शात् तासामेव प्राधान्यं, सङ्ख्या तु तद्विशेषणत्वेनोपात्ताऽपि साकल्यसूचिकेति नादृष्टार्थतापत्तिः । एवं च षड्विंशतिपदगतैकवचनस्य बहुत्वलक्षणार्थत्वेनासमवेतार्थत्वात् नैवोहसम्भावना । अपि तु षड्विंशतिप्रातिपदिक एव समवेतार्थत्वादूहः । अतश्च द्विपञ्चाशदनयोः वङ्क्रय इति समस्य वचनमेव युक्तम् । किञ्च-प्रकृतावप्येकैकस्मिन् पार्श्वे त्रयोदश त्रयोदश वङ्क्रयस्समस्यैव षड्विंशतिपदेनोक्ता इति इहापि समस्यैव सर्वाः प्रकाशयितव्याः इति गम्यते ।

यद्यपि च न्यायसिद्धमपीदं समासवचनं 'एकधा षड्विंशतिरिति द्विबहूनाम्' इत्याश्वलयनसूत्रमूलभूतश्रुत्या सुब्रह्मण्यानूहवदाभासीकर्तुमुचितं, तथाऽपि 'षड्विंशतिरिति समासेनैव' इति साङ्ख्यायनसूत्रमूलभूतश्रुत्या (सुब्रह्मण्या)पक्षे समासस्याप्यभ्यनुज्ञानान्न विरोधः । अत एव पक्षेऽभ्यासोऽपि द्विवारमेव न तु यावत्पशु । एकधाशब्देऽप्येवमिति द्रष्टव्यम् । वीप्सयैव यावत्पश्वेकप्रयत्नच्छेद्यत्वनिर्णयोपपत्तेः ॥ १ ॥

(२)—अश्वस्य चतुस्त्रिंशत्तस्य वचनाद्वैशेषिकम् ॥ १७ ॥ तत्प्रतिषिध्य प्रकृतिर्नि-

युज्यते सा चतुस्त्रिंशद्वाच्यत्वात् ॥ १८ ॥
ऋग्वा स्यादाम्नातत्वादविकल्पश्च न्याय्यः ।
तस्यां तु वचनादैरवत्पदविकारस्स्यात् ॥
सर्वप्रतिषेधो वा असंयोगात्पदेन स्यात् ॥

अश्वमेधे सवनीयपशुरश्वस्तूपरगोमृगौ चेतरौ विहितौ । तेषामेकप्रयोगत्वात् तन्त्रेणाध्रिगुप्रैषे पठनीये अश्वस्य चतुस्त्रिंशद्वङ्क्रिकत्वात् इतरयोः प्रत्येकं षड्विंशतिवङ्क्रिकत्वात् पूर्ववत्समस्यवचने षडशीतिरेषां वङ्क्रयः इति प्राप्तम् । तत्रायं मन्त्रस्समाम्नातः-'चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिस्समेति अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्यविशस्ता ' इति । अयं लिङ्गप्रकरणाभ्यां वङ्क्रिविशसनप्रैष एव विनियुज्यते । न तु याज्यादौ । अतश्चौपदेशिकेनानेनातिदेशप्राप्तस्याध्रिगोरश्वविषये वङ्क्रिप्रकाशनमात्रांशे बाधात् अश्वस्यायं मन्त्रोऽन्ययोस्तु द्विपञ्चाशदनयोर्वङ्क्रय इति समास इत्यपि प्राप्तम् । तत्रेदमपरं वचनं 'न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येवब्रूयात् ' इति । तदनेन किं विधीयत इति चिन्तायां—

न तावदत्र प्रतिषेधविधिः । स हि चतुस्त्रिंशत्पदमात्रप्रतिषेधो वा स्यात् तदृक्प्रतिषेधो वा उभयथाऽपि विहितप्रतिषेधे विकल्पापत्तेरसम्भवः । अन्त्ये ऋग्लक्षणापत्तिश्च । ऋक्प्रतिषेधे च षडशीतिरित्येवं समासस्यैव प्राप्तेष्षड्विंशतिपदयुक्ताध्रिगुप्रैषस्याप्राप्तत्वेन तस्यापि विधाने वाक्यभेदापत्तेश्च । षड्विंशतिपदेन षडशीतिपदोपेताध्रिगुप्रैषलक्षणया तस्यानुवादत्वे च लक्षणैव दोषः । अतो न गिरागिरेतिवत् न चतुस्त्रिंशदिति

निषेधानुवादः। षड्विंशतिरिति च षड्विंशतिपदमात्रस्य पाठप्राप्ते मन्त्रे इरापदवद्विधानम्। तद्वदेव च निषेधानुवादबलाच्च चतुस्त्रिंशत्पदस्थानापन्नत्वम्। विधानबलाच्च मन्त्रान्तर्गतषड्विंशतिपदेनाश्ववाङ्क्रिसङ्ख्यालक्षणायामपि न दोषः।

न चैवकारेण विधिशक्तिप्रतिबन्धात् न षड्विंशतिरित्यस्य विधित्वमिति वाच्यं, एवकारस्य विधिशक्तिप्रतिबन्धकत्वे मानाभावात्। 'अत्र ह्येवावपन्ति' इत्यादौ तद्युक्तेऽपि विधिदर्शनाच्च। न चैवकारेण स्वार्थ एव विधेयत्वापादनेन षड्विंशतिपदे विधेयत्वप्रतिबन्ध इति वाच्यं, षड्विंशतिपदस्यैव विधित्वमङ्गीकृत्यैवकारस्यैवायोगव्यावृत्तिरूपं फलमादाय चतुस्त्रिंशत्पदव्यावृत्त्याऽन्ययोगव्यावृत्तिरूपं फलमादायैव वाऽनुवादत्वोपपत्तिः। अतश्चाश्वे 'षड्विंशतिर्वाजिनो देवबन्धोः' इति मन्त्रः, इतरयोस्तु प्राकृत एव समासेनेति प्राप्ते—

न तावदत्रैवकारोऽयोगव्यावृत्त्यर्थकतयाऽन्ययोगव्यावृत्त्यर्थकतया वाऽनुवादः, वैयर्थ्यापत्तेः। पदमात्रेण स्तुत्यनुपपत्तेश्च। अन्ययोगव्यावृत्त्यनुवादस्य निषेधेनैव सिद्धौ पुनरनेन करणे सुतरां वैयर्थ्याच्च। निरुक्तद्विविधैवकारार्थविधौ चायोगव्यावृत्तेस्तावत् षड्विंशतिपदस्य पक्षेऽप्यप्राप्तत्वादयोगस्याप्रसक्तत्वेन विधानासम्भवः। षड्विंशतिपदविधानावश्यकत्वे तत एव तस्याः प्राप्तत्वाच्च। अत एव नान्यनिवृत्तिः तद्विधाने विकल्पस्यावश्यकत्वाच्च। अत एव 'अत्र ह्येवावपन्ति' इत्यादावेवकारार्थविधौ न तौ पशौ करोतीतिवत् विकल्पापत्तिरित्युक्तं कौस्तुभे।

वस्तुतस्तु निषेधसमभिव्याहृतैवकारस्थले प्रतिप्रसवरूपता स्वविषयस्य अनुवाद्यतैव वा अनुभवसिद्धा। शब्दशक्तिवैचित्र्य-

स्यानुभव सिद्धस्यापह्नोतुमशक्यत्वात् ।न च वैशेषिकमन्त्रे षडिंशतिपदस्य प्रतिप्रसवस्सम्भवति । न च प्राकृत एवाध्रिगौ षडशीतिपदप्राप्तौ तस्य प्रतिप्रसवः, तथात्वेन चतुस्त्रिंशदिति निषेधानुवादानुपपत्तेः । वैशेषिकमन्त्रेणाश्वांशे प्राकृताध्रिगुबाधेन तत्र षड्विंशतिपदप्रतिप्रसवानुपपत्तेश्च । तूपरगोमृगयोर्द्विपञ्चाशत्पदप्राप्तौ तत्र षड्विंशतिपदप्रतिप्रसवेऽपि निषेधानुवादानुपपत्तिस्तदवस्थैव ।

आश्वलायनमताङ्गीकारे तु तत्र षड्विंशतिपदस्यैव सत्त्वात् प्रतिप्रसवानुपपत्तिः । अत एवकाररूपतात्पर्यग्राहकानुरोधेन षड्विंशतिपदे स्वपदोपलक्षितषडशीतिपदोपेताध्रिगुप्रैषलक्षणया तस्यैव प्रतिप्रसवः । सोपि न विधेयः, एवकारेणानुवाद्यत्वावगमात् । तत्प्राप्तिश्चेत्थं न चतुस्त्रिंशदित्ययं वैशेषिकमन्त्रप्रतिषेधविधिः; चतुस्त्रिंशत्पदेन लक्षणया तदादिसर्वमन्त्राभिधानात् पदमात्रप्रतिषेधे तत्र षड्विंशतिपदप्राप्त्यभावेन षड्विंशतिरित्येव ब्रूयात् इत्यस्यानुवादत्वानुपपत्तेः । अतो वैशेषिकमन्त्रप्रतिषेध एवायम् । अतश्च न तौ पशौ करोतीतिवत् विहितप्रतिषिद्धत्वात् विकल्पः । अभावपक्षे च अतिदेशप्राप्तस्य षडशीतिपदोपेतस्याध्रिगोरेव न्यायेन प्राप्तत्वात् षड्विंशतिरित्येवेत्यनुवादः।

आश्वलायनमते तु षड्विंशतिः षड्विंशतिः चतुस्त्रिंशदेषां वङ्क्रयः इत्येवमाकारकाध्रिगुप्रैषस्य षड्विंशतिपदेन लक्षणात्तस्यैवायमनुवादः ।

एतेनैवकारयुक्तवाक्येनोक्तविधाध्रिगुप्रैषस्यैव प्रतिप्रसवविधिः वाचनिकेन च त्राऽध्रिगुप्रैषेण पाठप्राप्तस्य वैशेषिकमन्त्रस्य बाधात् न चतुस्त्रिंशदिति निषेधो नित्यानुवादः । वैशेषिक-

मन्त्रस्य वाचस्तोमादौ विनियोगाच्च न वैयर्थ्यमपि । एवं च विकल्पोऽपि नाष्टदोषदुष्टो भविष्यति। एवकारश्चायोगव्यावृत्तेरन्ययोगव्यावृत्तेर्वाऽनुवादो भविष्यतीत्यपास्तं, निषेधपूर्वकैवकारस्थले एवकारसम्बन्धस्यानुवाद्यत्वप्रतीतेः तादृशस्थले यच्छब्दादिवदेवकारस्यापि स्वसम्बन्धिविधिप्रतिबन्धकत्वात् ॥

अत एव 'उपवासाः पतन्ति' इत्युक्ते उपवासानेव कुरु न तु प्रवासं गच्छ इत्यत्र प्रवासनिवृत्तिरेव विधेया न तूपवास इत्यनुभवसिद्धम् । यत्र तु न निषेधपूर्वकता तत्रानुभवबलादेवकारसम्बद्धस्यापि विधाने न काचित्क्षतिः, यथा 'अत्र ह्येवावपन्ति' इत्यादौ। प्रकृते तु एवकारसम्बन्धिनोऽध्रिगुप्रैषस्याविधेयत्वात् न चतुस्त्रिंशादित्येव निषेधविधिः । शास्त्रप्राप्तस्य निषेधाच्च 'नतौ पशौ करोति' इतिवद्विकल्पः। षड्विंशतिरित्येवेत्ययं अकरणपक्षे न्यायप्राप्तानुवादस्सन् अकरणप्रशंसया करणस्यैव निन्दार्थवादः। एवं च वैशेषिकमन्त्रस्य प्रकरणमपि न बाधितं भवति। विकल्पस्तु बहुवचनान्तपाशमन्त्रवन्न विरुध्यते ॥

न चैवमध्रिगुप्रैषस्याविधेयत्वेऽपि एवकारार्थस्यैव वैशेषिकमन्त्राख्यान्यनिवृत्तिरूपस्य विधेयत्वोपपत्तेः न चतुस्त्रिंशदित्यस्यैवानुवादत्वं किं न स्यादिति वाच्यं, एवमपि शास्त्रप्राप्तनिवृत्तेरविशेषेण विकल्पस्यापरिहार्यत्वात् ॥

अत एव 'अत्र ह्येवावपन्ति' इत्यादावप्राप्तपरिसङ्ख्यैवाङ्गीकृता कौस्तुभे । तन्त्ररत्नकारस्य तु तत्रैवकारार्थविधिमङ्गीकुर्वतस्तत्र विकल्पापत्तिस्तद्वदेवेह तदापत्तिरित्ययं पर्यनुयोगो दुरुद्धरः न तु मम । न च तवापि विनिगमनाविरहात्तादवस्थ्यं, एवकारस्यायोगव्यावृत्तत्वन्ययोगव्यावृत्तिरूपनानार्थकतया सन्दि-

ग्धार्थकत्वेन निस्सन्दिग्धार्थकनिषेधस्यैव विधित्वाङ्गीकारात्। अतस्सिद्धोऽश्वमेधेऽप्यध्रिगावूहः। अत्र च सूत्रव्याख्यानुरोधेन किञ्चिद्वैलक्षण्येन भाष्यकारेणैकाधिकरण्यं वार्तिककारेण च अधिकरणद्वयमाश्रितम्। तत् प्रमेयमात्रलेखनप्रवृत्तेन मयोपेक्षितम्॥

वनिष्ठुसन्निधानादुरूकेण वपाभिधानम् ॥२२॥

अध्रिगुप्रैष एव 'वनिष्ठुमस्य मा राविष्टोरूकं मन्यमानाः' इति श्रुतम्। तत्रोरूकपदेन किं उलूकस्याभिधानं किं वा वपाया इति चिन्तायां—

वपायामुरूकशब्दप्रयोगाभावादन्यत्र वेदे लकारस्थाने रेफदर्शनाल्लोकेऽपि च रोमाणि लोमानीत्यादौ रलघटितपदयोस्समानवृत्तिकत्वदर्शनात् उरूकपदेनोलूकाभिधानं; ततश्चोलूकबुद्ध्या वनिष्ठुं माच्छिन्दतेति मन्त्रार्थः। ततश्च वपाऽनेकत्वे नोरूकशब्दस्योह इति प्राप्ते—

न तावद्वनिष्ठोस्सर्वथैव लवनं निषिद्ध्यते हृदयादिवत्तस्य हविष्ट्वेन लवनस्यावश्यकत्वात्। नाप्युलूकसादृश्यबुद्धिर्लवनकाले निषिद्ध्यते अदृष्टार्थत्वापत्तेः। अत उरूकशब्देनावयवयोगेन वपाभिधानमेव। वपोद्धरणकाले वपां मन्यमाना भ्रान्त्या वानिष्ठुं मा छिन्दतेत्यर्थः। वनिष्ठोर्वपायागोत्तरकालं लवितव्यत्वात्। अतस्तस्य पूर्वं लवनप्रतिषेधवचनं दृष्टार्थं भवति। अवयवयोगश्च उरुशब्दो विस्तीर्णवाची दीर्घश्छान्दसः। कासशब्दो मेदोवाची नामैकदेशे नामग्रहणात् कशब्दोपि तद्वचन एव ततश्च पदद्वयमिदं समासो वा। विस्तीर्णं मेदो वपाख्यं च तदर्थः।

न च रूढ्या योगबाधः, रेफघटितस्य पदस्योलूकेऽपि रूढ्यभावात्। अतश्च वपानेकत्वे उरूणि काणीति पदद्वयपक्षे। उरूकाणीति समासपक्षे ऊहः कार्यः॥२॥

(३)—प्रशसाऽस्यभिधानम् ॥ २३ ॥ बाहुप्रशंसा वा ॥ २४ ॥

तत्रैव प्रैषे 'प्रशसा बाहू' इति श्रुतम्। अत्र कृणुतादित्यनुषज्यते। तत्र प्रशसा इत्यनेन किं करणीभूतश्शास उच्यते उत प्रशस्तत्वमिति चिन्तायां—प्रशंसायामदृष्टार्थत्वापत्तेः प्रशसेति तृतीयान्तं अकारलोपेन ह्रस्वेन च शासवाची। शासशब्दश्च 'असिं वै शासमाचक्षते' इत्यादिलिङ्गादसिवचनः। ततश्च असिना खड्गेन बाहू छिन्दतेति प्रैषार्थः।

यद्यपि च स्वधितिरेव पशुप्रकरणे सामान्यतश्छेदने विहितस्तथाऽपि बाहुच्छेदने मान्त्रवर्णिको विशेषविधिरनेन न विरुध्यते। अतश्चाश्वमेधे 'शतं राजता हरितत्सरवोऽसयो भवन्ति' इति असिबहुत्वस्य विधानात् तदनुरोधेनोह इति प्राप्ते—

भाष्यकारादिभिरेवं समाहितं—प्रत्यक्षविहितस्वधितिसत्त्वे मान्त्रवर्णिकशासविधिकल्पनायां गौरवात् प्रशसापदं प्रशस्तत्वपरमेवेति। तत्तु 'स्वयमेव दशप्रयाजानिष्ट्वाऽऽह शासमाहर' इति वाक्यस्य लिखितत्वात् शासस्यापि पशौ विहितत्वेनोपेक्षितम्।

वस्तुतस्तु बोधायनादिसकलकल्पपर्यालोचनया शासपदस्य स्वधितावपि शक्त्यवगमात् बाहुच्छेदनेऽपि स्वधितेरेव प्रसक्तेर्न मान्त्रवर्णिकद्रव्यान्तरकल्पना।

यत्तु 'असिं वै शासमाचक्षते' इति लिङ्गं तत् स्वधितेरेव असितुल्यत्वेन स्तुत्यर्थम्।

असिशब्दस्य निघण्टौ स्वधितिपर्यायत्वेन पाठाद्वा शासशब्दस्य स्वधितिपर्यायत्वसूचनार्थं न विरुद्धचते । अतश्च शासस्य बाहुच्छेदने कारणत्वसत्त्वेऽपि प्रशासेति पदेन न तदभिधानम् । तकारमात्रलोपस्य बाहुलकत्वे सम्भवति अकारलोपस्य ह्रस्वस्य च बाहुलकत्वाङ्गीकारे प्रमाणाभावो; द्वितीयाद्विवचनान्तत्वाङ्गीकारेण बाहुसामानाधिकरण्ये सम्भवति वैयधिकरण्यस्यान्याय्यत्वाच्च । द्विवचनस्याकारादेशस्तु स्वतन्त्रसूत्रविहित इति न तस्य बाहुलकत्वम् । एवं च 'शला दोषणी' इत्यादिप्रायपाठोपि सङ्गच्छते । अतश्च प्रशासापदेन प्रशस्तत्वाभिधानात् तस्य चाविकलत्वसूचनार्थतया दृष्टार्थत्वात् बाहुविवृद्धावूहः । तत्रापि प्राकृतपदस्य बाहुद्वये छान्दसत्वात् बाहुबहुत्वे द्विपाशकायां विकृतौ बहुवचनान्तपाशमन्त्रस्येवाप्रवृत्तेः स्वाधीने शब्दप्रयोगे इतिन्यायेन प्रशस्तान् बाहूनित्यूहः । पूर्वपक्षे च प्रशासैरिति द्रष्टव्यम् ।

इदं च महाभाष्यस्वारस्यात्कान्तधातोरिव सान्तधातोरपि तुल्यन्यायत्वात् क्विब्विचौ न स्त इत्यङ्गीकृत्य शासपदस्यैव शसेति छान्दसमित्यापाद्य प्रशंसार्थत्वमुक्तम् । यदा तु महावार्तिकस्वारस्यात् बहुतरप्रयोगाच्च सान्तधातोः क्विब्विचाविष्येते तदा पठ्यमानस्वरानुगुण्यात् छसु हिंसायां इत्यनुशिष्टस्य हिंसार्थकस्य शस्धातोः लुप्तक्विवन्तस्य तृतीयान्तरूपाश्रयणेऽपि छान्दसत्वकल्पनाभावात् हिंसासाधनस्वधितिकरणकत्वावगतेः याज्ञिकसम्मतश्शासवृद्धावेवोहोऽनुसन्धेयः ॥ २ ॥

(४)– श्येनशलाकश्यपकवषस्त्रेकपर्णेष्वाकृतिवचनं प्रसिद्धसन्निधानात् ॥ २५ ॥ कात्स्न्यं

वा स्यात्तथाभावात् ॥ २६ ॥ अध्रिगोश्च तदर्थत्वात् ॥ २७ ॥

तत्रैव प्रैषे 'श्येनमस्य वक्षः कृणुतात्' इति श्रुतम्। तत्र श्येनपदं इवशब्दानुषङ्गेण वक्षस उपमार्थमित्यविवादम्। इवशब्दार्थश्च सादृश्यमित्यपि। तच्च बहुतरधर्मैस्सम्भवे कतिपयधर्मैरन्याय्यत्वादाकारविशेषेणैव। अतश्च वक्ष उद्धृत्य कर्तनादिना श्येनाकारतां सम्पाद्य यष्टव्यामिति। वक्षोविधिस्तु पशुवत् प्रकृतित्वेनेति प्राप्ते—

अवदानवाक्येऽपि 'अथ वक्षसः' इति श्रवणात् तस्यैव हविष्ट्वप्रतीतेर्न कर्तनादिना तन्नाशश्शक्यः कल्पयितुम्। तेन सादृश्यसम्पत्तिरविकलोद्धरणादेव जायत इति अविकलोद्धरणं प्रकाशयितुमेव सादृश्यानुवादो दृष्टार्थत्वात्। इतरथा श्येनाकारताया मान्त्रवर्णिक्या विधाने गौरवमदृष्टार्थता वाऽऽपद्येत।

एवं 'शला दोषणी, कश्यपेवांसा, कवषोरू, स्रेकपर्णा, अष्ठीवन्ता' इत्यादिष्वपि द्रष्टव्यम्। शला शलाके, कश्यपेव कच्छपाविव। कवषा गतिसाधनाऽश्वादियानसदृशे। स्रेकपर्णा करवीरपर्णाकृती। अष्ठीवन्ता अस्थिसंयुक्तौ। अत्र पूर्वपक्षे सिद्धान्ते च श्येनादीनामुपमानत्वस्यावश्यकत्वात् तत्रापि चेवशब्दश्रवणेन सिंहो देवदत्त इतिवत् गौणत्वाभावात् 'सिंह इवैते वीराः' इतिवत् वक्षोविवृद्धौ अनूहितश्येनपदेनैवोपमानसिद्धेरनूह एव श्येनादिपदानां न्यायसिद्धः कल्पसूत्रकारसम्मतश्चेति। यद्यपीदमधिकरणं नोहविचारोपयोगि तथाऽपि प्रासङ्गिकत्वान्न दोषः ॥ ४ ॥

(५)–प्रासङ्गिके प्रायश्चित्तं न विद्यते परार्थत्वात्तदर्थे हि विधीयते ॥ २८ ॥

अग्निहोत्रे 'अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेत् यस्याग्निरुद्धृतोऽहुतेऽग्निहोत्र उद्धायेत्' इति श्रुतम्। तत्र किमिदं प्रायश्चित्तं दर्शार्थं प्रणीतस्याग्नेरग्निहोत्रकाले उद्धाने भवति नेति चिन्तायां—

यच्छब्दसमभिव्याहृतेन लिङा पदश्रुत्या निमित्तत्वमुद्धानस्य प्रतीयते। न च तदुद्धानमात्रस्य नाशापरपर्यायस्य सम्भवति यात्कञ्चिन्नाशस्य सर्वदा सत्त्वेन कादाचित्कत्वव्याप्यनिमित्तत्वस्यासम्भवात्। अतो हविरार्तिन्यायेन प्रतियोगितासम्बन्धेनाग्निविशेषणम्। तत्रापि चाग्नेरवयवशो नाशस्य सर्वदा सत्त्वादग्नित्वावच्छिन्नजगतीतलवर्तिसर्वाग्निनाशस्य च कदाऽप्यसम्भवात् अवश्यं करिष्यमाणाग्निहोत्रप्रयोगोपयोग्यग्नित्वावच्छिन्नप्रतियोगिताकनाशस्यैव प्रकरणादिना निमित्तत्वावसायादुक्तप्रयोगोपयोग्यवयविनाश एवेदम्।

अवश्यं चायमर्थो भेदनहोमादावपि वक्तव्य एव। प्रकृतप्रयोगोपयोगिकपालनाशस्यैव निमित्तत्वात्। अतस्तद्धदेवेदमारादुपकारकमग्निहोत्राङ्गम।

अस्तु वा नष्टस्याग्नेरुत्पादकाकांक्षायां वैमृधन्यायेन पदान्तरकल्पनयाऽस्याग्निहोत्रापेक्षितादृष्टरूपाग्न्युत्पादकत्वकल्पनया सन्निपत्योपकारकत्वमेव। भेदनहोमस्य दृष्टरूपकपालजनकत्वस्य बाधितत्वादारादुपकारकत्वमिति विशेषः।

अत एवाग्न्युत्पादनप्रयोजनाभावादग्निहोत्रे हुते एतत्प्रायश्चित्तवैयर्थ्यापत्तेः अहुते अग्निहोत्र इत्यनुवादः । भेदनहोमस्तु कपालकार्ये निष्पन्नेऽप्युद्वासनात्पूर्वं भवत्येवेति विशेषः । सर्वथा दर्शार्थं प्रणीतस्याप्यग्नेरग्निहोत्रोपयोगित्वात् निमित्तसंस्कार्ययोरुभयोरपि सत्त्वेन तदर्थं कर्तव्यैवेष्टिः । न च तथाऽपि दर्शादौ वैधसमन्त्रकोद्धरणाभावादुद्धृताग्निनाशाभावेन निमित्ताभावः, उद्धृतत्वस्य हविरुभयत्ववदग्निविशेषणत्वेनाविवक्षितत्वादिति प्राप्ते-

नात्रोद्धृतत्वमुद्देश्यविशेषणं, करिष्यमाणप्रयोगोपयोग्युद्धृतत्वावच्छिन्नप्रतियोगिताकविनाशस्यैव निमित्तत्वात् । वैधस्यैवोद्धरणस्य निमित्तकोटिप्रवेशाच्च नातिप्रसङ्गः । उद्धृतश्चाग्नेरेवेति अग्निपदं नित्यानुवादः । इतरथा अजस्रपक्षे उद्धृतत्वाभावात् उद्धृत इत्यस्य पाक्षिकानुवादत्वापत्तेः । गार्हपत्यादिनाशेऽपि ज्योतिष्मतीष्ट्यापत्तेश्च । अतश्च दर्शार्थं प्रणीतेनैवाग्निहोत्रानुष्ठानादुद्धरणस्य प्रसङ्गसिद्धकार्यतया लोपेन निमित्ताभावादेव न नैमित्तिकानुष्ठानम् । अपि तु अन्वाहिताग्निनाशप्रायश्चित्तमेव ।

अत्र च पूर्वपक्षे उद्धृताग्न्यभावमात्रेणान्यथात्वाद्धाक्तोहप्रसक्तेः सिद्धान्ते तदपवादात् सङ्गतिः ॥५॥

(६) धारणे च परार्थत्वात् ॥ २९ ॥ क्रियार्थत्वादितरेषु कर्म स्यात् ॥ ३० ॥

अनारभ्य धार्यो गताश्रिय आहवनीयः" इति श्रुतम् । तत्र गताश्रीत्वं ग्रन्थान्तरे अन्यथा व्याख्यातमपि तन्त्ररत्ने प्राप्तश्रीत्वमिति व्याख्यातम् । तदिह यदा तन्निमित्तके आहवनीय-

धारणे कृते अग्निहोत्रकाले स उद्धायेत् तदा तदुत्पत्तयर्थं ज्योतिष्मतीष्टिः कर्तव्या न वेति चिन्तायां—

निमित्तसंस्कार्ययोस्सत्त्वात् कर्तव्या । न च धारणे कृते तत्प्रयोगोपयोग्युद्धरणाभावादकरणं, अनुद्धृतस्य धारणायोगेन ततः पूर्वं करिष्यमाणसर्वाग्निहोत्रप्रयोगार्थं तन्त्रेण समन्त्रकोद्धरणस्याक्षेपात् ।

इदं धारणं न गतश्रीत्वे निमित्ते पुरुषसंस्कारार्थं फलकल्पनापत्तेः । धार्य इति यत्प्रत्ययेनाहवनीयस्य कर्मत्वावगतेश्च । षष्ठीश्रुतिस्तु निमित्तफलकतया कर्तृत्वानुवादेनापि 'वैश्यस्य' इतिवन्नानुपपन्ना । किन्तु आहवनीयसंस्कारार्थमेव । आहवनीयस्य च धारणव्यातिरेकेणाधानेन जातत्वात् स्वरूपे आनर्थक्यप्रसक्तौ अव्यभिचारितक्रतुसम्बन्धोपस्थितकरिष्यमाणसर्वक्रत्वपूर्वसाधनीभूताहवनीयसंस्कारकत्वसिद्धिः । एवं च धारणस्य पुरुषार्थत्वोक्तिस्तन्त्ररत्नीया निरस्ता । अत एव करिष्यमाणकर्मणां यावज्जीवं सत्त्वात् गतश्रीत्वोत्तरं पुनर्दारिद्र्येऽपि यावज्जीवं धारणसिद्धिः । पुरुषार्थत्वपक्षे तु यावज्जीवतायां प्रमाणान्तरं मृग्यं स्यात् । सर्वकर्मार्थेनापि च धारणेनाक्षिप्तं उद्धरणं कांस्यभोजिन्यायेनाग्निहोत्रोपकारकतया समन्त्रकमेवाक्षिप्यते।

न च यत्किञ्चित्कर्मार्थमुद्धृतस्याग्नेरेव गतश्रीत्वे निमित्ते धारणोपपत्तेर्न स्वतन्त्रोद्धरणाक्षेपकत्वमिति वाच्यं, मध्याह्नादौ यदा कस्यापि कर्मणो न करणं तदैव गतश्रीत्वरूपानिमित्तप्राप्तौ धारणस्यावश्यकत्वेन तदनुरोधेनोद्धरणाक्षेपस्यावश्यकत्वात्। अतो निमित्तसत्त्वात्कर्तव्यैव ज्योतिष्मतीष्टिरिति प्राप्ते—

यदा कर्ममध्ये गतश्रीत्वं तदोद्धरणानाक्षेपकत्वादन्यदा चाक्षेपकत्वे वैरूप्यापत्तेः लाघवेन परप्रयुक्तोद्धरणोपजीविना धारणाविधिना यत्किञ्चित्कर्मार्थमुद्धृतस्यैव गतश्रीत्वे निमित्ते धारणाविधानम्। अत एव तदनुरोधेन निमित्तस्याप्याहिताग्नित्वादिनेव जीवनस्य सङ्कोचो न विरुध्यते। अतो धारणविधिना अग्निहोत्रविधिना वा परप्रयुक्ताग्निलाभेनोद्धरणानाक्षेपात्कारिष्यमाणाग्निहोत्राङ्गभूताग्निनाशे उद्धृतत्वावच्छिन्नप्रतियोगिताकनाशरूपनिमित्ताभावान्नैमित्तिकाकरणम्। न चान्यकर्मार्थं प्रणीतस्य धारणे निमित्ताभावेऽपि अग्निहोत्रार्थमेवोद्धृतस्य धारणे निमित्तसद्भावात् कथं प्रयोगान्तरे तन्नाशे प्रायश्चित्ताभावः। कपालनाशादिवत् यत्प्रयोगव्यक्त्युपयोगिनी योद्धरणव्यक्तिः तत्संस्कृतत्वावच्छिन्ननाशस्यैव तत्प्रयोगव्यक्त्युपयोग्यग्निसम्पादकतया ज्योतिष्मतीष्टिनिमित्तत्वात्, इतरथाऽतिप्रसङ्गापत्तेः। अतो नाज्यस्थेदं प्रायश्चित्तम्। अपि तु सामान्यविहितं मनस्वतीहोमाद्येवेति सिद्धम् ॥ ६ ॥

(७)—न तूत्पन्ने यस्य चोदनाऽप्राप्तकालत्वात्॥

यदा दर्शार्थमग्निप्रणयनं क्रियते तदा तस्मिन्नेवाग्नौ सायंप्रातः क्रियमाणाग्निहोत्राङ्गमुद्धरणं तन्मन्त्रश्च 'वाचा त्वा होत्रा' इत्यादिः पठनीयो न वेति चिन्तायां—

दर्शार्थं प्रणीतस्याप्यग्नेरग्निहोत्राङ्गत्वात् तत्संस्कारकमुद्धरणं तदङ्गभूतश्च मन्त्रः प्रयोजकसत्त्वाद्धवत्येव। न च प्रणयनस्य प्रातःकालीनत्वादुद्धरणेऽपराह्णकालीनत्वाभावः। प्रधानाङ्गभूतोद्धरणाद्यनुरोधेनतदङ्गभूतकालस्यसमयाध्युषितकालवदनारभणीयत्वात्॥

वस्तुतस्तूद्धरणस्याग्नेर्वा अग्निहोत्राङ्गत्वाभावेऽपि प्रणयनाक्षिप्तार्थिकोद्धरणस्य तत्संस्कृताग्नेर्वा अग्निहोत्रोपकारकत्वस्य तावत्सत्त्वात् तावतैवेज्यार्थयोर्दधिपयसोः प्रणीताधर्मवत् मन्त्रप्राप्त्युपपत्तिरिति प्राप्ते—

प्रातःकालक्रियमाणदर्शार्थाग्निप्रणयनवेलायामाग्निहोत्रस्य निमित्ताद्यभावेनानुपस्थितत्वात् तदङ्गभूतोद्धरणस्य कालाभावेन सुतरामनुपस्थितेः न मन्त्रस्य तदानीं सम्भावना। न चाग्निहोत्रेणैव स्ववैगुण्यपरिहारार्थमकालेऽपि तदाक्षेपः। तस्य प्रसङ्गासिद्धाग्निलाभेन तदुद्धरणादिसंस्कारकार्यस्य लाभेन चोद्धरणस्यैवानाक्षेपे तन्मन्त्रादेस्सुतरामनाक्षेपात्, अतः प्रयाजानां पशुपुरोडाशे अनङ्गत्ववत् उद्धरणतन्मन्त्रादेरपि तस्मिन्नाग्निहोत्रप्रयोगे सुतरामङ्गत्वाभावादेव न तदभावे वैगुण्यप्रसङ्गः। अतो न मन्त्रस्य कालान्तरप्रयुक्तान्यथाभावात्मको भाक्त ऊहः, अपि तु बाध एवेति सिद्धम् ॥ ७॥

(८)—प्रदानदर्शनं शूयणे तद्धर्मभोजनार्थत्वात् संसर्गाच्च मधूदकवत् ॥३२॥ संस्कारप्रतिषेधश्च तद्वत् ॥३३॥ तत्प्रतिषेधे च तथाभूतस्य वर्जनात् ॥३४॥ अधर्मत्वमप्रदानात् प्रणीतार्थे विधानादतुल्यत्वादसंसर्गः ॥३५॥ परो नित्यानुवादस्स्यात् ॥३६॥ विहितप्रतिषेधो वा ॥३७॥ वर्जने गुण-

भावित्वात्तदुक्तप्रातिषेधात्स्यात्कारणात्केव-
लाशनम् ॥३८॥ व्रतधर्माच्च लेपवत् ॥३९॥
रसप्रतिषेधो वा पुरुषधर्मत्वात् ॥ ४० ॥

'आदित्यः प्रायणीयः पयसि चरुः' इत्यत्र पयसि इत्यधिकरणत्वनिर्देशात् न पयसो हविष्ट्वं. अपि तु चरोरेव तद्धितसामानाधिकरण्येन तस्यैव देवताम्बन्धात् । पयसस्तु श्रपणाधिकरणत्वमात्रं अतो न तत्र प्रदेयधर्माः । प्रणीताधर्मास्तु तत्र भवन्तीति प्राञ्चः ॥

वस्तुतस्तु-संयवनार्थत्वात्तेषां चरौ च तदभावात् तेऽपि न भवन्त्येवेत्युक्तम् । प्रदेयधर्मप्राप्त्याशङ्का तु यद्यपि नान्या काचित् तथाऽप्यादित्यप्रकरणे 'अयजुषा वत्सानपाकरोति अपवित्रवति गां दोहयति' इत्यादिप्राप्तवत्सापाकरणाद्यनुवादेन यजुरादिपर्युदासविधिरेवोत्पत्तिवाक्ये सप्तम्यर्थाविवक्षातात्पर्यग्राहकः अभ्युदितेष्टिवादिति प्राप्ते—

नित्यानुवादत्वेनाप्यस्योपपत्तेर्न सप्तम्यर्थाविवक्षा । वस्तुतस्तु लौकिकसिद्धपयोग्रहणस्यैव तदा प्रसक्तेर्दोहनादिकर्तव्यताया अप्राप्तत्वेनावश्यविधेयत्वेऽपीतरस्य सर्वस्यैव नित्यानुवादत्वात् न सप्तम्यर्थाविवक्षा । अतो न तत्र प्रदेयधर्माः । अभ्युदितेष्टौ तु उत्तराधिकरणे वक्ष्यते ॥ ८ ॥

(९)-अभ्युदये दोहापनयः स्वधर्मा स्यात्प्रवृत्तत्वात् ॥४१॥ श्रुतोपदेशाच्च ॥४२॥

अभ्युदितेष्टावपि तर्हि सप्तमीनिर्देशात् दधिशृतयोरधिकरणत्वावगतेर्न प्रदेयधर्मा भवेयुः। 'सह श्रपयति' इत्यस्यापि पूर्ववदेव नित्यानुवादत्वोपपत्तेः। न च क्षोदिष्ठादिद्रव्योद्देशेन तत्र देवतामात्रविधानात् दध्याद्यधिकरणत्वस्यापि विधौ वाक्यभेदापत्तेस्तस्य प्रदेयत्वमिति वाच्यं, द्रव्यद्वयोद्देशेऽपि वाक्यभेदतादवस्थ्यात्। तद्धरं सप्तमीश्रुत्या विधेयानेकत्वनिमित्तवाक्यभेदस्यैवाङ्गीकारः। वस्तुतस्तु भावनान्तरस्यैव तत्र षष्ठेऽङ्गीकारात्। अधिकरणत्वस्यापि विधौ न वाक्यभेद इति प्राप्ते—

'यदि गृहीतं हविरभ्युदियात् अथो तर्ह्येतानेव तण्डुलान् सुफलीकृतान् दधि पयश्च' इत्यादि लिङ्गादपनयविधेश्च प्रकृतयागीययोरेव दधिपयसोर्भावनान्तरेऽपि प्रदेयत्वेनैवोपादेयत्वस्य षष्ठे व्यवस्थापितत्वादधिकरणत्वविवक्षानुपपत्तेर्भवन्त्येव प्रदेयधर्माः॥९

(१०)—अपनयो वाऽर्थान्तरे विधानाच्चरुपयोवत् ॥ ४३ ॥ लक्षणार्था शृतश्रुतिः ॥४४॥

'यः पशुकामस्स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात्, ये क्षोदिष्ठास्तानग्नये सनिमतेऽष्टाकपालं निर्वपेत्, ये मध्यमास्तान् विष्णवे शिपिविष्टाय शृते चरुं, ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधिश्चरुम्' इत्यत्रापि यद्यप्यपनयविध्यभावात् कर्मान्तरत्वं षष्ठे उपपादितं, तथाऽपि अभ्युदितेष्टितुल्यश्रुतित्वात् वत्सापाकरणश्रुतिबलाच्च सप्तम्यर्थाविवक्षया प्रदेयत्वावगतेः प्रदेयधर्मान् मन्वानस्योत्तरम्। वत्सापाकरणविधिबलेन हट्टस्थपयोव्यावृत्तावपि अधिकरणत्वाविवक्षायां प्रमाणाभावात् प्रदेयत्वानुपपत्तेर्न प्रदेयधर्माः आदित्यचरुवत्॥ १०॥

(११)–श्रयणानां त्वपूर्वत्वात्प्रदानार्थे विधानं स्यात् ॥ ४५ ॥ गुणो वा श्रयणार्थत्वात् ॥ अनिर्देशाच्च ॥ ४७ ॥ श्रुतेश्च तत्प्रधानत्वात् ॥ ४८ ॥ अर्थवादश्च तदर्थवत् ॥ ४९ ॥ संस्कारं प्रति भावाच्च तस्मादथ प्रधानं स्यात् ॥ ५० ॥

'सोमे पयसा मैत्रावरुणं श्रीणाति सक्तुभिर्मन्थिनम्' इत्यादौ तृतीयया पयःप्रभृतीनां श्रयणं प्रति गुणत्वावगमात् सत्यपि सोमसंसर्गे देवतासम्बन्धाभावेन प्रदेयत्वानुपपत्तेः न प्रदेयधर्माः क्रयादयः ॥

न च प्रयाजशेषन्यायेन श्रयणस्य सोमसंस्कारकत्वे अदृष्टार्थत्वप्रसङ्गात् पयस्संस्कारकत्वावगतेस्तदन्यथाऽनुपपत्त्या यागे तस्य विनियोगकल्पनेन प्रदेयत्वावगतिः, पयस्संस्कारकत्वेऽप्यदृष्टार्थत्वस्य तुल्यत्वात् उत्पत्तिशिष्टसोमावरोधे पयसो निवेशानुपपत्तेश्च। निषादस्थपत्यधिरणन्यायेन तृतीयादौ लक्षणायां प्रमाणाभावाच्च प्रयाजशेषवदुपयुक्तत्वाभावेनास्मदुक्तप्रयाजशेषन्यायाभावाच्च। तस्मान्नात्र प्रदेयधर्माः ॥११॥

(१२)–पर्याग्निकृतानामुत्सर्गे तादर्थ्यमुपधानवत् ॥ ५१ ॥ शेषप्रतिषेधो वाऽर्थाभावादिडान्तवत् ॥ ५२ ॥ पूर्ववत्त्वाच्च शब्दस्य सं-

स्थापयतीति चाप्रवृत्तेनोपपद्यते ॥५३॥ प्रवृत्तेर्यज्ञहेतुत्वात्प्रतिषेधे संस्काराणामकर्म स्यात् तत्कारितत्वात् यथा प्रयाजप्रतिषेधे ग्रहणमाज्यस्य ॥५४॥ क्रिया वा स्यादवच्छेदादकर्म सर्वहानं स्यात् ॥५५॥

अश्वमेधे 'ईशानाय परस्वत आलभेत' इति प्रकृत्य 'पर्यग्निकृतानारण्यानुत्सृजति' इति श्रुतम् । तथा 'त्वाष्ट्रं पाल्लीवतमालभेत' इति प्रकृत्यान्यत्रापि 'पर्यग्निकृतं पाल्लीवतमुत्सृजति' इति श्रुतम् । तत्रोभयत्राप्याद्यवाक्ये तावद्देवतासंयोगश्रवणान्नालम्भमात्रं विधीयते अपि तु याग एवेत्युक्तमेव द्वितीये ॥

द्वितीयवाक्ये तु न पर्यग्निकरणान्ताङ्गरीतिविधिरपूर्वत्वफलको द्वितीयोक्तोऽपि युज्यते । तथात्वे प्राकृतस्य पर्यग्निकरणादिधर्मजातस्य प्रकृतौ प्रदेयप्रकृतिसंस्कारकत्वेन कृत्स्नस्येह पशोः प्रदेयत्वेन तस्मिन्नप्राप्तेरप्राकृतकार्यतया पशौ विधीयमानस्य कृत्स्नोपकारकत्वाभावेनातिदेशप्रतिबन्धकत्वासम्भवात् । तदभावे च प्रदेयप्रकृतिसंस्कारकत्वेनैव पर्यग्निकरणादिप्राप्तेस्तस्यार्थविधेयत्वाच्च । न वा पर्यग्निकरणान्ते प्रयोगत्यागाख्योत्सर्गविधिः तथात्वे त्यागस्याप्यभावेनोत्पत्तिवाक्यावगतदेवतासम्बन्धबाधापत्तेः। न चोत्सृजतिना यागमनूद्याप्राकृतपर्यग्निकरणान्तोत्तरत्वाविधिः हृदयाद्यङ्गेषु तद्विधौ पाल्लीवतं इत्येकवचनानुपपत्तेः, पशौ तद्विधानस्य व्यर्थत्वापत्तेश्च । अतः पर्यग्निकरणोत्तरकालं यूपाद्विमोकरूपस्योत्सर्गस्य प्राप्तस्यैवायमनुवाद इत्याक्षेपे प्राप्ते—

आज्यभागन्यायेन पर्यग्निकरणान्ताङ्गरीतिविधानेऽपि नात्र पशोः प्रदेयताप्रमाणाभावात् उत्पत्तिवाक्यगतदेवतासम्बन्धस्य दैक्षवत् प्रदेयप्रकृतित्वेनैवोपपत्तेः । यद्यपि नात्र विशसनादिकं तत्तात्पर्यग्राहकं तथापि पर्यग्निकरणमेव प्रदेयप्रकृतिसंस्कारकतया कल्पं पशोः प्रकृतित्वतात्पर्यग्राहकम् । सम्भवति च विशसनाद्यभावेऽपि पश्वारम्भकानामेव हृदयाद्यङ्गानां स्वदेशस्थितानामेव देवतोद्देशेन स्वत्वत्यागः । अतश्चाप्राकृतकार्यकारितानापत्तेस्सम्भवति पर्यग्निकरणान्ताङ्गरीतिविधाने चापूर्वता ॥ १२ ॥

(१३)-आज्यसंस्थाप्रतिनिधिः स्याद्द्रव्योत्सर्गात् ॥ ५६ ॥ समाम्निवचनात् ॥ ५७ ॥ चोदना वा कर्मोत्सर्गादन्यैस्स्यादविशिष्टत्वात् ॥ ५८ ॥ अनिज्यां च वनस्पतेः प्रसिद्धां तेन दर्शयति ॥ ५९ ॥ संस्था तद्देवतत्वात्स्यात् ॥ ६० ॥

पात्नीवतवाक्ये पुनराक्षेपः । तत्र 'हि पर्यग्निकृतं पात्नीवतमुत्सृजति' इत्युक्त्वा 'आज्येन शेषं संस्थापयति' इति श्रुतम् । अपूर्वत्वे हि शेषसंस्थानुपपत्तेः पर्यग्निकरणवाक्ये पर्यग्निकरणाव्यवहितोत्तरमेव प्रधानयागकर्तव्यताऽपकृष्य विधीयते तत्करणे च विशसनादिपदार्थलोपेऽप्यन्याङ्गलोपे प्रमाणाभावात् शेषं यत् स्विष्टकृत्प्रयाजादि तत् आज्येन संस्थापयतीति विधीयते ॥

यद्यपि च प्रयाजादावाज्यं प्राप्तमेव । तथाऽपि स्विष्टकृद्वनस्पतियागादावाज्यविधिर्न विरुध्यते । न च विशसनाभावादेव व्यङ्गासम्भवात् 'यस्य सर्वाणि हवींषि' इत्यनेनैव स्विष्ट-

कृत्यप्याज्यप्राप्तिरिशङ्क्या; नाशादिनिमित्ताभावेन तदप्राप्तेः। विशसनस्याङ्गप्रधानसाधारण्येन त्र्यङ्गार्थमपि प्राप्तयुपपत्तेश्च। वनस्पतियागादावाज्यविधेरप्युपपत्तेश्च। न ह्यत्र कर्मान्तरत्वे किञ्चित्प्रमाणमस्ति प्रत्युत शेषसंस्थापदयोरनुपपत्तिरिति प्राप्ते—

'यत्त्वष्टारं च वनस्पतिमाबाहयसि अथ वैतौ यक्ष्यसि' इति पृष्टे 'त्वाष्ट्री नवमी प्रयाजेज्या वानस्पत्या दशमी अत्रैवैताविष्टौ विद्यात्' इति वनस्पतियागस्याङ्गान्तरेणानुग्रहवचनेनाभावावगतेस्तस्य चापूर्वत्वमन्तरेणानुपपत्ते र्न पूर्ववाक्ये प्रधानापकर्षमात्रविधिः अपि तु तदन्ताङ्गरीतिविधिरेवापूर्वत्वफलकः।

यद्यपिचा क्रियमाणस्य वनस्पतियागस्य देवतावाहनमपि नैव प्राप्यते तथाऽपि सिद्धवन्निर्देशान्यथानुपपत्त्यैवावाहनविधिकल्पना। त्वष्टुस्तु प्रधानदेवतात्वादेवावाहनाविरोधः प्रक्षेपाभावाभिप्रायेण च नवम्याऽनुग्रहोक्तिः। अतश्च पूर्वकर्मणि शेषाभावेनाज्यविधानानुपपत्तेर्गुणात्कर्मान्तरमेवेदमाज्यद्रव्यकमनुषक्तपत्नीवदेवत्यमुपांशुयाजप्रकृतिकम्। शेषसंस्थाशब्दौ तु पूर्वस्य कर्मणोऽसमाप्तप्रायतया कथञ्चिदनुवादकाविति। सिद्धस्त्रिविध ऊहः॥ १३॥

इति श्रीखण्डदेव विरचितायां भाट्टदीपिकायां
नवमस्याध्यायस्य चतुर्थः पादः.
अध्यायश्च समाप्तः.

अथ दशमस्याध्यायस्य प्रथमः पादः.

(१)—विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् ॥१॥ अपि वाऽभिधानसंस्कारद्रव्यमर्थे क्रियेत तादर्थ्यात् ॥२॥ तेषामप्रत्यक्षविशिष्टत्वात् ॥ ३ ॥

तदेवमूहे सिद्धेऽधुनाऽतिदिष्टानां पदार्थानामुत्सर्गापवादाभ्यां विकृतौ बाधो निरूप्यते। तत्र बाधो नाम प्रकृतिसम्बन्धिनः पदार्थस्य विकृत्यङ्गत्वग्राहकप्रमाणाभावः। न तु पदार्थाभावमात्रम्, प्रकृतावेव नित्ये यथाशक्तिप्रयोगे तत्सत्त्वेन बाधव्यवहारापत्तेः। नापि विकृतौ सः, नित्यविकृतिप्रयोगे तदापत्तेः पशुपुरोडाशे प्राकृतपदार्थाभावेन प्रसङ्गेऽपि बाधत्वापत्तेश्च। अस्ति चेदं कृष्णलचरौ प्रकृतिसम्बन्धिनोऽवघातस्य वितुषीभावरूपप्रयोजनलोपेन सतोऽप्यतिदेशस्य विकृत्यङ्गत्वग्राहकत्वाभावात्। अस्ति च कुशानां प्रकृतिसम्बन्धिनां शरैः प्रत्याम्नानेन कार्यसिद्धौ अतिदेशेन विकृत्यङ्गत्वाभावात्तेषु। 'न होतारं वृणीते' इत्यादिपर्युदासवशाच्च होतृवरणादेर्विकृत्यङ्गत्वाभावात्तेष्वपि। अत्र विकृत्यङ्गत्वग्राहकप्रमाणाभावस्य घटादावपि सत्त्वादाद्यं विशेषणम्। नित्यप्रयोगे प्रसङ्गस्थले चातिदेशस्यैव विकृत्यङ्गत्वग्राहकप्रमाणस्य सत्त्वादन्त्यम्।

यद्यपि च प्रसङ्गस्थले अन्यत एवोपकारलाभान्न तस्मिन् प्रयोगे प्रयाजादिपदार्थस्याङ्गत्वं, तथाऽपि सर्वत्र प्रकृतौ विकृतौ वा पदार्थानामन्यत उपकारालाभे प्रयाजादिभिस्तत्तत्प्रधानस्योपकुर्यात्, उपकारलाभे तु तैरेव करणनिष्ठयोग्यतां कुर्यादित्येवंविधस्यैव प्रमाणस्य कल्पनान्न विकृत्यङ्गत्वग्राहकप्रमाणासत्त्वम्। अत एव प्रकृतेरपि दैववशान्नैमित्तिकविकृतिप्रयोगान्तःपाते प्रसङ्गसिद्धिरव्याहता।

अत्र चान्यसम्बन्धिनोऽन्याङ्गत्वग्राहकप्रमाणाभाव इत्युक्तौ विकृतिसम्बन्धिन उपहोमादेः प्रकृतिसम्बन्धिनः प्रयाजादेर्वा ज्योतिष्टोमाङ्गत्वग्राहकप्रमाणाभाववत्त्वात् बाधापत्तेः प्रकृतिविकृतिपदोपादानम्। अत्र च प्रकृतिशब्दो नातिदेशनिरूपकपरः विकृतिशब्दो वा नातिदेशवत्परः। तथात्वे गृहमेधीयस्य वस्तुतो दर्शप्रकृतित्वाभावेन तत्र प्रयाजादिबाधे निरुक्तलक्षणाव्याप्तेः। अपि तु दर्शादिसम्बन्ध्यङ्गप्रकारकज्ञानविशेष्यपरो विकृतिशब्दः, प्रकृतिशब्दश्चोक्तविशेष्यतानिरूपकप्रकारपरः, तच्च ज्ञानं सौर्यादावातिदेशवाक्यजन्यं प्रमारूपं, गृहमेधीये तु 'आज्यभागौ यजति' इत्येतद्वाक्याभावमापाद्य तार्किकम्। अत एवोभयसाधारण्येन दोषाजन्यज्ञानत्वेनानुगमः। अत एव ज्योतिष्टोमादौ दोषेण विकृतित्वभ्रमे प्रयाजादिबाधे नातिव्याप्तिः।

अस्तु वा गृहमेधीयवृत्तिप्रयाजादिबाधस्याहवनीयादिबाधवत् स्वरूपेणाध्यायार्थत्वाभावेऽपि प्रसङ्गसङ्गत्यैव दशमाध्यायनिरूप्यत्वम्।

एवं च यद्धर्मावच्छिन्नस्य यत्प्रकृतिसम्बन्धित्वाविशिष्टस्य यद्विकृतिभूतयदङ्गत्वग्राहकप्रमाणविषयत्वाभावः तद्धर्मावच्छिन्न-

स्य तत्र बाधितत्वमिति निष्कृष्टोऽर्थः फलितः। यदि तु निरुक्त-बाधस्याप्यध्यायान्तरे क्वाचित्कं निरूपणं सम्भाव्येत तथाऽपि द-शमे तस्य प्राधान्येन निरूपणान्न काचित्क्षतिः। इष्यत एव हि तन्त्रावापनिरूपणस्य तृतीये प्रासङ्गिकं निरूपणं सर्वपृष्ठा-यां, नामधेयत्वादेश्च दर्वीहोमादावष्टमादौ॥

अत एव भाष्यकारोक्तमपि बाधलक्षणमतिप्रसक्तमपि ना-तीवासङ्गतं, तथाहि—यद्विशेषादर्शने यस्य शास्त्रस्य यद्विषये यादृशनिश्चयजनकत्वं तादृशनिश्चयस्य तद्विशेषदर्शनेनाप्रामा-ण्यनिश्चय एव तद्विषये तस्य शास्त्रस्य बाधः। भवति च शरपदादिरूपविशेषादर्शनेऽतिदेशशास्त्रस्य कुशाहवनीयादिवि-षये, तत्तदुद्देश्यसम्बन्धनिश्चायकत्वं तस्य तद्विशेषदर्शनेनाप्रा-माण्यनिश्चय इति तद्विषये तस्य शास्त्रस्य बाधः। इदं च यद्यपि रागप्राप्तानृतवदनादिबाधे असम्भवि, तथाऽपि तस्य प्रासङ्गिकनिरूपणीयत्वाङ्गीकारात् न क्षतिः। इदं हि बाधसा-मान्यलक्षणं अध्यायान्तरस्थश्रुतिलिङ्गादिबाधसाधारणमपि प्रा-धान्येनैव निरूपणीयत्वात् यथा नासङ्गतं तथा ममापीति न कश्चिद्दोषः। परं तु अतिदेशोपजीवित्वस्य भाष्यकारोक्तबाधेऽ-वच्छेदकावच्छेदेनासम्भवात् तदनङ्गीकारः॥

अस्य च बाधस्योहोपजीवित्वाभावेऽपि ऊह्स्यातिदिष्टप-दार्थधर्मत्वेनातिदेशप्रत्यासन्नत्वात् तदुत्तरं निरूपणे कृत एवा-वसर इति ऊहेनापि सङ्गतिः॥

अयं च बाधस्त्रिविधः अर्थलोपात् प्रत्याम्नानात्प्रातिषेधा-च्चेति। तत्रान्त्याभिन्नबाधोपोद्घातत्वेनेदं प्रतिपादनीयम्। यत्प्राकृ-तपदार्थानामुपकारानादरेण स्वरूपेणैव न विकृतावतिदेशः। ये-

न प्रकृतिदृष्टकार्यासम्भवे विकृतावेवादृष्टं प्रयोजनान्तरं कल्पयित्वा बाधाभावश्शङ्क्येत । विकृतेस्तु फलानुकूलयोग्यताजननार्थमुपकारस्यैवापेक्षितत्वात् पदार्थानां च स्वतः क्षणिकत्वेन योग्यताजननेऽयोग्यत्वादुपकारद्वारैव प्रकृतौ योग्यताजननेनोपकारस्यैव तज्जनने योग्यत्वावसायात् विकृतिभावनया च सादृश्येन प्रकृतिभावनोपस्थितौ तदव्यवहितान्वयिनोऽवान्तरोपकारस्यैव सन्निहितत्वात्तेषामेवाकाङ्क्षाऽऽसत्तियोग्यत्वैः प्रथममतिदेशो न तु पदार्थानां तेषां तु तत्पृष्ठभावेन ॥

तत्र च द्वयी गतिः तत्तदवान्तरोपकाराणामेवाग्नेयसंबन्धित्वेन रूपेण क्रोडीकारादाग्नेयोपकारव्यक्तिसमानजातीयोपकारैस्सौर्यस्योपकर्तव्यं इत्येवंविधवाक्यकल्पनयोपकारेष्वातिदिष्टेषु पश्चात्तज्जनकापेक्षायां तज्जनकप्राकृतपदार्थानां पृथगतिदेशकल्पनम् । न चैवं विकृतौ तादृशोपकारबाधेऽपि पदार्थानामेवोपकारान्तरकल्पनया करणापत्तेरूहबाधोच्छेदापत्तिः । उपकारजनकापेक्षायामेव पदार्थातिदेशस्य कल्पनेन तद्बाधे तस्यैवाकल्पनात् पदार्थातिदेशस्यैव प्रथमतः कल्पनेऽपि वा वचनातिदेशनामातिदेशयोरिव निरूपितरूपाणामेव पदार्थानामतिदेशात् प्राकृतोपकाराभावे उपकारान्तरकल्पनानुपपत्तेश्च ॥

वस्तुतस्तु उपकारजनकापेक्षायामपि पृथक्पदार्थातिदेशकल्पने गौरवात् पदार्थविशिष्टोपकाराणामेक एवातिदेशः । प्रकृतिवत् तत्तत्पदार्थजन्यांस्तत्तदुपकारान्विकृतौ कुर्यादिति । शास्त्रस्य तु पृथक्पृष्ठतो वाऽतिदेशकल्पने नैव किञ्चित्प्रमाणं पश्यामः । तत्त्वं तु प्राकृतयोग्यताजनकैर्विकृतियोग्यतां प्रकृतिवज्जनयेदित्येवातिदेशः । जनकत्वं चोपकारवत् पदार्थेऽप्यविशिष्ट-

मित्येक एवोभयोरतिदेशः। अतिदेशलक्षणं च पदार्थमादायोपपन्नतरम्। अत एवापेक्षितत्वादिनोपकाराणामेवातिदेशः। पदार्थानां तु तदाक्षेपादेव करणमिति न तेषां विकृत्यङ्गत्वमित्यपास्तं, तथात्वे उपकारत्वस्याप्यतिदेश्यतावच्छेदककोटिप्रवेशे गौरवापत्तेः। उपकाराणां प्रकृतावपि करणनिष्ठयोग्यतारूपफलप्रयुक्तपदार्थानुनिष्पन्नानामिह पदार्थाक्षेपकत्वकल्पने गौरवाच्च। अतिदेशैकयेऽपि च प्रकृतिवद्भावस्याप्यतिदेशान्न पदार्थानामुपकारमनादृत्यातिदेशः। एवं च यत्र प्राकृतोपकाराभावस्तत्र तज्जनकपदार्थस्य नैवातिदेशः॥

न चैवमपि प्रत्युपकारं प्रतिपदार्थं वाऽनन्तातिदेशस्य कल्पने गौरवादेकस्यैवातिदेशस्य पदार्थान्तरप्राप्त्यर्थमावश्यकस्य बाधितपदार्थप्रापकत्वापत्तिः, एकस्यैवातिदेशस्य बाधितपदार्थांशे तात्पर्यविषयत्वाकल्पनात् अत एव तादृशविषये न तच्छास्त्रम्। वस्तुतस्तत्तदतिरिक्तविषयमेव॥

न चैवं प्रसक्त्यभावात् बाधानापत्तौ सुतरां प्राप्तबाधानापत्तिः, विशेषादर्शननिमित्तकभ्रान्तिप्रसक्त्यैव तदुभयाङ्गीकारात्। अत एव क्लृप्तस्य बोधकस्य विशेषविषयताप्रतिबन्धकत्वमेव प्राप्तबाधत्वमित्युक्तं कौस्तुभे। स चायं बाधस्त्रिविध इत्युक्तम्। तत्रान्त्ययोरुदाहरणं वक्ष्यते॥

अर्थलोपाद्बाधस्य तु विकृतिविशेषे 'स्वयं दिनं बर्हिर्भवति' इति। अत्र स्वतश्छिन्नबर्हिषि लवनप्रयोजनस्य स्तरणोपयोगिमूलाग्रावयवसंयोगनाशस्य प्रतियोग्यभावेनानुत्पत्तेरर्थलोपेनाध्वर्युकर्तृकस्य प्रयोगान्तःपातिनो वैधस्य लवनस्य तदङ्गभूतासिदानादेश्च बाधः॥

यत्तु मूले वर्णकान्तरेण 'प्राजापत्यं घृते चरुं निर्वपेच्छत-कृष्णलामायुष्कामः' इत्युदाहृत्य कृष्णलेषु वितुषीभावरूपप्रयोजनाभावादवघातस्य बाध इत्युक्तं, तत् कृष्णलानां प्रदेयचरुप्रकृतित्वं कृत्वाचिन्तया ॥

वस्तुतस्तु—कृष्णलानां सत्यपि घृताधिकरणकवाचनिकाग्निसंयोगमात्ररूपे श्रपणे वैशद्याभावेन कृष्णलप्रकृतिकचरुरूपार्थान्तरोत्पत्तौ प्रमाणाभावात्तेषामेव प्रदेयत्वावगतेराग्नेयप्रकृतित्वेन प्रदेयपुरोडाशधर्माणां पर्याग्निकरणादीनां प्राप्तावपि प्रदेयप्रकृतिभूतव्रीहिधर्माणां तेषु प्रमाणाभावात् न वैतुष्याभावप्रयुक्तोऽयं बाधः ॥

न च व्रीहिधर्माभावे निर्वापस्याप्यभावात् 'निर्वपेत्' इत्यनुवादानुपपत्तिः। प्राकृतवैधनिर्वापाप्राप्तावप्यर्थप्राप्तलौकिकपृथक्करणरूपनिर्वापस्यैव तेन यागलक्षणार्थमनुवादात् । न च चोदनालिङ्गातिदेशेनावघातप्राप्त्यभावेऽपि चरुशब्दस्य नामातिदेशविधया चरुधर्मातिदेशकत्वमङ्गीकृत्यावघातप्राप्तिराशङ्कितुं शक्या। चरोः प्रकृतावविहितत्वेन तद्धर्माणामप्रसिद्धेः । सौर्यादावतिदेशप्राप्तानां धर्माणामत्र विधानाङ्गीकारेऽप्यवघातत्वस्य तद्धर्मत्वाभावाच्च ॥

न च चरुशब्दोऽयं कृष्णलानां चरुप्रकृतित्वावगमार्थः इत्यपि शक्यं वक्तुम्। कृष्णलजन्यद्रव्यान्तरानुत्पत्तौ तेषु तत्प्रकृतित्वस्य बाधितत्वात्। अतश्चरुशब्दोऽयमचरावेवाग्निसंयोगरूपश्रपणवत्त्वसादृश्यात् गौणस्सन्नाग्नेयप्रकृतित्वसाधककठिनत्वापरपर्यायविशदत्वसादृश्योपोद्बलकोऽनुवाद इत्युक्तमष्टमे ॥

'घृते श्रपयति' इत्यनेन हि न श्रपणं विधीयते विक्लू-

स्यभावेन श्रवणासम्भवात् अपि तु लक्षणया घृताधिकरणकाग्निसंयोगमात्रं तेन कृष्णलानां प्रदेयत्वात् प्रदेयधर्माः पर्यग्निकरणादयः प्राप्येरन् न त्ववघातादय इति न तत्र वैतुष्याभावप्रयुक्तो बाधः । स तु परं सवनीयहविरन्तर्गतलाजाख्यपरिवापे । तत्र हि धानाप्रकृतित्वेन यवानामिव लाजप्रकृतित्वेन व्रीहिषु प्राप्तावघातस्य वैतुष्यासम्भवादेव बाधः । वैतुष्यं हि प्रकृतौ प्रदेयपाकसाधनत्वेन प्रयोजनं न तु स्वरूपेण, प्रकृते च तस्य प्रदेयपाके विरोधित्वादसम्भवः । सतुषद्रव्यस्यैव भर्जने लाजनिष्पत्तेः । अत एव धानावत् भर्जनोत्तरमपि नावघातः लाजत्वव्याघातापत्तेः । अत एव तदा नखादिनैव लौकिकं वितुषीकरणं अतस्तत्र युक्तो वैतुष्याभावप्रयुक्त एव तदसम्भवः ॥

अत एवार्थलोपस्थले नार्थस्य स्वरूपेणैव लोप उपयोगी अपि तु कथंचिदपि विशेषणाभावप्रयुक्तो विशेष्याभावप्रयुक्तोऽन्यप्रयुक्तश्चेत्यादि द्रष्टव्यम् । वस्तुतस्तु तत्रापि न द्वारलोपाद्बाधः श्रपणावेध्याक्षिप्तोपादानकतण्डुलरूपद्वाराभावेन व्रीहिधर्माणामातिदेशेनाप्रवृत्तेः । अपि तु लाजत्वान्यथाऽनुपपत्त्यैव तत्र व्रीहिमात्रग्रहणमित्युक्तं कौस्तुभे ॥

एवं वा—'वैश्वदेवं चरुं निर्वपेद्भ्रातृव्यवान् । तं बर्हिषदं कृत्वा शम्यया स्फ्येन च व्यूहेदिदमहममुं चामुं च व्यूहामीति । यं द्विष्यात्तं ध्यायेत् यदधोऽवमृद्येत् यच्च स्फ्यस्य आश्लिष्येत् । तद्विष्णव उरुक्रमायावद्यति' इति श्रुतम् । अत्र चतुर्थवाक्ये तच्छब्दपरामृष्टद्विविधतत्तद्द्रव्यदेवतोभयविशिष्टस्य यागस्य प्रक्षेपांशे तत्तद्द्रव्यसंस्कारकस्यावद्यतिना लक्षणया वैश्वदेवयागाङ्गतया विधानम् । तत्र च कर्मसमानाधिकरणस्य यच्छब्धस्य

निमित्तत्वप्रतिपादकत्वाभावेऽपि यत्तच्छब्दाभ्यामेकवाक्यत्वप्रतीतेः 'यदधोऽवमृद्येत्' इत्यादिलिङा प्रयोजकत्वापरपर्यायहेतुत्वाभिधानात् तस्य शेषित्वेनासम्भवे निमित्तत्वावसायात् तद्भेदे च वाक्यभेदावश्यकत्वादनुषङ्गेण निमित्तद्वयेऽप्येकं नैमित्तिकविधानं तेनान्यतरसन्निपातेऽप्येतत् । उभयसन्निपाते तु तन्त्रेण कालैक्यात् ॥

अत्र चाष्टमोक्तरीत्यैकदेवताकत्वात् सत्यपि शब्दद्वये आग्नेयविकारत्वात्तदीयधर्मप्राप्तौ वैश्वदेवतन्त्रमध्यपातेन प्रयाजादीनां प्रसङ्गसिद्धावपि आवाहनस्य वैश्वदेविकावाहनेनैतदीयदेवतास्मरणासम्भवात् प्रसङ्गसिद्ध्यनुपपत्तेरवश्यकर्तव्यस्य तस्य किं वैश्वदेविकदेवतावाहनकाले तदनन्तरं करणं उत निमित्तसम्पातानन्तरमेव कालं क्रमं च बाधित्वेति चिन्तायां—

क्रमकालबाधे प्रमाणाभावात् निमित्तसन्निपातात्पूर्वमेव कार्यम् । न च स्थालीस्थचरुव्यूहनेऽधोवमर्दनादेर्नियतत्वाभावात् निमित्तासम्पाते यागाभावेनावाहितदेवतायाः कोपापत्तिः, नवमे विग्रहादिनिराकरणेन तदनापत्तेः । न चैवमप्यनुष्ठापकस्य निमित्तस्याभावात् तदानीमकरणं, निमित्तस्य फलकामनावत् प्रधानमात्रानुष्ठापकतया तदङ्गानुष्ठापकत्वाभावात् । इतरथा विकृतौ प्राकृतस्य निमित्तस्य फलकामनाया वा अभावेन प्रयाजादीनां करणानापत्तेः । अङ्गिभूतस्य प्रधानस्यैवाङ्गप्रयोजकत्वसम्भवे तत्प्रयोजकस्य फलकामनादेः प्रयोजकत्वकल्पने गौरवाच्च ॥

न च तर्हि प्रधानस्यापि तदानीमभावादावाहनकरणानापत्तिः, प्रकृताविव भाविन एव तस्यावाहनानुष्ठापकत्वेन तदुपपत्तेः । न च निमित्तसन्देहेन तस्य भावित्वे नियामकाभावः

भावित्वसन्देहस्य प्रतिबन्धकवशेन प्रकृतावपि सत्त्वेन तत्सम्भावनाया एवावाहनानुष्ठापकत्वादिति प्राप्ते—

सत्यपि प्रतिबन्धकादिना भावित्वसन्देहे स्वानुष्ठापकत्वप्रयुक्तप्रधानचिकीर्षाया एव प्रकृतावावाहनाद्यङ्गप्रयोजकत्वात्। इह च स्वानुष्ठापकस्य निमित्तस्यासत्त्वेन तत्प्रयुक्तप्रधानचिकीर्षाया असत्त्वान्न तदानीमावाहनानुष्ठानं निमित्तानन्तरं तु तत्करणं भवत्येव। न च क्रमकालयोर्बाधः, पशुपुरोडाशीयाज्यभागादेरिव तद्बाधे बाधकाभावात्॥

वस्तुतस्तु—कालो नैव केनचिद्विहितः। क्रमस्त्वाज्यभागदेवतावाहनानन्तर्यरूपो भवन्मतेऽपि बाध्य एव, वैश्वदेविकदेवतावाहनानन्तरं क्रियमाणत्वात्। तदानन्तर्यं तु नैवातिदेशेन प्राप्तं, विकृतावेव मुख्यक्रमेण क्रमकल्पना तु तस्य निमित्तानन्तर्यरूपस्थानविरोधादशक्यैव। अतो नात्र कस्यचित्प्राप्तस्य बाधो न वाऽर्थलोपादीति ध्येयम्॥ १॥

(२)—इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारम्भस्य प्रधानसंयोगात्॥ ४॥

अन्वारम्भणीया किं ज्योतिष्टोमाद्यङ्गभूतदीक्षणीयादिष्वतिदेशप्राप्ततया कर्तव्या उत लुप्तद्वारकत्वान्निवर्तत इति चिन्तायां—

कर्तृसंस्कारद्वारा दर्शपूर्णमासारम्भाङ्गमियमिष्टिरिति स्थितम्। आरम्भश्च यद्यन्वाधानादिरूपः प्रथमः पदार्थः यदि वा वृत्तिकारमतानुसारादध्यवसायरूपस्सङ्कल्पः सर्वथा तस्य दीक्षणीयादौ सत्त्वात्कर्तव्यैवान्वारम्भणीया। यदि तु नवमोक्तरीत्या अप्रवृत्तप्रवर्तनमेवारम्भः तद्विषयत्वातु पदार्थेष्वारम्भशब्द-

प्रयोगः, तच्च नवमोक्तरीत्यैव दर्शपूर्णमासत्वावच्छिन्नोद्देश्यताकप्रवृत्तिध्वंसासमानकालीनतदवच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वं, अन्यस्य नवमोक्तरीत्यैव दुर्वचत्वात्। अत्र पदकृत्यान्यपि तत्रैव बोध्यानि तदाऽपि तस्य दीक्षणीयादौ सत्त्वादन्यविकृतिष्विव कर्तव्यैव सा॥

तथा हि दीक्षणीया प्रथमप्रयोगवृत्तितदीयपदार्थे अस्ति दीक्षणीयत्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वं 'दीक्षणीया मे जायताम्' इत्याकारकेच्छयैव तद्विषयकप्रवृत्तेर्जायमानत्वात् तदानीं तादृशप्रवृत्त्यन्तरस्याजातत्वेनोक्तविधध्वंसासमानकालीनत्वाच्च। अतश्च 'दीक्षणीयया यक्ष्ये' इत्येवंविधतत्सङ्कल्पात्पूर्वमेव कर्तव्याऽन्वारम्भणीयेति प्राप्ते—

'दीक्षणीया मे जायताम्' इत्याकारकेच्छानुत्पत्तावपि 'साङ्गोज्योतिष्टोमो जायतां' इत्याकारकेच्छात एव 'दीक्षणीयया यक्ष्ये' इत्येवंविधसङ्कल्पविषयकप्रवृत्तेस्सम्भवेन तादृशसङ्कल्परूपाध्यवसायस्य दीक्षणीयात्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात्। सा हि साङ्गत्वप्रकारिका इच्छा न तु दीक्षणीयात्वप्रकारिका। अतस्तज्जन्यप्रवृत्तौ दीक्षणीयात्वावच्छिन्नोद्देश्यताकत्वाभावात् तद्विषयीभूतस्योक्तविधसङ्कल्पस्य निरुक्तप्रवृत्तिविषयत्वाभावेन तद्द्वारलोपात् नान्वारम्भणीया॥

अत एव 'साङ्गेन ज्योतिष्टोमेन यक्ष्ये' इत्येवंविधमहासङ्कल्पविषयकप्रवृत्तेरेव वस्तुतो दीक्षणीयाविषयकेच्छाजन्यतया दीक्षणीयोद्देश्यताकत्वेन तत्सङ्कल्पात्पूर्वमेव दीक्षणीयाद्यङ्गत्वेन साकार्यैत्यपास्तं, तदिच्छायाः 'साङ्गो ज्योतिष्टोमो मे जायताम्' इत्याकारकत्वेन साङ्गत्वेन रूपेण दीक्षणीयाविषयत्वेऽपि दीक्षणी-

यात्वेन तद्विषयत्वाभावात् । अतो द्वाररूपार्थलोपान्न ज्योतिष्टोमारम्भे न वा दीक्षणीयारम्भे सा कार्येति सिद्धम् । विस्तरेण चैतदस्माभिर्नवम एव निरूपितम् ॥२॥

(३)–प्रधानाच्चान्यसंयुक्तात्सर्वारम्भान्निवर्तेतानङ्गत्वात् ॥५॥

अत एव यत्र राजसूयादौ इष्टिपशुरूपाणि प्रधानान्येवान्यप्रधानसंयुक्तानि तत्र सत्यपि तेषां प्राधान्ये 'तत्तदिष्ट्या यक्ष्ये' इत्यादिसङ्कल्पस्य 'तत्तदिष्टिर्मे जायताम्' इत्याकारकेच्छामन्तरेणापि 'राजसूयो मे जायताम्' इत्याकारकराजसूयत्वप्रकारकेच्छाजन्यप्रवृत्त्याऽप्युत्पत्तिसम्भवेन तत्तदिष्टित्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् न ततः पूर्वं तावदारम्भणीया, न वा 'राजसूयेन यक्ष्ये' इति महासङ्कल्पात्पूर्वं, तस्यापि राजसूयत्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वेन तत्तदिष्टित्वावाच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् । न हि राजसूयत्वं दर्शपूर्णमासनिष्ठप्रकृतितानिरूपितविकृतितावच्छेदकं तस्य सोमयागेष्वपि सत्त्वेनातिप्रसक्तत्वात् अत एव यत्र चातुर्मास्यादावाग्रयणादौ वा नातिप्रसक्तं चातुर्मास्यत्वादि तत्र प्रतियागं भिन्नातिदेशकल्पने सत्यपि तस्योद्देश्यतावच्छेदकत्वे न काचित् क्षतिः ॥

वस्तुतस्तु प्रकृतावपि दर्शपूर्णमासत्वं नोद्देश्यतावच्छेदकं अपि त्वाग्नेयत्वादिकमेव कालैक्यात्तु तन्त्रेण करणम् । 'दर्शपूर्णमासाभ्यां यक्ष्ये' इत्यस्यापि च 'आग्नेयादिभिर्यक्ष्ये' इत्येवार्थः। ततश्च विकृतावपि चातुर्मास्यादौ तत्तद्यागत्वमेवोद्देश्यतावच्छेदकं कालैक्याच्च तन्त्रेण करणम्। 'चातुर्मास्यैर्यक्ष्ये' इत्यस्य च

'तत्तद्यागैर्यक्ष्ये' इत्येवार्थ इति न कश्चिद्विरोधः । अतस्तत्र भवत्येव तदारम्भेऽन्वारम्भणीया ॥

प्रकृते तु सत्यपि तत्तदिष्टित्वादेरुद्देश्यतावच्छेदकत्वे तत्तत्सोमत्वादेरप्युद्देश्यतावच्छेदकत्वात् नान्वारम्भणीया । प्रकृतौ हि 'दर्शपूर्णमासावारप्स्यमाणः' इत्यनेन दर्शपूर्णमासयोर्विशेषणत्वनिर्देशादपूर्वसाधनत्वलक्षणावेळायां प्रकृतापूर्वनिष्ठकार्यतानिरूपितकारणतावच्छेदकावच्छिन्नत्वे सति निरुक्तकारणतानवच्छेदकानवच्छिन्नत्वमुद्देश्यताविशेषणं विवक्षणीयं, अतश्च राजसूये तादृशोद्देश्यताभावान्नान्वारम्भणीया । अत एव प्रकृतौ 'अग्निहोत्रं दर्शपूर्णमासौ च मे जायेताम्' इत्याकारकेच्छाऽपि नोद्देश्यताघटिका । अन्यथा अग्निहोत्रीयप्रथमप्रयोगीयाद्यपदार्थस्यापि तादृशोद्देश्यताकप्रवृत्तिविषयत्वात् तत्राप्यन्वारम्भणीयापत्तेः अतस्तादृगिच्छोत्तरं 'दर्शपूर्णमासौ जायेताम्' इत्याकारकेच्छा जायते सैव उद्देश्यताघटिकेति ध्येयम् ॥ ३ ॥

(४)—तस्यां तु स्यात्प्रयाजवत् ॥ ६ ॥ न वाऽङ्गभूतत्वात् ॥ ७ ॥ एकवाक्यत्वाच्च ॥ ८ ॥

एवमन्वारम्भणीयायां सत्यपि दर्शपूणमासप्रयोगबहिर्भावे नैवान्यान्वारम्भणीया कार्या 'अन्वारम्भणीयेष्ट्या यक्ष्ये' इति सङ्कल्पस्य 'साङ्गौ दर्शपूर्णमासौ मे जायेताम्' इत्याकारकेच्छाजन्यप्रवृत्त्याऽप्युत्पत्तिसम्भवेनान्वारम्भणीयात्वावच्छिन्नोद्देश्यताकप्रवृत्तिविषयत्वाभावात् । अत एव वैमृधे चातुर्मास्याद्यङ्गभूतवैश्वानरपार्जन्याधिकारपश्वादौ पवमानेष्टिष्वपि च नान्वारम्भणीया । अन्वारम्भणीयायां तु तृतीयोक्तपवमानेष्टिन्यायेनापि नान्वारम्भणीया । एवं वैमृधेऽपि न वैमृधः ॥ ४ ॥

(५)-कर्म च द्रव्यसंयोगार्थमर्थाभावान्निवर्तेत तादर्थ्यं श्रुतिसंयोगात् ॥ ९ ॥

साद्यस्के 'खलेवाली यूपो भवति' इति श्रुतम्। तत्र यदि तावद्दृष्टादृष्टसंस्कारगण एव यूपः यदि वा तज्जन्यमदृष्टान्तरं यदि वा तादृशादृष्टविशिष्टं काष्ठं सर्वथा तस्य न खलेवाल्या अभेदान्वयः, बाधात्, छेदनादिसर्वसंस्काराभावेन तादृशादृष्टस्य खलेवाल्यामुत्पत्तौ प्रमाणाभावाच्च। अतः तत्र जघन्ये यूपपदे यूपकार्यपशुनियोजनं लक्षयित्वा तत्रायूप एव खलेवाली विधीयते। तदिह कार्यप्रयुक्तानामञ्जनादीनां यूपधर्माणां प्राप्तौ किं यूपाहुतिः कार्या न वेति चिन्तायां—

दृष्टार्थत्वाच्छेदनादीनां धर्माणां लोपेऽप्यारादुपकारकतया तस्याः पशुनियोजनद्वारा पश्वपूर्वार्थत्वादञ्जनादिवत्करणम्। न च 'यूपमच्छेष्यता होतव्यम्' इति वचने अच्छशब्दस्य प्राप्तुमित्यर्थत्वावगतेः गमनार्थकत्वाच्छेण्धातोः यूपं प्राप्तुं यद्गमनं तदर्थत्वस्य लट्श्रुत्याऽवगतेर्गमनस्य च प्रकृतौ छेदनार्थत्वात् यूपाहुतेरपि प्रकृतौ छेदनोद्देश्यकगमनार्थत्वप्रतीतेः खलेवाल्यां छेदनाभावेनार्थलोपाद्यूपाहुतेर्बाध इति वाच्यं, गमनस्यानुषङ्गिकछेदनजनकत्वेऽपि 'यूपमच्छेष्यता' इति यूपप्राप्तिमात्रफलकगमनार्थत्वस्यैव प्रतीतेः प्रकृतेऽपि खलेवाल्या यूपस्थानापन्नत्वात् तत्प्राप्त्युद्देश्यकगमनसम्भवेन छेदनाभावेऽपि यूपाहुतेरुपपत्तेः। न हि खलेवाल्यां तत्प्राप्तिनिमित्तकगमनाभावः यत्र यवक्षेत्रे खलेवाली तत्र शालाकरणार्थं गमनावश्यकत्वेन तस्यैव तत्प्राप्त्युद्देश्यकत्वात्। 'परिधौ पशुं नियुञ्जीत' इत्यत्र परिधिच्छेदनार्थं गमनस्यावश्यकत्वेन तत्र यूपाहुतेर्भवन्मते आपत्तेश्चेति प्राप्ते—

न यूपाहुतिः पशुनियोजनप्रयुक्ता अपि तु 'यूपमच्छेष्यता' इति वचनाद्यूपत्वोत्पादिका छेदनादिवत् यूपत्वं हि न पार्थसारथेरिव दृष्टादृष्टसंस्कारगणः, समुदायस्य समुदाय्यनतिरिक्तत्वेनानेकशक्तिकल्पनापत्तेः । अतो लाघवादाहवनीयादिपदवदेवादृष्टान्तरे तद्विशिष्टकाष्ठे वा यूपत्वमित्युक्तं, तदपि दीक्षाकालकर्तव्यकतिपयच्छेदनादिधर्मजन्यमेव न त्वञ्जनादिजन्यमपि । अत एव तेषां यूपस्वरूपे आनर्थक्यादग्निसम्मार्गादिवदपूर्वसाधनत्वलक्षणया पशुनियोजनार्थत्वमेवेत्युक्तं नवमे ॥

अतो यूपाहुतिरपि 'यूपमच्छेष्यता' इति लट्श्रुत्या यूपप्राप्तिफलकगमनार्था यूपच्छेदनानुकूलगमनार्था वा सती यूपत्वोत्पादिकैव । अत एव यूपाहुतिरिति समाख्याऽप्युपपद्यते । खलेवाल्यां च छेदनादीनामर्थलोपेन बाधात् सर्वसंसाररूपसामग्र्यभावेन यूपत्वानुत्पत्तेरर्थलोपादेव न यूपाहुतिः एवं परिधावपि ॥ ५ ॥

(६)—स्थाणौ तु देशमात्रत्वादनिवृत्तिः प्रतीयेत ॥ १० ॥ अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत ॥ ११ ॥ समाख्यानं च तद्वत् ॥ १२ ॥ मन्त्रवर्णश्च तद्वत् ॥ १३ ॥

तत्रैव स्थाणौ 'स्थाण्वाहुतिं जुहोति' इति प्रकृतौ विहिता स्थाण्वाहुतिः कार्या न वेति चिन्तायां—

स्थाण्वाहुतेर्यूपत्वोत्पादकत्वे प्रमाणाभावादारादुपकारकत्वेन पशुयागाङ्गत्वावगतेः कर्तव्यैव सा । न चात्र 'यूपमच्छेष्यता' इत्यस्य तृतीयान्तस्य कर्त्राख्यातेऽनुषङ्गेण यूपत्वोत्पादकत्वकल्पना सम्भवति, छेदनादिना व्यवायाच्च सुतराम् । न च

स्थाणुसंस्कारद्वारा यूपत्वोत्पादकत्वकल्पना, स्थाणोस्सप्तम्या गुणत्वावगमेन संस्कार्यत्वानुपपत्तेः । होमेन तस्य प्रतिपत्त्यजननेन प्रयाजशेषन्यायासम्भवाच्च । न च यूपवियुक्तस्थाणोः कश्चिदुपयोगः येन संस्कार्यत्वमाशङ्कचेत । अत एव यस्य कस्यचिदेव स्थाणोरधिकरणत्वेन प्राप्तत्वात् 'स्थाण्वाहुतिः' इत्यपि सप्तमीसमासेनैव नामधेयम् । न चाहुतिशब्दस्य शौण्डादिगणपाठाभावात् सप्तमीसमासानुपपत्तिः, तथात्वेऽपि संज्ञायामपि सप्तमीसमासविधानेन तदुपपत्तेः । न च 'तदानीमरण्येतिलकाः' इतिवदलुक्प्रसङ्गः हलदन्त एव तद्धितनिनोकारान्ते तदप्रसक्तेः । अत एव क्लृप्तप्रवृत्तिनिमित्तेन सप्तमीसमासोपपत्तौ न कर्मषष्ठीमङ्गीकृत्य षष्ठीसमासाङ्गीकारेण संस्कारकर्मत्वकल्पना । इतरथा आघारस्यापि प्रयाजीयचतुर्गृहीतसंस्कारकत्वापत्तेः । अतो यस्मिन् कस्मिंश्चित्स्थाणौ खलेवाल्यादावपि पश्वङ्गभूता स्थाण्वाहुतिः कार्यैवेति प्राप्ते—

सप्तम्या अधिकरणत्वेन स्थाणोर्गुणत्वेऽपि प्रयोजनाकाङ्क्षायां वैमृधन्यायेन पदान्तरकल्पनया यूपोपयुक्तस्थाणुसंस्कारार्थत्वावगतेस्तद्द्वारा यूपत्वोत्पादिकैवैषा । इष्यते च गुरुधृताया अपि स्रजः पूजादिना संस्कारः शिष्यैः । अत एव होमजन्यं स्थाणुनिष्ठमेवादृष्टं स्वजन्यवृत्तित्वसम्बन्धेन यूपत्वोत्पादकम् । अत एव यूपानुनिष्पन्नस्थाणावेवायं होमः, न तु स्थाण्वन्तरप्रयोजकः । एवं प्रोक्षणादिवददृष्टविधयाऽपि सन्निपत्योपकारकत्वलाभेन नारादुपकारकत्वकल्पना युक्ता, प्रकरणकल्प्यश्रुतिकल्पनायां गौरवात् आघारे तु अरादुपकारकत्वेऽपि परप्रयुक्तद्रव्योपजीवित्वलाभान्न तत्संस्कारकत्वकल्पना ॥

वस्तुतस्तु—प्रकरणकल्प्यश्रुतिकल्पनागौरवभिया तत्रापि चतुर्गृहीतं वा एतदभूत् 'तस्याघारमाघार्य' इत्यत्र तस्य इति कर्मषष्ठ्यङ्गीकारेण सुतरां संस्कारकर्मत्वाङ्गीकार इति न्यायसुधोक्तमेव सम्यक्। परं तु 'अभीषु वा एतद्यज्ञस्य यदाघारौ, वर्म प्रयाजाः' इति यज्ञाङ्गत्वश्रुतेः प्रयाजाङ्गत्वानङ्गीकारः। अतो यूपानुनिष्पन्नस्थाणोः खलेवाल्यादावभावादुत्पाद्ययूपत्वाभावाच्च न स्थाण्वाहुतिः। यूपाहुतेस्तत्र असत्यपि संस्कारकर्मत्वे 'यूषमच्छेष्यता' इति वचनेन साक्षादेव यूपत्वोत्पादकतया विहितत्वादकरणमिति विशेषः ॥ ६ ॥

(७)—प्रयाजे च तन्न्यायत्वात् ॥ १४ ॥ लिङ्गदर्शनाच्च ॥ १५ ॥

स्वाहाकारप्रयाजे सत्यपि 'स्वाहाकारं यजति' इति वचनेन 'विष्णुं यजति' इतिवत् स्वाहाकारदेवताविधौ याज्यामन्त्रवर्णे अग्न्यादीनां प्रधानादिदेवतानां प्रत्यभिज्ञायमानानां प्रकाशनात् स्विष्टकृद्वदेव मन्त्रांशे तत्तद्देवताप्रकाशनार्थत्वावगतेर्युक्त एव सौर्यादौ अग्निपदस्थाने सूर्यपदाहवदग्नीषोमादिपदानां बाधः। न हि तदा तत्रत्याग्न्यादिपदानां स्वाहाकारवाचित्वकल्पने प्रमाणमस्ति स्विष्टकृद्वत् तत्तद्देवतासंस्कारकत्वेऽपि प्रकृतयागाङ्गत्वोपपत्तेः। 'अग्न आज्यस्य वियन्तु' इते मन्त्रेण हे अग्निपदलक्षितस्वाहाकार! त्वयि तुष्टे तत्तत्प्रधानादिदेवतास्सर्वा यक्ष्यमाणाः संतुष्टा भवन्तु इत्यर्थाङ्गीकारात्। अतस्स्वाहाकारयाग उद्देशांशे परमारादुपकारकस्स्यात् न तु मन्त्रांशेऽपि स्विष्टकृद्वदेव तत्तद्देवताप्रकाशकत्वोपपत्तेः ॥

वस्तुतस्तु—न स्वाहाकारस्य द्वितीयया देवतात्वाभिधानं, स्वाहाकारशब्दस्य स्वाहाकारं यथा स्यात् तथेति णमुलन्तत्वादिनाऽपि सम्भवेनाकारान्तत्वस्य सन्दिग्धत्वात्। अतः प्रथमविधिप्रकारलिप्सया मन्त्रवर्णप्राप्तस्वाहाकारपदवत्त्वं प्रवृत्तिनिमित्तीकृत्य स्वाहाकारशब्दो नामधेयमेवेत्युक्तं कौस्तुभे। देवताश्चास्मिन् यागे मन्त्रवर्णप्राप्ता यक्ष्यमाणा अग्न्यादय एव सूक्तवाकवत्। अतश्चायं याग उद्देशांशेऽपि तद्वदेव तत्तद्देवतासंस्कारकः मन्त्रांशेऽपि, न तु स्विष्टकृद्धन्मन्त्रांश एव संस्कारकः, उद्देशांशे त्वारादुपकारक इति सिद्ध एवायमर्थ उत्तरविवक्षया स्मार्यत इति द्रष्टव्यम्॥ ७॥

(८)—तथाऽऽज्यभागाग्निरपीति चेत्॥ १६॥ व्यपदेशाद्देवतान्तरम्॥ १७॥ समत्वाच्च॥ १८॥

दर्शपूर्णमासयोः 'अग्नीषोमाभ्यामाज्यभागौ यजति' इति श्रुतम्। तत्र सङ्कचया कर्मभेदेऽप्येकैकस्मिन् यागे अग्नीषोमयोर्व्यासज्यवृत्ति देवतात्वं, द्वन्द्वान्ते श्रूयमाणचतुर्थ्या परस्परसहितानामेव देवतात्वप्रतीतेः। द्वित्वं परमधिष्ठानाभिप्रायेण। अतश्च द्वयोरप्यग्नीषोमदेवतासंस्कारकत्वं, मन्त्राः पुनर्मनोतान्यायेनोभयलक्षकाः। द्विरुच्चारणाच्चाधिकतरस्संस्कारो देवतान्तर इवावाहनस्वाहाकारादौ न विरुद्धयते॥

अथ वाऽस्तु 'अथाग्नये सोमाय इत्याज्यभागाभ्यां चरति' इति शाखान्तरवचनादस्यामपि शाखायां प्रत्येकमेव देवतात्वं, द्वित्वस्य देवतात्वपर्याप्त्यधिकरणभेदकत्वे सम्भवति सम्बन्धा-

न्तरेणाधिष्ठानाभिप्रायत्वकल्पने प्रमाणाभावाच्च । अतश्चैक आग्नेयः अपरस्सौम्यः । तत्र सौम्यस्य देवतासंस्कारकत्वासम्भवेऽप्याग्नेयस्याग्निदेवतासंस्कारकत्वं पूर्ववत् । न चैकस्मिन्विधौ एकांशे आरादुपकारकत्वं इतरांशे सन्निपत्योपकारकत्वमित्येवं वैरूप्यापत्तिः, आश्रयिकर्मान्तरवदार्थिकविध्यन्तरकल्पनया तदुपपत्तेः । अत एव श्रूयमाणविधौ अग्नीषोमयोर्गुणत्वेनैवान्वयेन तत्पदेऽपि वैरूप्याभावाच्च । अतोऽत्रापि संस्कारकर्मत्वमिति प्राप्ते—

आवाहनादिमन्त्रेषु सोमात्पूर्वोत्तरमग्नेः द्विः पाठात् पूर्वोऽग्निः आग्नेयदेवताको भिन्न इति क्रमपर्यालोचनयाऽवगम्यते । अभिन्नत्वेऽपि वा स उद्देशांशं प्रत्याग्नेयादाविव गुणभूत एव, इतरथा पशौ द्वयोराज्यभागयोः प्रसक्त्यभावेन प्रतिषेधानुपपत्तेः । गृहमेधीये चाग्नेयस्याज्यभागस्य कल्पितोपकारकत्वाभावेनापूर्वत्वानापादकत्वात् सौम्यपुनश्श्रवणस्य वैयर्थ्यापत्तेश्च । सौम्यमात्रविधानेनापूर्वत्वकल्पने आग्नेयांशे आरादुपकारकत्वेन विधौ वैरूप्यापत्तेश्च । अतः प्रकृताविव तस्य आरादुपकारकत्वात् सौर्यादावप्यग्निदेवत्यत्वमेव, न तु अग्निदेवताया बाधः, सूर्यदेवतायां वा ऊह इति सिद्धम् ॥ ८ ॥

(९)—पशावपीति चेत् ॥ १९ ॥ न तद्भूतवचनात् ॥ २० ॥ लिङ्गदर्शनाच्च ॥ २१ ॥ गुणो वा स्यात्कपालवद्गुणभूतविकाराच्च ॥ २२ ॥ अपि वा शेषभूतत्वात्तत्संस्कारः प्रतीयेत स्वाहा-

कारवदङ्गानामर्थसंयोगात् ॥ २३ ॥ व्यृद्ध-
वचनं च विप्रतिपत्तौ तदर्थत्वात् ॥ २४ ॥
गुणेऽपीति चेत् ॥ २५ ॥ नासंहानात्कपा-
लवत् ॥ २६ ॥ ग्रहाणां च सम्प्रतिपत्तौ त-
द्वचनं तदर्थत्वात् ॥ २७ ॥ ग्रहाभावे च त-
द्वचनम् ॥ २८ ॥ देवतायाश्च हेतुत्वं प्रसिद्धं
तेन दर्शयति ॥ २९ ॥ अविरुद्धोपपत्तिरर्था-
पत्तेरशृतवद्गुणभूतविकारस्स्यात् ॥ ३० ॥
स द्व्यर्थस्स्यादुभयोरश्रुतिभूतत्वाद्विप्रतिपत्तौ
तादर्थ्याद्विकारत्वमुक्तं तस्यार्थवादत्वम्॥ वि-
प्रतिपत्तौ तासामाख्याविकारस्स्यात्॥३२॥
अभ्यासो वा प्रयाजवदेकदेशोऽन्यदेवत्यः॥

दैक्षे 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयंपशुपुरोडा-
शमनु निर्वपति' इति श्रुतः पशुपुरोडाशयागोऽपि नोद्देशांशेन
पशुदेवतासंस्कारकः, उभयत्र तद्धितान्तनिर्देशाविशेषेणोभयोर-
प्यारादुपकारकत्वावसायात् । न च पशुयागस्य ज्योतिष्टोमा-
ङ्गत्वेन फलवत्त्वादस्यैव तदीयदेवतासंस्कारकत्वमिति वाच्यं, सो-
मप्रकरणाविशेषेण तत्रापि विनिगमनाविरहात् । पशुपुरोडाश-
समाख्यायाः पश्वङ्गकत्वेन तदुत्तरकालकत्वेन वोपपत्तेः । न च
वपाभ्यासमात्राङ्गत्वं तवाप्यभिप्रेतम् । अतः पूर्ववदारादुपकार-
क एवायम् ॥

एवं च सौत्रामण्यामाश्विनसारस्वतसुत्रामदेवताकेषु पशुषु 'ऐन्द्रवारुणसावित्राः पुरोडाशा भवन्ति' इत्यादिना अपूर्वा विधीयमाना नोत्कृष्टा भवन्ति, इतरथा यत्र तद्देवत्याः पशुयागास्तत्रोत्कर्षापत्तिरिति प्राप्ते—

वाचनिकपशुयागधर्मसन्दृष्टत्वादस्य तदङ्गत्वावगतेस्तदीयदेवतासंस्कारकत्वमेव । अत एव पशुपुरोडाशसमाख्याऽपि पश्वङ्गत्वेनैवोपपन्नेति न तस्य वपाभ्यासमात्राङ्गत्वापत्तिरप्याशङ्क्या । पशुपदस्यापि स्ववाक्ये श्रुतत्वान्न वपाभ्यासांशे वैमृधन्यायशङ्काऽपि । अतश्च 'वपया प्रचर्य' इत्ययं कालार्थ एव संयोगः क्रमार्थो वेत्यन्यदेतत् ॥

यत्तु सौत्रामण्यामन्यदेवताकानामुत्कर्षापत्तिरिति, तन्न, इन्द्रादिदेवत्यपशुषु न्यायादेव तत्तद्देवत्यपुरोडाशसिद्धेर्विधिवैयर्थ्यात् । अतश्च तद्वाक्ये न पशुपुरोडाशयागोद्देशेन देवतान्तरविधिः तथात्वे पुरोडाशपदे तद्द्रव्यकयागलक्षणापत्तेः । किन्तु पुरोडाशोद्देशेनैवाभ्युदितेष्टिवत् । तत्र च यौगापेक्षायां योग्यतयैव पशुपुरोडाशयागस्यैवातिदेशप्राप्तस्य सम्बन्धः, अन्यस्य पुरोडाशद्रव्यकत्वाभावात् । अतस्तस्य कार्यपृष्ठभावेन प्राप्तस्यापि वाचनिकदेवतान्तरसम्बन्धात् प्राकृतकार्यमात्रबाधेऽपि तस्याप्राकृतकार्यान्तरकल्पनया तत्रैव निवेशान्नोत्कर्षः ॥

यानि तु सौत्रामणीप्रकरण एव तत्तत्पशुदेवत्यानि 'आश्विनं गृह्णाति' इत्यादिना सुरापयोद्रव्यकाणि ग्रहणानि विहितानि, तेष्वैन्द्रवायवादिग्रहणेष्विव यागापेक्षायामतिदेशप्राप्ते पशुपुरोडाशयाग एव देवताविशिष्टग्रहणसंस्कृतद्रव्यविनियोगविधिः नान्यत्र, आश्विनादिदेवत्यत्वस्यान्यत्रासम्भवात् । प्रधानभूत-

पशुयागेषु चोत्पत्तिशिष्टपश्ववरोधेन द्रव्यान्तरनिवेशानुपपत्तेः। अतो विभिन्नद्रव्यदेवतासम्बन्धद्वयादुत्पन्नवाक्यशिष्टात्प्रयाजैकादशत्वन्यायेन पशुपुरोडाशयागस्याभ्यासस्सम्पद्यते। तत्र चाश्विनादिदेवत्यस्य प्राकृतमेव कार्यं, ऐन्द्रादिदेवत्यस्य त्वप्राकृतमिति सूत्रभाष्यकारयोरभिप्रायः॥

वार्तिककारस्य तु न तावत्सुरादिद्रव्यस्य पशुपुरोडाशे विनियोगस्सम्भवी तस्यैतद्विध्यभावे देवतान्तरावरुद्धत्वेनाश्विनादिदेवत्यत्वस्य तत्र प्रकृतौ विकृतौ वाऽप्रसिद्धेः। वक्ष्यमाणरीत्या तत्र पुरोडाशद्रव्यकत्वस्याप्यौपदेशिकत्वेन सुरादिद्रव्यस्य निवेशानुपपत्तेश्च। नाप्यतिदेशप्राप्तप्रयाजादौ निवेशः, तत्राङ्गभूतकल्पदेवतावरोधेन ग्रहणाङ्गभूतदेवतायाः प्रसङ्गेनोपकारकत्वानुपपत्तेः। अतो गुणात्कर्मान्तरमेव प्राकृतपशुपुरोडाशकार्यापन्नं दर्शपूर्णमासप्रकृतिकं विधीयते॥

न चैवमावाहनमन्त्रेण देवतास्मरणेऽपि स्वाहाकारादिमन्त्रेण दार्ढ्यार्थं पुनस्स्मरणवत् पशुपुरोडाशस्यापि पुनःकरणापत्तिः, प्रकृतावाम्नानाद्यनुरोधेन तथा कल्पनेऽपि विकृतावाधारमन्त्रेण प्राकृतमन्त्रबाधस्येवेहापि पशुपुरोडाशबाधोपपत्तेः॥

नन्वेवं पशुपुरोडाशस्य सौत्रामण्यामप्राप्तेः कथं तत्रैन्द्रादिदेवतान्तरविधिः, कथञ्चित्प्राप्तावपि वोपकारपृष्ठभावेनैव पदार्थप्राप्तेः। प्रकृते च देवतान्तरविधानेन प्राकृतोपकारस्य वस्तुतोऽनतिदेशात् तत्पृष्ठभावेन पशुपुरोडाशयागस्यातिदेशासम्भवात् कथं तत्र देवतान्तरविधिरिति चेत्॥

अत एवैन्द्रादिवाक्ये द्रव्यदेवताविशिष्टप्राकृतपशुपुरोडाशयागस्यैव गृहमेधीये 'आज्यभागौ यजति' इतिवदप्राकृतकार्यार्थ-

तया विधेयत्वाङ्गीकारात् । न च तद्वदिह पशुपुरोडाशयागस्यैव प्रत्यभिज्ञाभावः, 'यद्वै सौत्रामण्यां व्यृद्धं तदेव समृद्धं यदन्यदेवत्याः पशुपुरोडाशाः अन्यदेवत्याः पशवः' इत्यर्थवादस्यैव प्रत्यभिज्ञापकत्वात् । अतोऽप्राकृतकार्य एव पशुपुरोडाशः सुरादियागास्तु कर्मान्तरमेव प्राकृतकार्यापन्नम् । अत एव नैतेषां पशूनां पुरोडाशा विद्यन्ते । 'ग्रहपुरोडाशा ह्येते पशवः' इति लिङ्गमपि पुरोडाशास्तज्जन्यदेवतास्मरणानि न विद्यन्ते, अपि तु ग्रहजन्यान्येव तानीति व्याख्येयम् ॥ ९ ॥

(१०)—चरुर्हविर्विकारस्स्यादिज्यासंयोगात् ॥ ३४॥ प्रसिद्धग्रहणत्वाच्च ॥ ३५ ॥ ओदनो वाऽन्नसंयोगात् ॥३६॥ न द्व्यर्थत्वात् ॥३७॥ कपालविकारो वा विज्ञेयोऽर्थोपपत्तिभ्याम् ॥ ३८ ॥ गुणमुख्यविशेषाच्च ॥ ३९ ॥ तच्छ्रुतौ चान्यहविष्ट्वात् ॥ ४० ॥ लिङ्गदर्शनाच्च ॥ ४१ ॥ ओदनो वा प्रयुक्तत्वात् ॥ ४२ ॥ अपूर्वव्यपदेशाच्च ॥ ४३ ॥ तथा च लिङ्गदर्शनम् ॥ ४४ ॥ स कपाले प्रकृत्या स्यादन्यस्य चाश्रुतित्वात् ॥ ४५ ॥ एकस्मिन्वा विप्रतिषेधात् ॥ ४६ ॥ न वाऽर्थान्तरसंयोगादपूपे पाकसंयुक्तं धार-

णार्थं चरौ भवति तत्रार्थात् पात्रलाभस्स्यादनियमोऽविशेषात् ॥ ४७ ॥ चरौ वा लिङ्गदर्शनात् ॥ ४८ ॥

अत्र त्रिवृच्चर्वश्ववालाधिकरणे चरुशब्दस्यौदनवाचित्वं, वाक्यशेषात्। न तु लोकप्रसिद्ध्या स्थालीवाचकत्वं, लोकप्रसिद्धेर्लाक्षणिकत्वेनाप्युपपत्तेरित्यस्यार्थस्य विचारितस्य प्रयोजनं बाधोपयोगितया कथ्यते। स्थालीवाचित्वे हि 'सौर्यं चरुम्' इत्यादौ स्थाल्या अनदनीयत्वाद्धविष्ट्वानुपपत्तेस्सम्बन्धसामान्ये तद्धितमङ्गीकृत्य स्थाली सूर्यदेवत्यहविःपाकसाधनत्वेन विधीयते। ततश्च कपालस्य बाधः ॥

वस्तुतस्तु—तदाऽपि आग्नेयविकारत्वे एव प्रमाणाभावात् साम्नाय्यावकारत्वे च स्थाल्याः प्राप्तत्वेनाविधेयत्वात् सम्बन्धसामान्ये तद्धिताङ्गीकारे प्रमाणाभावाच्च कृष्णलवत् स्थाली हविष्ट्वेनैव विधीयते। अतश्च प्राकृतस्य हविष एव वा बाधः ॥

औदनवाचित्वे तु तस्य हविष्ट्वेनैव योग्यत्वात् पुरोडाशस्य बाधः। तत्रापि चरुशब्दस्य याज्ञिकप्रसिद्ध्या अनवस्रावितान्तरूष्मपक्वतण्डुलप्रकृतिकौदनवाचित्वस्य तृतीये स्थापितत्वात्तस्य च स्थालीमन्तरेणैकस्मिन्नपि कपाले पाकानुपपत्तेः कपालस्य तद्बाधत्वादेश्चार्थलोपाद्बाधः ॥

अत एव स्थाल्याश्चरुपाकान्यथाऽनुपपत्त्यैवार्थप्राप्तत्वेन कपालस्थानापन्नत्वाभावात् न कपालधर्मा आसादनप्रोक्षणादयस्तत्र कार्याः। एवं चरौ संयवनाभावात् तदर्थाः प्रणीतास्तद्धर्माश्च न भवन्तीत्युक्तमेव। एवं पेषणस्यापि पुरोडाशसिद्धय-

र्थत्वेन चरुसिद्धेस्तद्व्यतिरेकेणापि जायमानत्वाच्चरौ पेषणस्य बाधः । एवमुपधानादीनां कपालधर्माणामपि ॥

वस्तुतस्तु 'कपालान्युपदधाति' इत्यत्र कपालत्वस्य व्रीहित्ववदविवक्षितत्वात् हविःपाकाधिकरणत्वस्य च स्थाल्यामपि सत्त्वात् हविःपाकसाधनीभूतगार्हपत्यादेरिवोपधानस्यापि याज्ञिकाचारसिद्धस्य प्राप्तिरविरुद्धा । अत एव तत्र न कपालविशेषत्वस्यापि व्रीहित्वादिवदेव विवक्षा ॥

एवं 'पात्राण्यासादयति' इत्यादावपि पात्रत्वस्याविवक्षितत्वात् तत्साधनताश्रयत्वस्यैव विवक्षितत्वेन स्थाल्यामपि तद्धर्मप्राप्तिरविरुद्धा । अतश्च चरौ एतावन्तो धर्माः स्थालीसादनं, प्रोक्षणं, 'आदेवयजं वह' इति अङ्गारनिरूहणं, 'ध्रुवासि' इत्यूहेन स्थाल्यधिश्रयणं, तस्यां लौकिकजलं तप्तं कृत्वा 'धर्मोस्स्थ' इत्यूहेन तण्डुलप्रक्षेपः, पर्यग्निकरणं, 'अग्ने हव्यं रक्षस्व' इति प्रैषः, 'आप्यायतां' इत्यभिघारणं, 'श्रुत उत् स्राति' इत्युद्वासनं, 'आर्द्रः प्रथस्नुः' इति पुनरभिघारणमित्यादयः प्रत्येतव्याः ॥ *

---

* इत ऊर्ध्वं विद्यमानेन बाधास्त्वित्यादिग्रन्थेनेमान्याधिकरणानि व्याख्यातानि । तत्सूत्रपाठस्तु—

(११) तस्मिन् पेषणमनर्थलोपात्स्यात् ॥ ४५ ॥ अक्रिया वा अपूपहेतुत्वात् ॥

(१२) पिण्डार्थत्वाच्च सयवनम् ॥ ५१ ॥

(१३) संवपनं च तादर्थ्यात् ॥ ५२ ॥

(१४) सन्तापनमधश्श्रयणात् ॥ ५३ ॥

(१५) उपधानं च तादर्थ्यात् ॥ ५४ ॥

(१६) पृथुश्लक्ष्णे वाऽनपूपत्वात् ॥ ५५ ॥

(१७) अभ्यूहश्चोपरि पाकार्थत्वात् ॥ ५६ ॥

(१८) तथाऽवज्वलनम् ॥ ५७ ॥

(१९) व्युद्वत्यासादनं च प्रकृताबश्रुतित्वात् ॥ ५८ ॥

बाध्यास्तु प्रणीतापेषणं, स्थाल्या उपरि अङ्गारस्थापनं, कपालयोगजपः, संवापः, संयवनं, पिण्डीकरणं, प्रथनं, त्वक्करणं, हविष्यङ्गारभस्माद्यारोपः, आप्यानिनयनं, सदनकरणं, भस्माद्युद्धारः व्युद्धरणं, तस्य प्रकृतावार्थिकत्वात्, 'यस्त आत्मा' इत्यधस्तात् प्रत्यञ्जनमित्यादयः । अत्र सर्वत्रार्थलोपो बुद्ध्याऽनुसन्धेयः ॥ १० ॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
दशमस्याध्यायस्य प्रथमः पादः

अथ दशमस्याध्यायस्य द्वितीयः पादः.

(१)--कृष्णलेष्वर्थलोपादपाकस्स्यात् ॥ १ ॥
स्याद्वा प्रत्यक्षशिष्टत्वात्प्रदानवत् ॥ २ ॥

कृष्णलचरौ पाकः कर्तव्यो न वेति चिन्तायां—कृष्णलानामेव हविष्ट्वात् तेषां च श्रपणमन्तरेणापि तत्त्वादर्थलोपादकरणम्। 'यत्तु घृते श्रपयति' इति तत्प्रकरणे वचनं तन्न श्रपणविधायकं, तत्तत्फलानुकूलव्यापारस्यैव पच्याद्यर्थत्वेन स्थापितत्वात् प्रकृते च रूपरसादिपरावृत्तिरूपविक्लित्त्याख्यस्य फलस्यासम्भवेन श्रपणानुपपत्तेः। अपि तु कृष्णलानां घृताधिकरणकत्वविधायकम्। श्रपयतिस्तु तण्डुलपाकेऽपि द्रवसंयोगसत्त्वात् लक्षणया तदनुवादः। अतश्च न तत्राग्निसंयोगरूपस्तापोपि कार्यः येन तत्पृष्टभावेन गार्हपत्योपि प्राप्येतेति प्राप्ते—

घृताधिकरणत्वस्योत्पत्तिवाक्यादेव प्राप्तेरेतद्वाक्यवैयर्थ्यप्रसङ्गादग्निसंयोग एवात्र पाकाविनाभूतत्वाल्लक्षणया घृताधिकरणकत्वविशिष्टः शुद्धो वा विधीयते। तस्य च लाघवात् प्राकृतस्यैव प्रतिप्रसवतया विधिः। यद्यपि च नाग्निसंयोगमात्रस्य प्रकृतौ पृथग्विधिरस्ति। तथाऽपि श्रपणविधिस्वैनेव हविरारम्भकक्रियान्तरविधिवदस्याप्यर्थतो विहितत्वात् प्रतिप्रसवत्वोपपत्तिः। अतश्च तन्मात्राङ्गभूतस्य गार्हपत्यादेरपि पेषणादिप्रतिप्रसवान्तर-

विधिन्यायेन प्राप्तौ न किञ्चिद्बाधकम्। अत एवात्र मुख्यश्रपणाभावान्नान्ये श्रपणधर्माः कार्याः । अपि त्वग्निसंयोगाङ्गभूता एव 'प्रधानं नीयमानं हि' इति न्यायेनेति ध्येयम्॥ १॥

(२)—उपस्तरणाभिघारणयोरमृतार्थत्वादकर्म स्यात् ॥ ३ ॥ क्रियेत वाऽर्थवादत्वात्तयोस्संसर्गहेतुत्वात् ॥ ४ ॥ अकर्म वा चतुर्भिराप्तिवचनात् सह पूर्णं पुनश्चतुरवत्तम् ॥ ५ ॥ क्रिया वा मुख्यावदानपरिमाणात् सामान्यात्तद्गुणत्वम्॥ ६ ॥ तेषां चैकावदानत्वात् ॥ ७ ॥ आप्तिस्सङ्ख्यासमानत्वात् ॥ ८ ॥ सतोऽस्त्वाप्तिवचनं व्यर्थम् ॥९॥ विकल्पस्त्वेकावदानत्वात् ॥१०॥ सर्वविकारे त्वभ्यासानर्थक्यं हविषो हीतरस्य स्यात् अपि वा स्विष्टकृतस्स्यात् इतरस्यान्याय्यत्वात् ॥ ११ ॥ अकर्म वा संसर्गार्थनिवृत्तित्वात् तस्मादाप्तिसमर्थत्वम्॥

तत्रैवोपस्तरणाभिघारणे कार्ये न वेति|प्रकृतावदृष्टार्थत्वात्कार्ये एव। न च 'उपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोति' इति वाक्यशेषेणानयोस्स्वादिमार्थत्वावगतेः कृष्णलानां चानदनीयत्वेन तदभावाल्लोप इति वाच्यं, देवताया भोगाभावेन त-

स्यार्थवादमात्रत्वात्। यद्यपि च प्रकृतावेषां नादृष्टार्थता कल्प्येत किन्तु चतुरवत्तसम्पत्त्यर्थतैव, तथाऽपि कृष्णलचरावलोपः। न च तथाऽपि 'चत्वारि चत्वारि कृष्णलान्यवद्यति चतुरवत्तस्यान्नस्यै' इति वचनेनावदानानुवादेन कृष्णलचतुष्कविधानात् तेन च चतुरवत्तसम्पत्त्यनुवादात् प्रकृताववदेयचतुष्कस्थानापत्त्यवगतेरुपस्तरणाभिघारणसाधनीभूताज्यस्य बाध इति वाच्यं, तथात्वे वीप्साऽनुवादानुपपत्तेः। न च स्विष्टकृदभिप्रायेणानुवादः प्रमाणाभावात्, हवीरूपकृष्णलचतुष्कविधानस्याङ्गष्ठुपर्वमात्रस्थानापन्नतयाऽपि सम्भवेन प्रधानमात्रेऽपि वीप्सोपपत्तेश्च।

चतुरवत्तसम्पत्त्यनुवादस्तु कृष्णलचतुष्कद्वयावदानस्यापि चतुरवत्तसम्पादकत्वमुपस्तरणाभिघारणसाहाय्येनास्तीति नैव विरुद्धयते। अतश्च चतुरवत्तसम्पत्त्यर्थत्वादपि कर्तव्ये एवोपस्तरणाभिघारणे। न हि तयोः प्रकृतौ सूक्ष्माणां पुरोडाशावयवानां स्रुचि संसर्गापत्तेराहवनीयपाकासम्भवेन तद्द्वयावृत्त्यर्थत्वात्, कृष्णलेषु च तत्प्रसक्त्यभावाल्लोप इति वाच्यं; तथात्वे उपस्तरणाभिघारणयोरन्यतरेणापि तत्सिद्धया विकल्पापत्तेः धानावपादौ संसर्गाप्रसक्त्या तदनापत्तेश्च, प्रकृतौ चतुरवत्तसम्पत्त्यर्थत्वाभावे वपादौ पञ्चावदानादिसिद्धयर्थमभिघारणस्य वृद्धयनापत्तेश्चेति प्राप्ते—

दृष्टार्थत्वायासंसर्ग एव तयोः प्रयोजनं न तु चतुरवत्तसम्पत्तिः, तस्य प्रकृतावविहितत्वात्। 'चतुरवत्तं जुहोति' इत्यत्रावत्तोद्देशेन प्रक्षेपो विधीयते, चतुःपदं तु उपस्तरणाद्यभिप्रायेणानुवादः। इतरथा विशिष्टोद्देशे वाक्यभेदात् गौरवाच्च। अतश्च चतुरवत्तस्योद्देश्यत्वेनैवाप्रसिद्धौ विधेयत्वेन सुतराम-

प्रसिद्धेर्न तत्सम्पत्त्यर्थतोपस्तरणाभिघारणयोः। अतोसंसर्गमात्रार्थत्वादकरणं कृष्णलेषु तयोरिति मूलानुयायिनः।

वस्तुतस्तु चतुश्शब्दस्य प्रमादपाठापत्तेरुद्देश्यतावच्छेदककोटिप्रविष्टत्वमस्त्येव। कारकतातिरिक्तसम्बन्धेन विशेष्टस्य व्युत्पन्नत्वाच्च न वाक्यभेदः। अत एवोद्देश्यत्वान्यथानुपपत्त्या चतुरवदानस्य विधिकल्पना। अत एव वपायां सकृदवदानविधानेऽपि प्राकृतस्य चतुरवत्तस्य प्राप्तेर्यद्यपि चतुरवत्तीति निर्देशस्सङ्गच्छते। इतरथा असंसर्गार्थं सकृदेवोपस्तरणाभिघारणप्राप्तेः त्रयवत्तीति निर्देशापत्तेः अत उपस्तरणाभिघारणयोः प्रकृतावसंसर्गवच्चतुस्सङ्ख्यासम्पत्तिरपि प्रयोजनम्।

तत्र त्वेतावान् विशेषः—असंसर्गस्यैव मुख्यप्रयोजनता वैतुष्यवत् दृष्टार्थत्वात् चतुस्सङ्ख्या तत्सत्त्व एव। अतश्च यथैव नावघातादयो वैतुष्याभावे नियमादृष्टेन प्रयुज्यन्ते अपि तु तत्सम्भव एव, तथा असंसर्गाख्यप्रयोजनसत्त्व एव चतुस्सङ्ख्या सम्पत्त्या उपस्तरणाभिघारणे प्रयुज्येते नान्यथा। अतश्च कृष्णलेषु नियमादृष्टार्थमवघातकरणवच्चतुस्साङ्ख्यासम्पत्त्यर्थं नोपस्तरणाभिघारणकरणम्। एवं केवलधानादियागेऽपि सवनीयहविष्षु तत्सम्प्रतिपन्नदेवताकत्वात्पुरोडाशाद्यर्थे तदनुष्ठानम्। वपाहृदयादौ तु कतिपयावयवसंसर्गस्यैव सम्भावितत्वात् तन्निवृत्त्यर्थं तदावश्यकत्वे पञ्चावदानसम्पत्त्यर्थं तद्विवृद्धिरपि कल्पसूत्रकारादिसम्मता सङ्गच्छते। एवं एककपाले सर्वहोमेऽपि चतुरवत्तादिसम्पत्त्यर्थं तद्विवृद्धिः तत्रापि सम्भावितत्वात्। प्रकृते तु संसर्गस्यासम्भावितत्वात् प्रत्युतोपस्तरणादिकरण एव तत्सम्भावनानिवृत्तिस्तयोः॥ २॥

(३)—भक्षाणां तु प्रीत्यर्थत्वादकर्म स्यात्॥१३॥ स्याद्वा निर्धानदर्शनात् ॥१४॥ वचनं वाऽऽज्यभक्षस्य प्रकृतौ स्यादभागित्वात् ॥१५॥ वचनं वा हिरण्यस्य प्रदानवदाज्यस्य गुणभूतत्वात् ॥ १६ ॥

प्रकृतौ 'शेषभक्षाश्शेषप्रतिपत्त्यर्थाः' इति वक्ष्यते। शेषप्रतिपत्त्यर्थत्वेऽपि च प्रयाजशेषन्यायेन कर्तुः करिष्यमाणकर्मणि बलाधानार्था अपीत्युक्तं षष्ठे। तत्र च प्रतिपत्तेः प्रयोजकस्य सत्त्वात् कृष्णलेषु कर्तव्या एव ते। यदा तु कृत्वाचिन्तया शुद्धकर्तृप्रीत्यर्थत्वं तदा ते तत्र भवन्ति न वेति चिन्तायां—

कृष्णलानामनदनीयत्वेन प्रीत्ययोग्यत्वादर्थलोपाद्बाधः। न च 'हिरण्यस्य निरवधयन्तो भक्षयन्ति चुच्छुषाकारम्' इति वचनेन प्रतिप्रसवः, योग्यतयाऽत्राज्यस्यैव हिरण्याधारस्य भक्षणविधानात् 'हिरण्यस्य निरवधयन्तः' इत्यस्य हिरण्यं त्यक्त्वा इत्यर्थात्। यदा तु भाष्यानुसारात् 'हिरण्यस्य' इति न पठ्यते तदा आज्यस्यैव निरवदानं दन्तासंयोगः। अत एव 'चुच्छुषाकारम्' इत्यनुवादः आज्यभक्षणे तदावश्यकत्वात्। अतश्चाप्राकृतमिदं भक्षणमारादुपकारकं अधिकरणीभूताज्यप्रतिपत्तिर्वेति न तत्र प्राकृतभक्षधर्माः कार्या इति प्राप्ते—

प्रधानान्वयस्याभ्यर्हितत्वात् हिरण्यस्यैव भक्षणं न त्वाज्यस्य; 'निरवधयन्तः' इत्यस्य दन्तेन पीडनमकुर्वन्त इत्यर्थात् अतो लाघवात् हविर्भक्षणस्यैव प्रतिप्रसवविधिः। स च चुच्छुषाकारत्वविशिष्टस्य प्रधानान्वयानुरोधेन पञ्चमविधिप्रका-

रस्याप्यङ्गीकारात्। वस्तुतस्तु – स्वसंपृक्ताज्याभिप्रायेण चुच्छु-षाकारत्वस्याप्यनुवाद एव। अतश्च पेषणन्यायेन कार्या एव भक्षधर्मा भक्षाश्च। कृत्वाचिन्तोद्घाटने तु प्राप्तभक्षानुवादेन दन्त-संयोग एव निषिध्यत इति विवेकः ॥ ३ ॥

(४)–एकधोपहारे सहत्वं ब्रह्मभक्षाणां प्रकृतौ विहितत्वात् ॥ १७ ॥

कृष्णलचरावेव 'एकधा ब्रह्मण उपहरति' इति श्रुतम्। तत्रैकधाशब्दस्यैकप्रयत्नसाध्यत्वाख्ये सकृत्त्वे एककालकत्वाख्ये सहत्वे च लोके प्रयोगात् किमनेन विधीयत इति चिन्तायां – प्रकृतौ इडाप्राशित्रचतुर्धाकरणशंयुवाककालभक्षणानां मध्ये सकृत्त्वविधानात् आद्यस्यैव करणमितरेषां निवृत्तिः। सहत्वविधानाद्वा सर्वेषां यौगपद्यमित्यनियमे प्राप्ते ॥

यत एवायं विधिस्साधारणः अत एवातिदेशेन हविस्संस्कारकतया प्राप्तानां भक्षाणां बाधे प्रमाणाभावात् सहत्वमेव सर्वेषां विधीयते। अत्र च तत्तच्छेषभक्षणार्थानां तत्तद्धारणानामेवोद्देशेन साहित्यं विधीयते, भक्षणे नानाकालीनत्वस्य वक्ष्यमाणत्वात्। ब्रह्मसम्बन्धश्च वक्ष्यमाणन्यायेनानुवाद इति न विशिष्टोद्देशः। अतस्सहत्वविधानात्कालस्यैव प्रत्यासन्नाद्बाधः ॥४॥

(५)–सर्वत्वं च तेषामधिकारात्स्यात् ॥ १८ ॥
पुरुषापनयो वा तेषामवाच्यत्वात् ॥ १९ ॥

तत्रैव 'सर्वं ब्रह्मणे परिहरति' इति श्रुतम्। तदनेन ब्रह्मभागस्य सर्वस्य परिहरणीयत्वविधाने तस्य वा परिहरणीयस्य

सर्वत्वविधाने विशिष्टोद्देशापत्तेर्वाक्यवैयर्थ्याच्च सर्वोद्देशेन ब्रह्मसम्बन्धो विधीयते; परिहारस्य च पूर्ववाक्ये उद्देश्यत्वेन प्रत्यभिज्ञायमानत्वादाश्रयत्वम्। अतश्च परिहरतीत्ययमनुवादः। अत एव पूर्ववाक्ये परिहारस्य कर्मापेक्षायां कृष्णलशेषस्य पूर्वप्रकृतस्य प्राधान्येनोपस्थितस्यान्वितत्वात् तत्परिहार एवाश्रयः न त्वन्वाहार्यादिपरिहारः।

अथवा परिहरणोद्देशेनैव ब्रह्मसम्बन्धः प्रकृतिप्राप्तेः पूर्वं विधीयते। तत्फलं चावच्छेदकावच्छेदेन ब्रह्मसम्बन्धविधानात् ब्रह्मभागस्य तत्सम्बन्धप्राप्तावपि पुरुषान्तरभागस्य तत्सम्बन्धसिद्धिः। सर्वत्वं चानुवादः। अतश्च भागान्तरेषु प्रत्याम्नानात् पुरुषान्तरस्य बाधः। एवं च 'निरवधयन्तो दन्ता भक्षयन्तीति' इडुवचनं व्याख्येयम्। एतद्बलाद्वा पुरुषान्तरबाधो वैकल्पिकः। अपूर्वप्रवृत्त्या विशिष्टप्राकृतभक्षविधानाच्च न वाक्यभेदः॥ ५॥

(६)—पुरुषापनयात्स्वकालत्वम्॥ २०॥

सर्वेषां शेषाणां युगपदुपसंहृतानां युगपदेव ब्रह्मणा भक्षणं उत तत्तत्प्राकृतकाल इति चिन्तायां—परिहारस्य भक्षार्थत्वात् तत्रैवानेन सहत्वं नामान्तरेण विधीयते। इतरथा सर्वत्वस्यापि परिहारमात्रे विधानापत्तेः पुरुषान्तराणामपि भक्षापत्तिरिति प्राप्ते—

सर्वत्वस्य परिहारमात्रे विधावदृष्टार्थत्वापत्तेर्युक्तं भक्षे पुरुषान्तरनिवर्तकत्वं; सहत्वस्य तु परिहारमात्रे विधावप्यदृष्टार्थत्वाभावात् युगपत् सर्वे ब्रह्मणे परिहृत्य तत्तत्काले तेन भक्षणोपपत्तेः न भक्षणे प्राकृतकालबाधः॥ ६॥

(७)—एकार्थत्वादविभागस्स्यात्॥ २१॥

प्रकृतौ पुरोडाशस्य चतुर्धाकरणं बर्हिषत्करणं च विधाय 'इदं ब्रह्मणः। इदं होतुः। इदमध्वर्योः। इदमग्नीध्रः' इति व्यपदेश आम्नातः, स कृष्णलेषु सर्वस्यैव ब्रह्मणा भक्षणीयत्वान्न कर्तव्यः। न हि होत्रादिसम्बन्धाभावे 'इदं होतुः' इत्यादिव्यपदेशो युज्यते। अतश्च व्यावर्तनीयाभावात् 'इदं ब्रह्मणः' इत्यपि न। न चैवं चतुर्धाकरणस्यापि प्रयोजनाभावः, सर्वपरिहरणीयोद्देशेन सहत्वविधानादेव तदावश्यकत्वात्। यदि तु तत्तत्कालकर्तव्यभक्षणार्थपरिहरणीयानामेव सहत्वविधिरिति विभाव्यते तदा माऽस्तु सूत्रस्वारस्यात्तदपि। बर्हिषत्करणं तु सूक्ष्मत्वात् कृष्णलानां चतुर्धाकरणोत्तरकालाभावाच्च निवर्तत इत्यन्यदेतत्॥ ७॥

(८)—ऋत्विग्दानं धर्ममात्रार्थं स्याद्दातिसामर्थ्यात्॥ २२॥ परिक्रयार्थं वा कर्मसंयोगाल्लोकवत्॥ २३॥ दक्षिणायुक्तवचनाच्च॥ २४॥ न चान्येनानम्येत परिक्रयात्कर्मणः परार्थत्वात्॥ २५॥ परिक्रीतवचनाच्च॥ २६॥ सनिवन्येव भृतिवचनात्॥ २७॥ नैष्कर्तृकेण संस्तवाच्च॥ २८॥

'ऋत्विग्भ्यो दक्षिणां ददाति' इति तत्र तत्र श्रुतं, दक्षिणादानं नारादुपकारकं अपि तु दृष्टार्थत्वलाभायापेक्षितानत्यर्थमेव। नियमादृष्टस्य कल्पनीयत्वाच्च न धर्मविधिवैयर्थ्यम्। अतस्सत्रे स्वत एवानतत्वेन न तत्सिद्ध्यर्थं दक्षिणादानमिति सिद्धम्। अत एव 'नात्र गौर्दीयते' इति नित्यानुवादोपि विध्यन्तरशेषत्वात्सङ्गच्छते॥ ८॥

(९)—शेषभक्षाश्च तद्वत् ॥ २९ ॥ संस्कारो वा द्रव्यस्य परार्थत्वात् ॥ ३० ॥ शेषे च समत्वात् ॥ ३१ ॥ स्वामिनि च दर्शनात् तत्सामान्यादितरेषां तथात्वम् ॥ ३२ ॥ तथा चान्यार्थदर्शनम् ॥ ३३ ॥

शेषभक्षास्तत्र तत्र द्वितीयासंयोगात् हविःप्रतिपत्त्यर्थाः; प्रयाजशेषन्यायेन कर्तुः करिष्यमाणकर्मणि बलाधानार्थाश्च न त्वानत्यर्थाः। तस्याः प्रकृतावानुषङ्गिकत्वेऽपि प्रयोजकत्वाभावात्॥

अस्तु वा दृष्टप्रयोजनत्वाविशेषात् त्रयाणामपि प्रयोजकत्वं न त्वानतिमात्रस्य। अतस्सत्रे तदभावेऽपि प्रतिपत्त्याद्यर्थं कर्तव्या एव ॥ ९ ॥

(१०)—वरणमृत्विजामानमनार्थत्वात्सत्रे न स्यात् स्वकर्मत्वात् ॥ ३४ ॥ परिक्रयश्च तादर्थ्यात् ॥ ३५ ॥ प्रतिषेधश्च कर्मवत् ॥ ३६ ॥ स्याद्वा प्रासर्पिकस्य धर्ममात्रत्वात् ॥ ३७ ॥ न दक्षिणाशब्दात् तस्मान्नित्यानुवादस्स्यात् ॥ ३८ ॥

परिक्रयणवत् वरणमपि ऋत्विगानत्यर्थत्वात् सत्रे न कार्यमेव। न हि तददृष्टरूपऋत्विक्त्वसम्पत्त्यर्थं, ऋत्विक्त्वस्यादृष्टरूपत्वे प्रमाणाभावस्य तृतीये साधितत्वात्। न वा ऋतुयाज्यावरणवत् स्वतन्त्रादृष्टार्थं, प्रमाणाभावात्। सिद्धमपि चैवमादि बाधलक्षणे शिष्यहितार्थं कथ्यत इति विवेकः ॥ १० ॥

(११)–उदवसानीयस्सत्रधर्मा स्यात् तदङ्ग-त्वात्तत्र दानं धर्ममात्रं स्यात् ॥ ३९ ॥ न त्वेतत्प्रकृतित्वाद्विभक्तचोदितत्वाच्च ॥४०॥

अनारभ्य 'सत्रादुदवसाय पृष्ठशमनीयेन सहस्रदक्षिणेन यजेरन्' इति श्रुतम्। सोऽयं पृष्ठशमनीयः प्रकृतिविकृतिसाधारणसत्रमात्राङ्गं उत सत्रोदवसाने निमित्ते नैमित्तिकोऽयं स्वतन्त्र इति चिन्तायां—

सत्राणां फलवत्त्वादफलोऽयं बृहस्पतिसवन्यायेन सत्राङ्गम्। यद्यपि वा सत्रोदवसानं निमित्तं तथाऽपि अश्वप्रतिग्रहेष्टिन्यायेन सत्राङ्गम्। न चोत्पूर्वकस्यावस्यतेस्तद्विषयकव्यापारोपरमवाचित्वात् अङ्गत्वे चास्यापि तद्विषयकव्यापारत्वावश्यंभावादुदवसानोत्तरत्वानुरोधेन स्वतन्त्रफलकल्पनायामपि न दोष इति वाच्यं, एकसत्रोत्तरमपि सत्रान्तरस्य तस्यैव वा कामनावशतः करणसम्भवेन सत्रत्वावच्छिन्नविषयकव्यापारसामान्योपरमस्य कदाऽपि निश्चेतुमशक्यत्वात्। अतस्त्वयाऽपि तद्व्यक्तिप्रयोगोपरम एवोदवसानपदार्थो वाच्यः। स च ममापि सम्भवतीति युक्तमङ्गत्वं बृहस्पतिसववादिवत्। न चैवमङ्गप्रधानयोरेककर्तृत्वाद्यजमानैरेव करणापत्तौ दक्षिणाम्नानानुपपत्तिः तस्या अदृष्टार्थत्वाङ्गीकारेणाकर्मकरेभ्योपि ब्राह्मणेभ्यो दानोपपत्तेः।

वस्तुतस्तु अङ्गत्वेऽपि प्रयोगबहिर्भूतत्वेन पृष्ठशमनीयस्य ऋत्विक्कर्तृकत्वोपपत्तेः बृहस्पतिसव इव दक्षिणाम्नानं न विरुध्यते। 'ये यजमानास्त ऋत्विजः' इत्यनेन हि सत्रप्रयोगमध्यवर्त्यार्त्विज्योद्देशेनैव, वाजपेयप्रयोगमध्यवर्तियूपोपसद्दीक्षोद्देशेन स-

दशारत्निवादिविधिवद्यजमानविधानात् बृहस्पतिसवयूपादावातिदेशिकधर्मप्राप्तिवदिहापि ऋत्विगन्तरस्यैव प्राप्त्युपपत्तिः। अतश्च दक्षिणाज्ञानस्याप्युपपत्तेरङ्गमेव पृष्ठशमनीय इति प्राप्ते--

'सत्रादुदवसाय' इत्यत्र उत्पूर्वकस्यावस्यतेः सत्रत्वावच्छिन्नोपधेयफलव्यक्त्युद्देश्यकव्यापारसामान्योपरमवाचित्वात् सत्यपि सत्रान्तरस्याग्रे कर्तव्यत्वे एतत्सत्रोपधेयफलव्यक्तेर्व्यापारान्तराभावेनोदवसानोपपत्तेरङ्गत्वे च तदसम्भवादनङ्गत्वम्। 'वाजपेयेनेष्ट्वा, संस्थाप्य पौर्णमासीम्' इत्यादौ तु प्रयोगसमाप्तिमात्रस्यैवोक्तेर्नाङ्गत्वविघातः। अतस्सत्रोदवसाने निमित्ते नैमित्तिकोऽयं पुरुषार्थतया विधीयते। अतश्च तदकरणे प्रत्यवायः करणाच्च पापध्वंसः। प्रयोजनं—अङ्गत्वे सत्राधिकारिभिः संहत्य ऋत्विगन्तरसम्पादनेन करणं, अनङ्गत्वे तु वक्ष्यते। अत एवातिदेशिकस्य कर्त्रैकत्वस्य साप्तदश्यादिना बाधकल्पकत्वादध्यायसङ्गतिः॥

(१२)—तेषां तुवचनाद्विद्यावत्सहप्रयोगः स्यात् ॥ ४१ ॥

अनङ्गत्वेऽपि संहत्यैव करणं आख्यातोपात्तस्य बहुत्वस्योपादेयकर्तृगामित्वेन सत्रवाक्य इव विवक्षितत्वात्। कथञ्चित्प्राप्तत्वेऽपि संहत्य प्रयोगसिद्ध्यर्थं 'सृष्टीरुपदधाति' 'सोमेन यजेत' इत्यादिवद्विशिष्टविध्यङ्गीकारेण प्रयोजनसिद्ध्यर्थं विध्युपपत्तेश्च। स्थितं तावदपर्यवसितम्॥ १२ ॥

(१३)—तत्रान्यानृत्विजो वृणीरन् ॥ ४२ ॥
एकैकशस्त्वप्रतिषेधात्प्रकृतेश्चैकसंयोगात् ॥ ४३ ॥

अनङ्गत्वे अङ्गत्वेऽपि वोदवसानसमानकर्तृकत्वानुरोधात् यजमानैरेवार्त्विज्यं कर्तव्यम्। न च तस्य प्रधानमात्राभिप्रायत्वेनोपपत्तिः। साङ्गे समानकर्तृकत्वश्रवणेन 'अप्स्ववभृथेन चरन्ति' इत्यादावद्भिराहवनीयादेरिव औपदेशिकेन यजमानकर्तृकत्वेनाङ्गेष्वपि ऋत्विक्कर्तृकत्वबाधात् दक्षिणादानस्यादृष्टार्थत्वेनाप्युपपत्तेश्चेति प्राप्ते.

प्रयोजककर्तृत्वेनापि प्रकृताविव यजमानकर्तृकत्वोपपत्तेरङ्गत्वेऽनङ्गत्वेऽपि वा सौर्यादाविवातिदेशप्राप्तऋत्विग्बाधे प्रमाणाभावः। एवं च दक्षिणाश्रुतिराङ्गस्येनोपपद्यते॥

स्थितादुत्तरं—न पृष्ठशमनीये संहत्य प्रयोगः बहुत्वस्य प्राप्तत्वेनाविधेयत्वात्। उदवसाने ह्यनेकेषां सत्रकर्तॄणां कर्तृत्वं प्राप्तमेव। अतस्तत्समानकर्तृकत्वादेव पृष्ठशमनीयेऽपि तत्प्राप्तिः। अतोऽयं तावदनुवादः, क्त्वाप्रत्ययस्य हि पूर्वकालत्ववत् समानकर्तृकत्वमप्यनुशासनबलाद्वाच्यम्। न चाव्ययकृत्त्वेनास्य भावशक्तत्वात् क्त्वाप्रकृत्यर्थभूतक्रियाया उत्तरक्रियायामन्वये पूर्वकालत्वसमानकर्तृत्वयोस्संसर्गत्वेनैव बोधोपपत्तेर्न तयोस्तस्यातिरिक्ता शक्तिरिति वाच्यं, पदार्थानुशासनप्रवृत्तपाणिन्यादेस्संसर्गानुशासकत्वाविरोधात्॥

किञ्च क्त्वाप्रकृतिभूतधात्वर्थस्यैवोत्तरक्रियासम्बन्धः क्त्वा च संसर्गतात्पर्यग्राहकः इत्युच्यते। अथवा क्त्वार्थभाव एव निरुक्तोभयसंसर्गेणोत्तरक्रियायामन्वेति इति विवेक्तव्यं, तत्र न तावदाद्यः—क्त्वाज्ञानत्वेनैव तात्पर्यग्राहकत्वेऽगृहीतसङ्केतस्यापि तात्पर्यग्रहापत्तेः। तात्पर्यग्राहकत्वप्रकारकज्ञानत्वेन तत्त्वे आत्माश्रयापत्तेः। एकत्वादिशक्तद्वितीयादेः कर्मत्वादिसंसर्गतात्पर्यग्राहकत्वेनैवोपपत्तौ प्रातिपदिकार्थस्यैव कर्मतादिसंसर्गेण क्रियायामन्वयापत्तेः कर्मत्वादौ द्वितीयादेश्शक्त्यनापत्तिश्च॥

अत एव नान्त्यः, सङ्ख्याया एव स्वसमानाधिकरणकर्मत्वादिसंसर्गेण क्रियान्वयापत्तेः । अतोऽनुशासनबलात् कर्मत्वादिवदेव पूर्वकालत्वादेरपि वाच्यत्वम् । अस्तु वा तत्, तथाऽपि न दोषः । अतस्तत्तावदनुवादः । एकेन पदेनानेकेषामुपादाने प्रतीयमानकर्तृसाहित्यमपि न तावदुद्वसनि विवक्षितं, निमित्तविशेषणत्वात् । सत्रे संहत्य कर्तृत्वेऽपि तत्त्यागे साहित्यं विनैव कर्तृत्वाच्च । यो हि संयोगादिरूपो व्यासज्यवृत्तिधर्मस्तदभावः प्रत्येकवृत्त्येव किमुत यदा सत्रे बहुवचनानुरोधात् प्रत्येकमेव कर्तृत्वंकर्तृणां परं समुच्चयः, तदा तत्त्यागे साहित्याभावे कस्सन्देहः ! आख्यातोपात्तबहुत्वावगतसाहित्यं तु बहुत्वस्याविवक्षितत्वे अविवक्षितमेव । उद्वसाने हि यादृशा निरपेक्षाः कर्तारः तादृशा एव समानकर्तृकत्वबलेन पृष्ठशमनीयेऽवगम्यन्ते । अतः प्रथमावगतनैरपेक्ष्यबलेन न साहित्यविवक्षा ।

न च नैरपेक्ष्यानङ्गीकारेऽपि लयबन्तोपात्तसमानकर्तृकत्वाविरोधात् बहुत्वस्य तदवगतसाहित्यस्य च विवक्षोपपत्तिः । विशिष्टविधिगौरवभयेन सम्भवत्प्राप्तिकस्य बहुत्वस्यानुवादाङ्गीकारात् । अतएव पृष्ठशमनीयमात्रविधानात् विधेर्लाघवम् ॥

न च सस्कारविध्यन्यथाऽनुपपत्त्यादिना सम्भवत्प्राप्तिकस्यापि सोमादेस्सकृद्व्यावृत्त्यादिरूपप्रयोजनसिद्ध्यर्थं विशिष्टविध्याश्रयणवदिहापि साहित्यसिद्ध्यर्थं बहुत्वविध्याश्रयणमिति वाच्यं, सोमादिपदवैयर्थ्यभिया तत्र तथाऽऽश्रयणेऽपि प्रकृते बहुवचनस्यावर्जनीयतयाऽनुवादत्वोपपत्तेः । अतः एकैकश्येनैनैव पृष्ठशमनीयः कार्य इति न तत्र प्राकृतकर्त्रैकत्वबाधः ॥ १३ ॥

(१४)कामेष्टौ च दानशब्दात् ॥ ४४ ॥

वचनं वा सत्रत्वात् ॥ ४५ ॥

सारस्वते सत्रे 'प्लाक्षं प्रस्रवणं प्राप्याग्नये कामायाष्टाकपालं निर्वपति तस्यां अश्वां पुरुषीं च धेनुके दद्युः' इति श्रुतम् । तत्र न तावदिहोदवसानवत् प्रस्रवणप्राप्तेर्निमित्तता येन तद्वदेव कामेष्टेः प्रत्येकमेव ऋत्विगन्तरोपादानेन करणमाशङ्क्येत । सरस्वतीविनशनादारभ्य प्लाक्षप्रस्रवणपर्यन्तं सत्रदेशविधानादेव प्राप्तेरर्थप्राप्तायाः अनुवादमात्रत्वात् । अतो न तावत्प्रत्येकं करणम् । सत्रवत् संहत्यापि करणे किं ऋत्विगन्तरमुपादेयं न वेति चिन्तायाम्—

दानस्याहष्टार्थत्वकल्पनाभिया ऋत्विगानमनार्थत्वावगतेः ऋत्विगन्तरोपादानम् । न चास्य सत्रत्वेनातिदेशिकस्य ऋत्विक्षु यजमानाभेदस्य प्राप्तेर्न ऋत्विगन्तरोपादानमिति वाच्यं, अस्य सत्राङ्गत्वेन सत्रत्वाभावात् । अत्र हि सारस्वते सत्रे पौर्णमास्युत्तरप्रतिपदि गोसंज्ञिक एकाहः । अमावास्योत्तरप्रतिपदि चायुस्संज्ञिकः । अन्तरा शुक्लपक्षे दर्शः । कृष्णपक्षे पौर्णमासः इत्येवं क्रमेण कल्पितः । तत्र च सोमयागस्यैव प्राधान्यम् ।

अस्तु वा तन्त्ररत्नोक्त्या कौण्डपायिनामयनवत् दर्शपूर्णमासयोरपि कामेष्टेस्त्वङ्गत्वमविवादमेव । न च तथाऽपि प्रकृतौ द्वादशाहे आर्त्विज्य एव यजमानविधेस्तस्य चाङ्गमात्रविषयत्वात् कामेष्ट्यङ्गेष्वपि तत्प्राप्त्यविरोध इति वाच्यं, प्राकृतऋत्विकर्तव्यपदार्थेषु यजमानकर्तृकत्वात् प्राप्तावपि यूपावटास्तरणबर्हिर्न्यायेनाप्राकृतकार्यापन्नायां कामेष्टौ तत्प्राप्तयनुपपत्तेः । कथं चित्तत्प्राप्तावपि वा कामेष्ट्यतिदेशेनैष्टिकेन ऋत्विगन्तरस्य विशेषविहित-

स्य प्राप्तेस्तेन तस्य बाधाच्च । यद्यपि हि अतिदिश्यमानपदार्थविषये द्वयोरप्यतिदेशयोस्सामान्यविषयत्वं, तथाऽपि ऐष्टिकातिदेशे कामेष्टेरेवोद्देश्यत्वात् तस्यैव विशेषविषयत्वम् ।

एवं सत्यपि यदि 'ये यजमानास्त ऋविजः' इत्यस्य सारस्वतसत्रे उपदेशो भवेत्तदा सौमिकवेद्या दैक्षादिषु ऐष्टिकवेदिबाधस्येवावभृथाङ्गेषु अङ्गिराहवनीयबाधस्येवौपदेशिकयजमानाभेदेनैष्टिकऋत्विगन्तरबाधो भवेत् । न त्वेतदस्ति तस्य द्वादशाहे पठितत्वेनेह सत्रातिदेशेनैव प्राप्तेः ।

न च तथाऽपि तस्य प्रधानीयत्वादैष्टिककामेष्ट्यतिदेशसङ्कोचकत्वं, तस्य स्वरूपेण प्रधानीयत्वेऽपि यजमानाभेदस्यार्त्विज्यपृष्ठभावेन प्राप्तस्याङ्गमात्रविषयत्वेन प्रधानीयत्वाभावात् । अतः कामेष्टौ ऋत्विगन्तरस्याबाध इति प्राप्ते—

प्राकृतलवनादिपदार्थानामासादनार्थबर्हिःपृष्ठभावेनैव प्राप्तेर्यूपावटास्तरणबर्हिषि न प्रापकप्रमाणं न वा तस्य व्यक्त्यन्तरवर्तिनोऽन्यत्र प्रसङ्गेनोपकारकत्वम् । प्रकृते तु यजमानाभेदस्य द्वादशाहिकऋत्विक्कर्तव्यपदार्थमात्रोद्देशेन विधानात् कामेष्ट्यङ्गभूतऋत्विक्कर्तव्यपदार्थेषु प्रापकप्रमाणाभावेऽपि कामेष्टेस्सत्रमहाप्रयोगमध्यवर्तित्वात् सत्रादौ यजमानैः कृतस्य ऋत्विक्त्वाध्यवसायस्य आसत्रसमाप्तेः कामेष्ट्युत्तरकर्तव्यसत्रपदार्थसिद्ध्यर्थमावश्यकत्वात् तेनैव कामेष्टावुपकारसिद्धेर्न पृथक्स्वसिद्ध्यर्थं वरणभरणाक्षेपः ।

प्रकृतौ हि न ऋत्विक्षु यजमानभेदस्साक्षाद्विहितः अपि तु ऋत्विक्त्वाध्यवसायसिद्ध्यर्थं वरणभरणाम्नानास्वार्थिकः । अतश्च तदध्यवसायस्य सत्रार्थमपि स्वत एव सिद्धौ पशुपुरोडाशचो-

दकेन प्रयाजादेरिव कामेष्ट्यतिदेशेनापि न वरणभरणादेस्तदर्थमतिदेशः। अत एव यत्र सौमिकवेद्युत्तरमपूर्वो दर्शविकारश्रुतस्तत्र सौमिकवेद्यैव प्रसङ्गसिद्धेर्नैष्टिकवेदिरपि। न हि तत्र सौमिकवेदिरङ्गं, तस्याः प्राकृताङ्गप्रधानमात्रार्थत्वेन विहिताया अपूर्वाङ्गे उपदेशातिदेशाभ्यामप्राप्तेः। अतस्तत्र प्रसङ्गसिद्धिरेव। कामेष्टेस्तु देशान्तरीयत्वात्प्रसङ्गसिद्ध्यनुपपत्तेरैष्टिकी वेदिरिति विशेषः। ऋत्विक्षु तु प्रसङ्गसिद्धेर्न ऋत्विगन्तरमिति सिद्धम्। न चैवं ऋत्विगन्तरबाधस्य प्रसंङ्गसिद्धतया क्षाशमिकबाधलक्षणानाक्रान्ततयाऽध्यायासङ्गतिः, अश्वादिदानस्य प्राकृतान्वाहार्यादिदक्षिणाबाधकत्वस्यापवादात् सङ्गत्युपपत्तेः।

यत्तु 'यत्किञ्चित्प्राचीनम्' इत्यादौ भागधर्मत्वपक्षे तद्भागारम्भके वैकृते अपूर्वे पदार्थे उपांशुत्वमिव यजमानाभेदस्यापि ऋत्विक्कर्तव्यप्रयोगधर्मत्वात् तत्प्रयोगारम्भके वैकृतकामेष्ट्यादिपदार्थेऽपि प्राप्त्युपपत्तिरिति सिद्धान्तोपपादनं, तत्—भागधर्मत्वपक्षेऽपि यत्र स्वातिदेशेन तद्विरुद्धधर्मप्राप्तिः यथा दीक्षणीयाङ्गादौ तद्व्यतिरिक्तापूर्वपदार्थेष्वेव तद्धर्मप्राप्तेः कामेष्टौ च स्वातिदेशेन ऋत्विगन्तरस्यैव प्राप्ततयोपेक्षितम्॥ १४॥

(१५)–द्वेष्ये चाचोदनाद्दक्षिणापनयः स्यात्॥ ४६॥

दर्शपूर्णमासयोः 'यदि पत्नीस्संयाजयन् कपालमभिजुहुयात्, वैश्वानरं द्वादशकपालं निर्वपेत् तस्यैकहायनो गौर्दक्षिणा तं स द्वेष्याय दद्यात्' इति श्रुतम्। तत्र किमिदं दक्षिणादानमदृष्टार्थं? उत ऋत्विगानत्यर्थमिति चिन्तायां—

दक्षिणाशब्दस्यानतिकरद्रव्यवाचित्वेन तद्दानस्यानत्यर्थत्वप्रतीतेर्नादृष्टार्थत्वकल्पनोचिता। न चास्याः प्रयोगमध्यवर्तीनिमि-

त्तानन्तर्यबलेन प्रयोगमध्यवर्तितया प्रधानदक्षिणयैव प्रसङ्गसिद्धेर्दक्षिणान्तरानपेक्षत्वादेव नानर्थक्यार्थता, दक्षिणाविधानान्यथानुपपत्त्या आनतिविशेषकल्पनेन तदर्थत्वोपपत्तेः ।

अस्तु वा दक्षिणाज्ञानबलादस्याः प्रयोगबहिर्भूतत्वमेव। निमित्तानन्तर्यं तु जातेष्टिवत् व्यवधानेऽपि न विरुद्धयते । न चैवमपि 'ऋत्विगाचार्यौ नातिचरितव्यौ' इति स्मरणात् ऋत्विजां द्वेष्यत्वानुपपत्तेः द्वेष्यसम्प्रदानकदानस्यानत्यर्थत्वानुपपत्तिः । ऋत्विक्त्वसम्पत्त्युत्तरं तस्य द्वेषनिषेधेऽपि पूर्वं कृतद्वेषस्यार्त्विज्ये बाधकाभावात् । सत्यपि द्वेष्यस्यार्त्विज्यनिषेधे तस्य पुरुषार्थतया निषेधमुल्लङ्घ्यापि क्रतुकरणे वैगुण्याभावाच्च । क्रत्वर्थत्वेऽपि वा निषेधस्य सामान्यविषयत्वेन दक्षिणाज्ञानबलकल्प्यद्वेष्यनियमविधिना विशेषविषयेण बाधोपपत्तेश्च । अतोऽस्य दक्षिणात्वात् कर्तव्या एवान्वाहार्यधर्माः, पाकादयस्त्वर्थलोपान्निवर्तन्ते इति पक्षे—

न तावदत्र प्राकृतदक्षिणादानानुवादेन गुणमात्रविधिस्सम्भवति, प्राकृतदानकार्यस्यानतेः प्रधानार्थान्वाहार्यैणैव निष्पन्नतया प्राकृतदानस्येहाप्राप्तत्वात् तदनुवादेनानेकगुणविधानासम्भवाच्च । अतश्चावश्यं तच्छब्दवाच्यं गुणद्वयविशिष्टं द्रव्यं द्वेष्यश्च सम्प्रदानमिति उभयविशिष्टं दानान्तरमेवात्र विधेयम् ।

तदपि च न प्राकृतकार्यार्थतया तस्य पूर्वमेव निष्पन्नत्वात्। द्वेष्यकर्तृकत्वनैयत्यस्य दर्शपूर्णमासयोः प्रमाणान्तरासिद्धतया तत्सम्प्रदानकत्वस्य नैयत्यासम्भवेनानतिविशेषस्यापि कल्पयितुमशक्यत्वाच्च । द्वेष्यसम्प्रदानकदानाज्ञानबलादेवास्यां प्रायश्चित्तेष्टौ प्रयोगबहिर्भावे द्वेष्यकर्तृविधिनिमित्तानन्तर्यबाधं प्रयाजाद्यंशेऽतिदेशं चानपेक्षितं च प्रकल्प्यानत्यर्थत्वकल्पने तु तवैव गौरवम् । न हीदं फलमुखं, एतत्कल्पनमन्तरेणानतेरवुध्यमानत्वात् अतो

वरमदृष्टार्थमेवेदं दानं प्रयोगमध्यक्रियमाणाया एव प्रायश्चित्तेष्टेरङ्गम्। दक्षिणाशब्दस्तु तच्छब्दापेक्षितार्थसमर्पकार्थवादे श्रुतो द्वेष्यानतिकरत्वमात्रेणागत्या कथञ्चिन्नेयः। अतोऽन्वाहार्यधर्माणामप्रसक्तत्वादेव निवृत्तिः। अध्यायसङ्गतेस्तु पूर्वपक्षे पाकलोपाद्रष्टव्या ॥ १५ ॥

(१६)—अस्थियज्ञोऽविप्रतिषेधादितरेषां स्याद्विप्रतिषेधादस्थ्नाम् ॥ ४७ ॥ यावदुक्तमुपयोगस्स्यात् ॥ ४८ ॥

यदि 'सत्रायं संदीक्षितानां प्रमीयेत तं दग्ध्वा कृष्णाजिनेऽस्थान्युपनह्य योऽस्य नेदिष्ठस्स्यात् तं तस्य स्थाने दीक्षयित्वा तेन सह यजेरन् ततस्संवत्सरे अस्थीनि याजयेयुः' इति श्रुतम्। तत्र योऽयमस्थियागस्संवत्सरे स किं मृताधिकारिकः उत जीवदधिकारिक इति चिन्तायां—

'एतया निषादस्थपात याजयेत्' इतिवदस्थ्नामेवाधिकारप्रतीतेस्तेषां च स्वरूपेण तदसम्भवेऽपि तदुपलक्षितस्य मृतस्यैवाधिकारः। न च तस्य कर्तृत्वासम्भवः, शुक्रान्वारम्भादावस्थ्नामेव प्रयोज्यकर्तृत्वोपपत्तेः। द्रव्यत्यागादौ च जीवद्दशायामेव सर्वैर्मरणसम्भावनया स्वेतरेषामनुमतिदानादनुमतिद्वारा कर्तृत्वोपपत्तेः। अन्यथा मृतस्थाने आनीतेन सह सत्रप्रयोगसमाप्तावप्यनुमत्यभावात्तदीयसंसृष्टद्रव्यत्यागानुपपत्तेः। अतो मृतस्यैवाधिकारः ॥

याजनं तु सत्रप्रयोगसमाप्तिकर्तृभिरेव कार्यं, ततस्संवत्सर इत्यादिना प्रयोगसमाप्तियाजनयोस्समानकर्तृकत्वप्रतीतेः। यदि

तु ततश्शब्दादानन्तर्यस्यैव प्रतीतिः न तु समानकर्तृकत्वस्यापीति विभाव्यते ततोऽस्त्वनियमः । अयं च नैमित्तिकोपि न सत्राङ्गं विभिन्नाधिकारिकत्वात् अपि तु मृतस्यैव स्वतन्त्रफलार्थः ।

अत एव षष्ठोक्तरीत्या मृते सत्रफलासम्भवेऽपि एतत्फलोत्पत्तौ बाधकाभाव इत्यवधेयमिति प्राप्ते—

न तावदस्थामेव कर्तृत्वं यागानुकूलकृत्याश्रयत्वरूपस्य तस्य तेष्वसम्भवात् । अतश्च त्वयाऽपि तत्सम्बन्धिमृतजीवलक्षणया तस्याधिकारो वाच्यः । ततश्चाश्रुता जीवदवस्थायां निमित्ताभाव एवानुमतिकल्पना फलकल्पना चेत्याद्यनेकदोषभिया वरमस्थिपदेन स्वसम्बन्धिनो जीवत एव पुरुषान् लक्षयित्वा तेषामधिकारः ।

किञ्च—जीवदवस्थायामनुमत्याऽपि किं तदनन्तरमेव स्वत्वमुत्पद्यते उत मरणोत्तरं, नाद्यः—जीवदवस्थायां त्यागानापत्तेः । नान्त्यः—अनुमतेः क्षणिकत्वेन मरणोत्तरस्वत्वोत्पादकत्वानुपपत्तेः । अत एव मरणोत्तरकालीनसत्रप्रयोगसमाप्तावपि षष्ठोक्तरीत्या मृतस्यानधिकारात्तदीयं द्रव्यं पृथक्कृत्यैव स्वीयद्रव्यैरेव जीवद्भिः प्रयोगसमाप्तिः कार्येति ध्येयम् । अतश्चानुमतिकल्पनाया अप्यनुपपत्तेर्मृतस्य कथमप्यधिकारासम्भवेनास्थिपदेन लक्षणया जीवतामेवाधिकारः । अस्थ्युपनहनकर्तृत्वादिकं च शक्यसम्बन्धः ।

अयं च क्रियमाणसत्राङ्गम् । अयं चास्थियागो न सत्ररूप एव । सत्यपि प्रत्यभिज्ञाने याजयेयुरिति णिजन्तप्रयोगबलेनैव कर्मभेदावगतेः । सत्ररूपत्वे हि तत्र यजमानाभेदस्यैव

सिद्धेः ण्यन्तप्रयोगानुपपत्तिः विधाने वाक्यभेदात्, यजतिचोदनाचोदितत्वात्। अतश्च तद्वशात् कर्मान्तरमेवेदम्। तत्र चाव्यक्तत्वसादृश्यादतिदेशेनैव ऋत्विक्प्रोक्षणण्यन्तार्थोऽनुवाद एव। एतद्विचारस्य चाग्निमाधिकरणोपोद्घातत्वादध्यायसङ्गतिः ॥ १६ ॥

(१७)—यदि तु वचनात्तेषां जपसंस्कारमर्थलुप्तं सेष्टि तदर्थत्वात् ॥ ४९ ॥

जीवदधिकारपक्षे न किञ्चिद्बाधनीयम्। मृताधिकारे तु भवति केषांचिद्बाध इति पूर्वाधिकरणप्रयोजनतयाऽध्यायसङ्गतिरुच्यते। तत्र ये कर्तृसंस्कारा ये वा फलिसंस्कारास्ते मृतस्यानुमतिद्वारा कर्तृत्वेन फलित्वेन चावश्यं भवन्त्येव। तत्रापि ये स्वयंकर्तृका मन्त्रप्रोक्षणादयस्तेषां शरीरशुद्ध्यर्थत्वेनास्थिष्वपि करणं, कर्तृत्वं परमनुमतिसत्त्वादध्वर्योरेव। ये त्वध्वर्युकर्तृकास्तदीयशरीरसंस्कारका अभ्यञ्जनादयस्ते सुतरां भवन्त्येव।

ये तु वपनादयः शरीरावयवविशेषसाध्यास्तत्संस्कारका वा तेषां केशादितदवयवाभावे लोप एव। यत्त्वत्र सूत्रादौ जपलोपकथनं तन्नारादुपकारकजपाविषयं तत्रानुमतिद्वारा प्रधान इवाध्वर्युकर्तृकत्वेऽपि मृतकर्तृकत्वोपपत्तेः। अपि तु वाक्संस्कारकजपविषयम्। एवं दीक्षणीयाया अपि दीक्षोत्पत्त्यर्थत्वात् दीक्षायाश्च यमनियमपरिग्रहानुकूलदृष्टरूपत्वात् यमनियमयोश्च मनआदिसाध्ययोस्तत्प्रणिधानार्थयोश्च तदभावे लोपाद्दीक्षणीयादेरपि लोपः ॥ १७ ॥

(१८)—क्रत्वर्थं तु क्रियेत गुणभूतत्वात् ॥५०॥

ये तु याजमानाः ऋत्वर्थाः पदार्थास्ते सर्वे अनुमतिद्वारा मृतस्यापि कर्तृत्वसम्भवाद्ध्वर्युणा कार्या एव प्रधानवत्।

यत्तु मूले—'शुक्रं यजमानोऽन्वारभते यजमानसंमितौदुम्बरी भवति' इत्यादौ यत्र यजमानस्य गुणत्वं तत्रास्थामेव शुक्रान्वारम्भादावचेतनानामपि स्थाली पचतीतिवदन्वारम्भानुकूलास्थिनिष्ठव्यापाराश्रयतया कर्तृत्वोपपत्तेरस्थिभिरेवान्वारम्भादि कार्यमित्युक्तम्।

तत्रेदं वाच्यं—प्रकृतौ हि 'शुक्रं यजमानोऽन्वारभते' इत्यादौ यजमानपदवाच्यो यागकर्ता जीवात्मैव कर्तृत्वेनोच्यते। शरीरस्य त्ववच्छेदकतामात्रं न कर्तृत्वम्। आत्मनश्च कर्तृत्वं अन्वारम्भानुकूलकृत्याश्रयत्वेनैव। न च मृतस्य तादृशकर्तृत्वसम्भवः। जीवच्छरीरावच्छेदेनैवात्मनि कृत्युत्पत्तिनियमात्। अन्वारम्भानुकूलास्थिनिष्ठव्यापाराश्रयत्वरूपस्य कर्तृत्वस्य प्रकृतावनुक्तेः। अतो वरं प्रधान इव अनुमतिद्वारकं मृतात्मकर्तृत्वमुपपाद्याध्वर्युणैव ते कार्याः॥ १८॥

(१९)—काम्यानि तु न विद्यन्ते कामाज्ञानाद्यथेतरस्यानुच्यमानानि॥ ५१॥

जीवदधिकारपक्षे ये सत्रप्रकरण एव साङ्गसत्रोपरमपर्यन्तव्रताद्याश्रिता गुणकामा विहितास्ते अङ्गत्वादस्थियागस्य तत्करणवेलायामपि कार्याः। मृताधिकारपक्षे तु तस्यानङ्गत्वात् कथञ्चिदङ्गत्वेऽपि वा मृतनिष्ठकामनाया अज्ञानान्नैव गुणकामाः कार्याः।

यत्तु मूले प्राकृतगुणकामानां 'यदि कामयेत वर्षुकः पर्जन्यस्स्यात्' इत्यादीनां मृताधिकारपक्षे अप्रवृत्तिरित्युक्तं तदष्टम एव

तेषां विकृतावप्रवृत्तेरुक्तत्वात् कृत्वाचिन्तया कथने प्रयोजनाभावादुपेक्षितम् ॥१९॥

(२०)—ईहार्थाश्चाभावात्सूक्तवाकवत् ॥ ५२ ॥ स्युर्वाऽर्थवादत्वात् ॥ ५३ ॥ नेज्छाभिधानात्तदभावादितरस्मिन् ॥ ५४ ॥

सूक्तवाकगतानामायुरादिफलानामकाम्यमानानामपि क्रतुप्रयुक्तप्रहरणजन्यत्वेनानुषङ्गिकत्वात् इतरथा प्रकृतावेव कामनाभावे तत्पदपाठानापत्तेः मृताधिकारपक्षेऽपि आनुषङ्गिकतया जननोपपत्तेः प्रयोक्तव्यान्येव तत्पदानीति प्राप्ते—

असत्यपि तत्कामनाया अनुष्ठापकत्वे स्वरूपेण तस्या आशास्त इत्यनेन प्रकाशिततया अपेक्षितत्वात् मृतस्य चैतत्प्रस्तरप्रहरणजन्यफलेच्छाया बाधितत्वान्न तत्पदपाठः । न चैवं प्रकृतावपि यस्य न तत्फलेच्छा तत्र तत्पदपाठानापत्तिः, अवश्यकर्तव्ये प्रहरणे आनुषङ्गिकफलेच्छाभावस्य चेतनेऽसम्भवात् । अतश्च मृतस्येच्छाया असम्भवादिच्छाविषयीभूतफलाभावेन न तत्पदपाठः ॥

(२१)—स्युर्वा होतृकामाः ॥ ५५ ॥ न तदाशीष्ट्वात् ॥ ५६ ॥

'यं कामयेत पापीयान् स्यादिति नीचैस्तरां तस्य याज्यया वषट्कुर्यात् । यंकामयेत वसीयान् स्यादिति उच्चैस्तस्य याज्यया वषट्कुर्यात् ' इत्यादिवषट्कारश्रितानां गुणकामानां होतृकामनयैवानुष्ठानाद्यजमाननिष्ठकामनाभावेऽपि तन्निष्ठफलोत्पत्त्यर्थं गुणे प्रवृत्त्युपपत्तेः मृताधिकारपक्षेऽपि तेषां करणम् । न च विकृतौ गुणकामानामप्रवृत्तिः. वषट्कारस्य ' एष वै सप्तदशः प्रजापतिः यज्ञे

अन्वायत्तः' इत्यनारभ्याधीतवचने साक्षाद्यज्ञोद्देशेन विधानात् पर्णतान्यायाभावेन प्रकृतिविकृतिसाधारण्येनोपदिष्टतया विकृतावपीदृशगुणकामप्राप्त्युपपत्तेरिति प्राप्ते—

न तावदिदं फलं ऋत्विग्गतं 'यां वै कांचन ऋत्विज आशिषमाशासते यजमानस्यैव तदाशासते' इत्यनेन यजमाननिष्ठत्वस्यैव तृतीये स्थापितत्वात्। न चैतदाशासनमात्रेण यजमाने फलोत्पत्तिः, प्रकृतौ ऋत्विगिच्छायां सत्यामपि स्वेच्छायामसत्यां यजमानेन गुणविषये होतुरप्रवर्तनात् यजमानेच्छाया एवैतादृशगुणविषयेऽनुष्ठापकत्वावगतेर्न मृताधिकारपक्षे तेषां करणम्। तदेतानि सर्वाण्यधिकरणानि मृतस्य वाऽधिकारो जीवतां वेत्येतदधिकरणप्रयोजनकथनार्थानि ॥ २१ ॥

(२२)—सर्वस्वारस्य दिष्टगतौ समापनं न विद्यते कर्मणो जीवसंयोगात् ॥ ५७ ॥ स्याद्वोभयोः प्रत्यक्षशिष्टत्वात् ॥ ५८ ॥

अस्ति सर्वस्वारो नाम यज्ञः 'मरणकामो ह्येतेन यजेत यः कामयेत अनामयस्स्वर्गं लोकमियाम्' इति वाक्येन स्वर्गार्थतया विहितः। अत्र हि न मरणं फलं तस्यानिष्टत्वात्। अनेकोद्देशो वाक्यभेदाच्च। अतो मरणकाम इत्यस्याङ्गीकृतमरण इत्यर्थः। 'आर्भवे प्रस्तूयमाने अग्निं प्रविशति' इत्यनेन चोपायविधानात् मरणमत्राङ्गतया विधीयते। अतश्च मरणोत्तरकालं स क्रतुस्समापनीयो न वेति चिन्तायां, मृतस्यास्थियज्ञवत् कर्तृत्वासम्भवात् मरणान्तस्यैव स्वर्गसाधनत्वात् न समापनीय इति प्राप्ते—

आर्भवे प्रस्तूयमाने 'औदुम्बरीं सदशेन वाससा परिवेष्ट्य ब्राह्मणाः परिसमापयत मे यज्ञमिति सम्प्रेष्यान्नि प्रविशति' इति वचनेन समापनप्रैषविधानात्तस्य च दृष्टार्थत्वलाभाय लैङ्गिकसमाप्तिविधिकल्पकत्वावगतेस्तद्बलेन च मृतस्यापि ऋत्विक्प्रयोजकत्वोपपत्तेस्समापनीय एव क्रतुः।

यत्तु कैश्चित् प्रैषस्यैवास्य 'स्वाध्यायोऽध्येतव्यः' इतिवत् समापनविधायकत्वमित्युक्तं, तत् ब्राह्मणा इति सम्बोधनेन विधिशक्तिप्रतिबन्धात् कर्मकाले प्रयोज्यत्वानुपपत्तेश्चोपेक्षितम्। वस्तुतस्तु—समापनप्रैषाभावेऽपि सकलैः क्रत्वर्थतयैव वरणभरणयोः प्रकृताविवानुष्ठानात् तद्बलेन च जीवदवस्थायामिव मृतावस्थायामपि ऋत्विजां कर्तृत्वोपपत्तिः। अत एव ज्योतिष्टोमादिकर्मान्तरेष्वप्यनयैव दिशाऽन्तरामरणे ऋत्विग्भिस्समापनम्। एवं च प्रैषस्य विधिकल्पकत्वाभावेऽपि समापनस्मारकत्वेनैव दृष्टार्थतेति ध्येयम्॥ २२॥

(२३)—गते कर्मास्थियज्ञवत्॥ ५९॥

मृते यजमाने अस्थियज्ञे मृताधिकारपक्षे यथा बाध्याबाध्यविवेकस्स सर्वोऽप्यत्र द्रष्टव्यः॥ २४॥

(२४)—जीवत्यवचनमायुराशिषस्तदर्थत्वात्॥ ६०॥ वचनं वा भागित्वात् प्राग्यथोक्तात्॥ ६१॥

अथ तत्रैव प्रायणीयादौ जीवद्दशायां सूक्तवाके आयुराशासनादेः करणं न वेति चिन्तायां—आयुषो मरणाभ्युपगमेनाप्रार्थनीयत्वाल्लोप इति प्राप्ते—

आर्भवकालपर्यन्तं जन्मान्तरे वा आयुष आशासनसम्भवादलोपः। एवमन्येषामपि फलानां 'उत्तरां देवयज्याम्' इत्यादीनामिह जन्मनि जन्मान्तरे वा आशासनसम्भवादलोपः ॥ २४ ॥

(२५)–क्रिया स्याद्धर्ममात्राणाम् ॥ ६२ ॥

सत्रे वरणभरणयोर्दृष्टार्थत्वाल्लोपेऽभिहिते यत्प्रकृतावदृष्टार्थं ऋतुयाज्यावरणं आत्रेयाय दानं च तत्सत्रे कार्यमेवेति प्रत्युदाहरणमात्रम्। सोमे हि श्रुते पुन ऋतुयाज्यावरणमदृष्टार्थमेव। एवमात्रेयाय हिरण्यं ददातीत्यपि। न ह्यत्र प्राप्तदक्षिणादानानुवादेनोभयविधिस्सम्भवति वाक्यभेदापत्तेः। अतो दानान्तरमेवावश्यं विधेयम्।

तदपि च 'न वैश्वामित्रो होता' इत्यादिविशेषविहितातिरिक्तऋत्विक्षु आत्रेयत्वविधिकल्पनया तदानत्यर्थं उक्तविधिकल्पननिरपेक्षदक्षिणादानेनैव निराकाङ्क्षायामानतौ विधिकल्पनसापेक्षदानस्य जनकत्वेनान्वयायोगात्। न च पक्षप्राप्तात्रेयऋत्विगानत्यर्थमेव तद्विध्युपपत्तेर्नात्रेयविधिकल्पनं ममापीति वाच्यं, 'हिरण्यमन्तर्धाय जुहोति' इत्यादावुपयुक्तहिरण्यप्रतिपत्त्यर्थत्वेनापि दानस्य दृष्टार्थत्वोपपत्तौ तादृशऋत्विगानत्यर्थत्व एव प्रमाणाभावात्। अतो विनिगमनाविरहाददृष्टार्थमेवेदं दानम्। अत एव नात्राग्नेयीन्यायेन दैववशसम्पन्नऋत्विगात्रेयस्यैव ग्रहणं, आत्रेयत्वस्यापूर्वसाधनतावच्छेदकत्वेनाकल्पितेस्तन्न्यायाभावात्॥

(२६)–गुणलोपे च मुख्यस्य ॥ ६३ ॥

यत्र प्रकृतौ गुणविशिष्टं कर्म स्वतन्त्रविधिना प्रयोगविधिना वा विहितं तत्र विकृतौ विशेषणीभूतगुणलोपे विशिष्टलोपात् विशेष्यस्यापि कर्मणो लोप इति प्राप्ते—

उपकारपृष्ठभावेन पदार्थानामतिदेशात्सत्यपि विशेषणबाधे विशेष्यबाधस्यान्याय्यत्वात् सत्यपि च प्रकृतौ विकृतौ वा विशिष्टविधौ विशिष्टस्यानतिरिक्तत्वात् विशेषणबाधेऽपि प्रकृतौ विकृतौ वा न विशेष्यलोपः। अत एव प्रकृतौ 'निर्वापानुवादेनाग्निहोत्रहवण्यां हवींषि निर्वपति' इति वचनेन विहिताया अप्यग्निहोत्रहवण्याः पवमानेष्टिष्वाग्निहोत्राभावेनासम्भवेऽपि न निर्वापलोपः।

नन्वग्निहोत्रहवणीशब्दस्य णत्वश्रवणबलेन संज्ञात्वावगतेरग्निहोत्रस्य ततः पूर्वमकरणेऽपि कथमग्निहोत्रहवणीत्वस्य तासु बाधः। अस्तु वा अवयवार्थस्यापि प्रतीयमानत्वात् योगरूढत्वम्। तथाऽपि अग्निहोत्रं होष्यतेऽनयेति व्युत्पत्त्या पवमानेष्टिष्वप्यवयवार्थसम्भवाद्विशेषणबाधानुपपत्तिः। न च भाविव्युत्पत्तेः पुरोडाशकपालादावगत्याऽङ्गीकारेऽपि भाविनि प्रमाणाभावेनान्यत्र तदङ्गीकारे प्रमाणाभावात् भूतव्युत्पत्तेरेव प्रकृतावाश्रिताया इहासम्भवाद्विशेषणबाधोपपत्तिः। न हि पवमानेष्टिषु भूतव्युत्पत्तिस्सम्भवति, तूष्णीं होमस्य कर्मान्तरत्वेनाग्निहोत्रत्वाभावादिति वाच्यं, प्रकृतावपि खण्डपौर्णमास्यामाधाने तदहःक्रियमाणसेष्टिसान्वारम्भणीयसद्यस्कालपौर्णमासप्रयोगे भूतव्युत्पत्तेरसंभवेन भाविव्युत्पत्तेरेवाश्रयणीयत्वात्; पूर्वपर्वण्यपि मानवसूत्रे अग्निहोत्रहोमस्य पौर्णमासोत्तरं विहितत्वाच्च।

वस्तुतस्तु—प्रोक्षणीशब्दवत् ल्युडन्तत्वान्नैवात्र कस्यापि कालस्य बोधः। अपि तु स्वरूपयोग्यतया होमसाधनत्वमात्रबोधः, तच्चाकृतेऽपि होमेऽस्त्येवेति चेत्—पुरोडाशकपालन्यायेन निर्वापवाक्येऽग्निहोत्रसम्बन्धित्वश्रवणात् तत्प्रयुक्तत्वावगतेर्न निर्वापोऽग्निहोत्रहवण्याः प्रयोजकः। अतस्तद्वदेव येनकेनाचाग्नि-

वापः। अत एव 'अग्निहोत्रहवण्या अग्निहोत्रं जुहोति' इत्यत्र 'परिधीन् परिदधाति' इतिवत् पुरोडाशकपालन्यायाभावात् अग्निहोत्रस्य प्रयोजकत्वावगतेराद्याग्निहोत्रप्रयोगे भूतव्युत्पत्तेरसम्भवेऽपि नाग्निहोत्रहवणीबाधः।

याज्ञिकास्तु आधानाङ्गसम्भाराहरणकाल एव पात्राणामुत्पादनाल्लाघवेन भाव्यग्निहोत्रहवण्यैव पवमानेष्टिषु निर्वापादिकं कुर्वन्ति ॥ २६ ॥

(२७)—मुष्टिलोपात्तु सङ्ख्यालोपस्तद्गुणत्वात्स्यात् ॥ ६४ ॥ न निर्वापशेषत्वात् ॥ ६५ ॥ सङ्ख्या तु चोदनां प्रति सामान्यात्तद्विकारस्संयोगाच्च परं मुष्टेः ॥ ६६ ॥ न चोदनाभिसम्बन्धात्प्रकृतौ संस्कारयोगात ॥ ६७ ॥

वाजपेये 'बार्हस्पत्यो नैवारश्चरुः सप्तदशशरावो भवति' इति श्रुतम्। तत्रातिदेशप्राप्ते निर्वापे किं मुष्टिचतुस्सङ्ख्ययोरुभयोरप्यातिदेशप्राप्तयोर्बाधः उत चतुस्सङ्ख्याया एव उत मुष्टीनामेवेति चिन्तायां 'चतुरो मुष्टीन्निर्वपति' इति प्रकृतौ विहितस्य मुष्टिसङ्ख्योभयविशिष्टनिर्वापस्याङ्गभूतयोर्मुष्टिसङ्ख्ययोरातिदेशिकयोरौपदेशिकाभ्यां सप्तदशसङ्ख्याशरावपरिमाणाभ्यां बाधः प्रत्याम्नानेन। निर्वापाङ्गभूतयोरपि मुष्टिसङ्ख्ययोर्निर्वापस्वरूपे वैयर्थ्येन फलतो रौंगार्थतया समानविषयत्वोपपत्तेः। तत्रापि सङ्ख्यया सङ्ख्यायाः परिमाणेन परिमाणस्येति प्रथमः पक्षः।

द्वितीयस्तु मुष्टिसङ्ख्ययोर्यागोपकारकत्वेऽपि निर्वापसम्बन्धित्वेनैव श्रवणान्न यागाङ्गभूताभ्यां सङ्ख्यापरिमाणाभ्यां निर्वापाङ्गभूतयोस्सङ्ख्यापरिमाणयोर्बाधो युक्तः । सप्तदशशरावपरिमितद्रव्यस्य तु चतुर्मुष्टिपरिमितनिर्वापेण संस्कारायोगादर्थात् विरोधावश्यंभावे अन्यतरबाधेनैवोपपत्तौ उभयबाधे प्रमाणाभावः । न च चतुर्मुष्टिपरिमितवैधानिर्वापस्यावृत्त्याऽपि विरोधपरिहारोपपत्तौ नावश्यमन्यतरस्यापि बाधो युक्त इति वाच्यं, चतुस्सङ्ख्यायाः प्रकृतौ यागीययावद्द्रव्यसंस्कारकनिर्वापवृत्तिमुष्टिपरिच्छेदकत्वेनावृत्त्या तदनुपपत्तावन्यतरबाधस्यावश्यकत्वात् । तत्रापि मुष्टीनां प्राधान्यात् तदङ्गभूतसङ्ख्याया एव बाधः ।

तथा हि चतुश्शब्दो विशेष्यनिघ्नो न स्वतस्सङ्ख्यायाः क्रियान्वयं गमयति विशेष्यं च मुष्टिपदोपात्तं परिमाणमेव, न तु तद्विशिष्टं व्रीहिद्रव्यं तथैवानुभवात् विशेष्ये बाधाच्च । अत एव मुष्टिशब्दस्य परिमाणविशिष्टद्रव्यपरत्वेन विशेष्यनिघ्नत्वेऽपि सङ्ख्याया एकदेशान्वयोऽपि नानुपपन्नः । अतश्च सङ्ख्यायाः परिमाणं प्रत्यङ्गत्वात् तस्या एव बाधः ।

वस्तुतस्तु—द्वितीयान्तमुष्टिपदसमानाधिकरणसङ्ख्यापदं परिमाणविशिष्टव्रीहिराशिमेव विशेष्यतया सङ्कलातीति यद्यपि न परिमाणस्य सङ्ख्यां प्रति प्राधान्यं, तथाऽपि सङ्ख्यायाः परिमाणपरिच्छेदद्वारैव तत्परिमितद्रव्यपरिच्छेदकत्वात् परिमाणस्यान्तरङ्गतया बाधानुपपत्तिः, अतो मुष्टिगतां चतुस्सङ्ख्यां बाधित्वा सप्तदशशरावपरिमितव्रीहीणां यावन्मुष्टि निर्वापः कार्य इति ॥

सिद्धान्तस्तु—नात्र द्वितीयान्तार्थद्वयस्योद्देश्यतया निर्वापं प्रति कर्मत्वं उद्देश्यानेकत्वनिमित्तकवाक्यभेदापत्तेः । अपि तु

द्वितीयया सक्तुन्यायेन करणत्वं लक्षयित्वा प्रातिपदिकशक्यार्थद्वयस्यैव सङ्ख्यापरिमाणरूपस्य निर्वापभावनान्वायित्वम् । अत एव नानयोररुणान्यायेन विशेष्यनिघ्नत्वमपि । गुणद्वयविशिष्टनिर्वापभावनाविधानाच्च वाक्यभेदः । गुणद्वयस्य वैशिष्ट्यमारुण्यवत् द्रव्यपरिच्छेदद्वारेणेति न कश्चिद्विरोधः ।

एवं च सङ्ख्याऽपरिमाणयोः परस्परमङ्गाङ्गिभावे अन्तरङ्गबहिरङ्गभावे वा प्रमाणाभावादन्यतरबाधे नियामकापेक्षायां प्राथम्यात् सङ्ख्याया अबाधः मुष्टिपरिमाणस्य तु बाधः । न च प्राथम्यजघन्यत्वादेः प्रकृतौ विद्यमानत्वेऽपि विकृतावतिदेशेन युगपत्सर्वाङ्गप्राप्तेस्तस्यामभावात् कथं तस्य नियामकत्वमिति वाच्यं, विकृतावभावेऽपि प्रकृतिदृष्टस्यैव तस्य नियामकान्तराभावे नियामकत्वोपपत्तेः । अतस्सङ्ख्यानुरोधात् सपादचतुश्शरावपरिमितं पात्रं कृत्वा तेन चतुर्वारं निर्वापः ।

अयं चार्थो भाष्यकारादिभिः कर्कादिभिश्च सर्वैर्निर्णीतः । मम तु प्रतिभाति--साक्षात्साधनीभूताग्निहोत्रहवण्याः मुष्टीनां च बाधापेक्षया सङ्ख्याया एवैकस्या मुष्टिपरिच्छेदद्वारा निर्वापसाधनीभूताया बाध उचितः ।

वस्तुतस्तु--चतुस्सङ्ख्याकमुष्टिसाधनकवैधनिर्वापावृत्त्या उभयसम्पादनसम्भवे न तस्या अपि बाधः । यागीययावद्द्रव्यसंस्कारकनिर्वापवृत्तिमुष्टिपरिच्छेदकत्वस्य प्रकृतावार्थिकत्वेनेह बाधेऽप्यदोषत्वात् । अत एव जैमिनिसूत्रे कात्यायनादिसूत्रेषु चौपदेशिकाभ्यां सङ्ख्यापरिमाणाभ्यामातिदेशिकतदुभयबाधं पूर्वपक्षयित्वा तदभाव एव सिद्धान्ततः । तत्त्वं तु ईश्वरो वेत्ति ॥

(२८)—औत्पत्तिके तु द्रव्यतो विकारस्स्याद-कार्यत्वात् ॥ ६८ ॥

'द्यावापृथिव्यां धेनुमालभेत, वायव्य वत्सं, ऐन्द्रमृषभम्' इत्यादावातिदेशिकस्याजत्वस्य न बाधः, धेन्वादिशब्दानां धानादिगुणमात्रशक्तत्वेनाजत्वे सत्यप्युपपत्तेः। न च गव्येव धेन्वादिशब्दानां प्रयोगात् गोवृत्तिगुणेष्वेव शक्तिः। तन्मात्रवृत्तिगुणेषु वैजात्ये प्रमाणाभावेन गोरपि शक्यतावच्छेदककोटिप्रवेशे गौरवात्। 'अवी द्वे धेनू ददाति, अजमृषभम्' इत्यादावन्यत्रापि धेन्वादिशब्दप्रयोगाच्च। गव्येव प्रचुरप्रयोगात्तु गुणविशिष्टायां तस्यां निरूढलक्षणा पार्थादिशब्दवत्। 'पङ्कजशब्दस्य तु पद्मभिन्ने प्रयोगाभावात् पद्मे योगरूढिस्वीकारेऽप्यदोषः। अतश्च लक्षणायां प्रमाणाभावादतिदेशानुरोधेन निरुक्तगुणविशिष्टमजद्रव्यमेव ग्राह्यमिति प्राप्ते—

पदान्तरसमभिव्याहाराभावे धेनुपदमात्रश्रवणे सर्वत्र गोवृत्तिधानादिगुणस्यैव प्रतीतेर्धेन्वादिशब्दानां शोणादिशब्दवत् गोमात्रवृत्तिविजातीयधानादिगुण एव शक्तिः। वैजात्यं चाश्वरूपमात्रवृत्तिरक्तत्वव्याप्यजातिशोणत्ववत् गोमात्रवृत्तिधानादिनिष्ठमनुभवसिद्धम्। अस्तु वोक्तयुक्त्या गुणविशिष्टगव्येव शक्तिः। अजादिपदसमभिव्याहारे तु धेन्वादिपदस्य लक्षणा। अतश्च गोरुपादिष्टगुणाक्षिप्तत्वादुपादिष्टत्वादेव वाऽजस्य बाधः ॥ २८ ॥

(२९)—नैमित्तिके तु कार्यत्वात्प्रकृतेस्स्यात्तदापत्तेः ॥ ६९ ॥

यत्र तु 'वायव्यं श्वेतमालभेत' इत्यादौ श्वेतादिशब्दानामजादिसाधारणगुणवाचित्वं तत्र नाजत्वस्य बाध इति प्रत्युदाहरणमेतत् ॥ २९ ॥

(३०)—विप्रतिषेधे तद्वचनात्प्राकृतगुणलोपस्स्यात्तेन च कर्मसंयोगात् ॥ ७० ॥

साद्यस्के—'खलेवाली यूपो भवति' इति श्रुतम्। तत्रातिदेशप्राप्तं खादिरत्वं निवर्तते न वा। तथा चित्रेष्टौ 'दधि मधु घृतं पयो धाना उदकं तण्डुलास्तत्संसृष्टं प्राजापत्यम्' इत्यत्र तण्डुले व्रीहियवनियमो निवर्तते न वेति चिन्तायां—

आद्योदाहरणे तावत् न यूपकार्ये खलेवाली यथावस्थिता विधीयते यूपपदे कार्यलक्षणापत्तेः। किन्तु यूपोद्देशेन खलेवालीत्वं खले वारणक्रियारूपं संस्कारकतया विधीयते। न चाद्दष्टार्थत्वापत्तेर्लक्षणाङ्गीकारेऽप्यदोषः, निषादस्थपत्यधिकरणन्यायेन तस्याः दोषत्वात्। अतश्च प्रकृतिवत्खादिरमेव यूपं सम्पाद्य तस्य प्रयोगमध्य एव खलेवालीत्वं सम्पादनीयम्।

अस्तु वा खलेवाल्या एव यूपकार्योद्देशेन विधिः, तथाऽपि स्थानापत्त्या इतरधर्मवत् खादिरत्वस्यापि लाभात् यैव वस्तुतः पूर्वं खादिरी खलेवाली सैव ग्राह्येति। एवं तण्डुलेष्वपि चोदकबलेन व्रीह्यादिनियम इति प्राप्ते—

न तावद्यूपोद्देशेन खलेवालीत्वविधिः, तदा हि उद्देश्यसमर्पकं यदि तावत् खलेवालीपदमेव तदा एकप्रसरताभङ्गः। यदि तु यूपपदं तदा सुबन्तयोः परस्परमभेदान्वयाभावात् खलेवालीत्वेन यूपं भावयेत् इत्येवंविधशाब्दबोधनिर्वाहार्थं खलेवालीपदे खलेवालीत्वस्य विशेष्यत्वप्रतिपत्त्यर्थं लक्षणापत्तेः। न च

'दण्डी प्रैषानन्वाह' इतिवत्तदनापत्तिः, तत्र शाब्दबोधे दण्डविशिष्टपुरुषस्यैव कर्तृत्वेनान्वयेऽपि प्राप्ताप्राप्तविवेकेन दण्ड एव विधिफलोपपत्तेः। प्रकृते तु यूपकर्मकभावनायां खलेवाल्यास्तत्त्वेनान्वयानुपपत्तेरवश्यं खलेवालीत्वस्यैव भावनायामन्वयो वाच्यः। तस्य च न विशेषणप्राधान्यं विना सिद्धिरिति लक्षणावश्यंभावः॥

तत्र च मुख्ये खलेवालीपदे लक्षणापेक्षया जघन्ये यूपपद एव पशुनियोजनरूपतत्कार्यलक्षणामङ्गीकृत्य तदुद्देशेन खलेवालीविधिर्युक्तः। न च तथाऽपि स्थानापत्त्या खादिरत्वादिप्राप्तिः, प्रकृतौ हि 'यूपे पशुं नियुञ्जीत' इत्येतद्वाक्यमात्रपर्यालोचने पशुनियोजनसमर्थयत्किञ्चिल्लौकिकद्रव्यमात्रग्रहणप्रसक्तौ 'यूपं छिनत्ति' इति वचनात् प्रयोगमध्ये छेदनप्राप्तौ तत्प्रकृतिद्रव्यापेक्षायां 'खादिरो यूपो भवति' इत्यनेन तन्नियमविधिः, अतश्च खादिरत्वस्य पशुनियोजनसाधनीभूतद्रव्यच्छेदनाक्षिप्तप्रकृतिद्रव्यद्वारैव विधानात् खलेवाल्यां च लौकिकखलेवारणक्रियाप्रयुक्तकाष्ठस्यैव यूपकार्ये विधानात् छेदनलोपेन द्वारलोपात् खादिरत्वनियमस्य लोपः।

एवं चित्रेष्टौ तण्डुलेषु व्रीहिनियमस्यापि। तत्रापि हि प्रकृतौ पुरोडाशमात्रविधिपर्यालोचने लौकिकस्यैव अनोवासोन्यायेन पुरोडाशस्य ग्रहणप्रसक्तौ 'पिण्डं करोति पुरोडाशं श्रपयति' इत्यनेन प्रयोगमध्ये पिण्डकरणपुरोडाशश्रपणादिप्राप्तौ प्रकृतिद्रव्यापेक्षायां व्रीह्यादिवाक्येन तन्नियमविधानात् व्रीह्यादीनामाग्नेयाद्यपूर्वसाधनयागप्रदेयघटकपाकप्रयोजकश्रपणविध्याक्षिप्तोपादानकतण्डुलव्यापारकत्वस्यैव कौस्तुभे व्यवस्थापितत्वात्।

प्रकृते च तण्डुलानां पाकाभावेनोक्तविधव्यापाराभावान्न प्रकृतिद्रव्योपादानं, न वा व्रीह्यादिनियमः, न वा तेषु प्रोक्षणादिधर्मप्राप्तिः। निर्वापस्तु लौकिक एवार्थसिद्धस्तण्डुलानाम्। प्रदेयधर्मास्तु पर्याग्निकरणादयः केचिदर्थलोपाभावे कर्तव्याः। अतस्सिद्धं चित्रेष्टौ तण्डुला व्रीहियवान्यतराभिन्नप्रकृतिका अपि ग्राह्या इति ॥

(३१)–परेषां प्रतिषेधस्स्यात् ॥ ७१ ॥ प्रतिषेधाच्च ॥ ७२ ॥

यथासिद्धखलेवाल्या एवोपादानाच्छेदननिवृत्तावपि तक्षणादीनामनिवृत्तिं मन्वानं प्रत्युत्तरम्—प्रयोजनाभावान्न तक्षणादीनि। तेषां हि यदि तावत् श्लक्ष्णीभावादि दृष्टं प्रयोजनं ततस्तस्य खलेवारणक्रियाप्रयुक्तस्यैव सत्वेन प्रसङ्गसिद्ध्युपपत्तेः न पार्थक्येन तक्षणाद्यनुष्ठापकता।

यदि तु दीक्षाकालकर्तव्यपदार्थानामदृष्टरूपयूपत्वोत्पादकत्वस्य स्थापितत्वात् प्रकृते च खलेवारणक्रियाप्रयुक्तकाष्ठविधानेन छेदनादिकतिपयधर्मबाधस्यावश्यकत्वात् सामग्र्यभावेन यूपत्वानुत्पत्तेरपूर्व एव खलेवाल्यां पशुनियोजनं तदा सुतरां तक्षणादीनां दीक्षाकालकर्तव्यानां पदार्थानामभावः। अत एव नाष्टाश्रीकरणमपि। निखननोच्छ्रयणयोस्तु अदीक्षाकालीनयोर्यूपस्वरूपार्थत्वाभावेऽपि यत्र क्षेत्रदेशे खलेवाली तत्रैव साद्यस्कविधानात् प्रसङ्गसिद्धकार्यत्वादेवाभावः ॥ ३१ ॥

(३२)–अर्थाभावे संस्कारत्वं स्यात् ॥ ७३ ॥

यानि तु पर्यूहणपरिबृंहणपरिषेचनादीनि दृष्टार्थानि, यानि च प्रोक्षणाञ्जनादीन्यदृष्टार्थानि तेषां दीक्षाकालकर्तव्यत्वाभावेन यू-

पोत्पत्त्यर्थत्वाभावात् यूपदार्ढ्यार्थत्वेन चार्थलोपस्याप्यभावात् पश्वपूर्वसाधनीभूतपशुनियोजनप्रयुक्ततया खलेवाल्यां करणमिष्टमेव। एवं परिधावपि प्रोक्षणादि बोध्यम् ॥ ३२ ॥

(३३)-अर्थेन च विपर्यासे तादर्थ्यात् तत्त्वमेव स्यात् ॥ ७४ ॥

'पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थम्' इत्यादिना विहिते धानाद्रव्यके यागे धानावस्थायां भर्जनोत्तरमवघातः कर्तव्यो न वेति भाष्यकारेण विचारितः। तस्यायमभिप्रायः—चोदकेन पाकात्पूर्वमेव यवावस्थायामवघातविधानात् भर्जनोत्तरं तदप्राप्तेस्तदुत्तरमवघातकरणे च धानात्वव्याघातापत्तेर्न भर्जनोत्तरमवघातः कार्य इति प्राप्ते—

लोके पूर्वं किञ्चिदवहतानां यवानां भर्जनोत्तरं पुनरवघाते कृते एव. धानात्वप्रसिद्धेः प्रयोजनानुरोधेन प्राकृतक्रमं बाधित्वाऽपि 'गुणलोपे च मुख्यस्य' इति न्यायेन भर्जनोत्तरमपि प्राकृतस्सधर्मकोऽवघातः कर्तव्य एव। न च धानात्वव्याघातः, दृढतरमुसलप्रहाराकरणेन तदनापत्तेः। प्रकृतौ हि हविस्सम्पादकवैतुष्यार्थमवघातो यथा हविस्सम्पद्यते तथा कार्यः। अत एव तदनुरोधेन भर्जनात्पूर्वमपि यत्किञ्चिद्वैतुष्यसम्पत्त्यर्थमवघातस्सधर्मकः कार्य एव अन्यथा लोकप्रसिद्धधानात्वानिष्पत्तेः। अत एवावृत्तिरपि तदनुरोधेन न दुष्यति। तत्र पूर्वोऽवघातः पाकार्थः उत्तरस्तु धानात्वसिद्ध्यर्थ इति न कश्चिद्विरोधः।

एवंविधं भाष्याभिप्रायमजानतः पार्थसारथेस्तद्दूषणाय प्रयास उपेक्षणीय एव। वार्तिककारस्य तु न द्विवारमवहतानामेव धानात्वं, पूर्वमेव सम्यग्वैतुषीकृतानां यवानां भर्जने कृते

धानात्वाव्याहतेः। अतो यथाप्रकृत्येवावघातस्य भर्जनात्पूर्वमेवानुष्ठानोपपत्तेर्नात्र धाना उदाहरणं अपि तु मन्थः।

स च दुग्धमिश्रास्सक्तवः। प्रकृते च अभिवान्या मृतवत्सा गौः; तस्या दुग्धं विवक्षितम्। तत्र भर्जितयवतण्डुलानां पिष्ट एव सक्तुत्वप्रसिद्धेर्भर्जनोत्तरमेव पेषणं प्राकृतक्रमबाधेऽपि हविस्सम्पत्त्यर्थं पेषणस्य गुणलोपाधिकरणन्यायेनैव भर्जनोत्तरं करणोपपत्तेः। न च क्रमान्यत्वे पदार्थानामन्यत्वं, व्युत्क्रमेऽपि तादृशप्रत्यभिज्ञाया अबाधात्। न च प्रकृतौ पेषणस्य पाकार्थत्वं, येनेह भर्जनोत्तरं पाकाभावात् पेषणाभावश्शङ्क्येत। सत्यपि पुरोडाशपाकं प्रति तस्योपकारकत्वे पाकपेषणयोर्द्वयोरपि द्वितीयया द्रव्यसंस्कारार्थत्वात्। अतश्च यथैव प्रकृतौ हविस्सम्पत्त्यर्थमेव पेषणं पाकात्पूर्वमनुष्ठितं तथैवेह सक्तुसम्पत्त्यर्थं पाकोत्तरमनुष्ठानेऽपि न कश्चिद्विरोधः।

अत एव प्रकृतौ पेषणपाकयोः पाठोऽप्यनुवाद एव। अतो वस्तुतो नात्र क्रमबाधोऽपि। तेनात्र भर्जनोत्तरमेव पेषणम्। अवघातस्तु भाष्यवार्तिककारमतयोः पूर्वोक्तरीत्या मन्थेऽपि भर्जनपूर्वोत्तरं पूर्वमेव वा कार्यः। धानापिष्टस्यैव सक्तुत्वात्। परिवापे तु न निर्वापप्रोक्षणादि, नावघातः न वा पेषणमित्युक्तमेव ॥ ३३ ॥

इति श्री खण्डदेवविरचितायां भाट्टदीपिकायां
दशमस्याध्यायस्य द्वितीयः पादः.

अथ दशमस्याध्यायस्य तृतीयःपादः.

(१)—विकृतौ शब्दवत्त्वात्प्रधानस्य गुणानामधिकोत्पत्तिस्सन्निधानात् ॥ १ ॥ प्रकृतिवत्तस्य चानुपरोधः ॥ २ ॥ चोदनाप्रभुत्वाच्च ॥ ३ ॥ प्रधानं त्वङ्गसंयुक्तं तथाभूतमपूर्वं स्यात्तस्य विध्युपलक्षणात् सर्वो हि पूर्ववान् विधिरविशेषात्प्रवर्तितः ॥ ४ ॥ न चाङ्गविधिरनङ्गे स्यात् ॥ ५ ॥ कर्मणश्चैकशब्द्यात्सन्निधाने विधेराख्यासंयोगो गुणेन तद्विकारस्याच्छब्दस्य विधिगामित्वाद्गुणस्य चोपदेश्यत्वात् ॥ ६ ॥ अकार्यत्वाच्च नाम्नः ॥ ७ ॥ तुल्या च प्रभुता गुणे ॥ ८ ॥ सर्वमेवं प्रधानमिति चेत् ॥ ९ ॥ तथा भूतेन संयोगाद्यथार्थविधयस्स्युः ॥ १० ॥ विधित्वं चाविशिष्टमेवं प्राकृतानां वैकृतैः कर्मणा योगात्तस्मात्सर्वं प्रधानार्थम् ॥ ११ ॥ समत्वाच्च तदुत्पत्तेस्संस्कारैराधिकारस्स्यात् ॥

यस्यां विकृतौ प्राकृताङ्गसम्बन्धेनापूर्वाङ्गश्रवणं यथा 'एकादश प्रयाजान् यजति' इत्यादौ तत्रातिदेशेनाङ्गानां सामान्यमुखेनैव प्राप्ते विशिष्य प्रयाजत्वादिनैवोपस्थित्यभावात् तदवच्छिन्नोद्देशेनैकादशत्वविधानाशक्तेरेकादशत्वविशिष्टप्रयाजविध्यवश्यंभावात्, तदा च गृहमेधीयाज्यभागन्यायेन क्लृप्तोपकारप्रयाजपुनर्विधानात् तेनैव पश्वादिभावनाया निराकाङ्क्षत्वादतिदेशाकल्पनेनापूर्वत्वावगतेर्न प्रयाजाद्यतिरिक्ताङ्गकरणमिति प्राप्ते—

'मद्गृहे धान्यसमृद्धिरस्ति, शष्कुलीं भुङ्क्ष्व' इत्यादौ सामान्यधर्मपुरस्कारेण प्राप्तस्य पदार्थस्य सम्बन्धविधयोपस्थितविशेषधर्मपुरस्कारेणापि प्राप्त्युपपत्तेः प्रयाजपदेन प्रयाजत्वरूपेणानुवादे बाधकाभावात् तृतीयविधिप्रकारलिप्सया प्रयाजोद्देशेनैकादशत्वसङ्ख्यामात्रविधानेनातिदेशोपजीवितया तद्बाधकत्वानुपपत्तेर्नेतराङ्गनिवृत्तिः ॥ १ ॥

(२)—हिरण्यगर्भः पूर्वस्य मन्त्रलिङ्गात् ॥ १३ ॥ प्रकृत्यनुपरोधाच्च ॥ १४ ॥ उत्तरस्य वा मन्त्रार्थित्वात् ॥ १५ ॥ विध्यतिदेशात्तच्छ्रुतौ विकारस्स्याद्गुणानामुपदेश्यत्वात् ॥ १६ ॥ पूर्वस्मिंश्चामन्त्रत्वदर्शनात् ॥ १७ ॥

वायव्ये पशौ 'हिरण्यगर्भस्समवर्तताग्रे इत्याद्वारमाघारयति' इति श्रुतम् । प्रकृतितश्च द्वावाघारौ पूर्वोऽमन्त्रकः प्राजापत्यः उत्तर ऐन्द्रो मन्त्रवान् । तदिह वैशेषिको मन्त्रो न तावदाघारद्वयेऽपि विधीयते वक्ष्यमाणविधया तदसम्भवात् । एक-

त्रापि पूर्वाधार एव विधीयते तस्य प्रजापतिदेवताकत्वेन मन्त्रस्य सामर्थ्यात् । हिरण्यगर्भादिशब्दा हि प्रजापतौ रूढाः योगरूढा वा । 'स्रष्टा प्रजापतिर्धाता, हिरण्यगर्भो लोकेशः' इत्याद्यनुशासनात् । 'कस्मै देवाय हविषा विधेम' इतिमन्त्रशेषे श्रवणात् कशब्दस्य प्रजापतौ श्रुतत्वाच्च । अत एव 'प्रजापतिर्वै हिरण्यगर्भः प्रजापतेरनुरूपत्वाय' इति वाक्यशेषोऽपि सङ्गच्छते । हिरण्यगर्भादिशब्दनां इन्द्रपरत्वे तदनुपपत्तेः । न च पूर्वाधारे प्रकृतौ मन्त्रस्याभावेन मन्त्रनियमादृष्टस्याभावात् तत्र वैशेषिकमन्त्रविधाने तन्नियमादृष्टकल्पनापत्तिः, उत्तराधारे तु तस्य कृप्तत्वात् तत्र मन्त्रविधौ लाघवमिति वाच्यम् । लाघवस्य प्रमाणानुग्राहकत्वेन तद्विरोधे लिङ्गान्यथानयनस्यानुचितत्वात् । उत्तराधारे हि हिरण्यगर्भस्यैव देवतात्वकल्पनायां तवापि गौरवाच्च ।

किञ्च पूर्वाधारेऽपि सर्वत्र मन्त्राभावे ब्राह्मणस्यैव स्मारकतया नियमस्य पञ्चमे उक्तत्वात् ब्राह्मणनियमादृष्टसत्वेन तज्ज्ञानकत्वेनैवैतन्मन्त्रविधानोपपत्तेर्लाघवाविशेषः । न च तदृष्टं प्रति मन्त्रव्यभिचारः, तत्तत्कृत्वपूर्वसाधनीभूतादृष्टं प्रति तस्य तस्य कारणत्वेनाव्यभिचारात् । इतरथा भवन्मतेऽपि तस्यानिवारणाच्चेति प्राप्ते—

यत्र मन्त्रसामान्यं कृप्तं तत्र मन्त्रविशेषविधाने लाघवादुत्तराधार एव निवेशः । वस्तुतस्तु—प्रकृतौ 'पूर्वाधारे न स्वाहेति करोति मन्त्रं च नाह' इति वचनमेव मन्त्रानाम्नानादेव मन्त्राभावप्रसक्तौ नित्यानुवादरूपमपि स्ववैयर्थ्यपरिहारार्थं हिरण्यमन्त्रस्य तत्रानिवेशतात्पर्यग्राहकम् । अत उत्तरा-

धारे प्राकृतमन्त्रस्य बाधः, न तु पूर्वाधारे प्राकृतब्राह्मणस्य । अतश्चायं नित्यानुवादः पूर्वाधारे हिरण्यगर्भमन्त्रस्य परिसङ्ख्याफलकस्सन्नुत्तराधार एव तस्य विधिं गमयति । सोऽपि च मान्त्रवर्णिकहिरण्यगर्भदेवताकल्पनयेति तद्बलेनोत्तराधारे प्राकृतेन्द्रदेवताबाधोपि नानुपपन्नः ।

अस्तु वा—"यो हि खलु वाव प्रजापतेः स उ वावेन्द्रः" इति वाक्यशेषानुसारात् हिरण्यगर्भादिपदे रूढिं परित्यज्य योगमात्रेणेन्द्रपरता 'कस्मै' इत्यत्रापि एकाराध्याहारेण एकस्मै अनन्यसाधारणायेत्यर्थाङ्गीकारः । इतरथा कशब्दस्य प्रजापतिपरत्वे सर्वनामत्वानुपपत्तेः । सर्वथा उत्तराधारे मन्त्रः ॥ २ ॥

(३)—संस्कारे तु क्रियान्तरं तस्य विधायकत्वात् ॥ १८ ॥ प्रकृत्यनुपरोधाच्च ॥ १९ ॥ विधेस्तु तत्र भावात्सन्देहे यस्य शब्दस्तदर्थस्स्यात् ॥ २० ॥ संस्कारसामर्थ्याद्गुणसंयोगाच्च ॥ २१ ॥ विप्रतिषेधात्क्रियाप्रकरणे स्यात् ॥ २२ ॥

सौमिकचातुर्मास्येषु 'उत्करे वाजिनमासादयति । परिधौ पशुं नियुञ्जीत' इति श्रुतम् । तत्र प्राकृतवाजिनासादनपशुनियोजनोद्देशेन उत्करपरिधिविधाने वाक्यभेदापत्तेरासादननियोजनमात्रोद्देशेन तद्विधाने च स्रुगासादने शाकटीयवृषभनियोजने चातिप्रसङ्गापत्तेरासादनान्तरनियोजनान्तरे एवात्रोत्करपरिधिविशिष्टे विधीयेते वाक्यभेदापादकस्यैव गुणस्य भेदकत्वात् ।

तयोरपि च न प्राकृतकार्यापन्नतया विधानं, उत्करस्य देशविशेषवृत्तिशङ्कुरूपस्य तीक्ष्णाग्रत्वेन तत्र चिरकालीनप्राकृतकार्यापन्नासादने वाजिनावस्कन्दनापत्तेः, परिधेश्च तनुतरस्यानिखातस्य च पश्वनपक्रमणसाधनीभूतनियोजनसाधनत्वासम्भवात्। अतश्चादृष्टार्थमासादनं नियोजनं च क्षणमात्रं कृत्वा पुनः प्राकृतं वेद्यां यूपे चासादनं नियोजनं च कार्यमिति न ताभ्यां तयोर्बाध इति प्राप्ते—

यद्यप्यासादनान्तरं नियोजनान्तरं विधेयं तथाऽपि प्राकाशदानवत् प्राकृतकार्यार्थतयैव तद्विधिः, लाघवात् । न चाशक्यता, पृथग्रतासम्पादनेनापि तदुपपत्तेः परिधेः परिमाणविशेषानाम्नानेन स्थौल्यकरणेऽपि बाधकाभावाच्च । अतो युक्तः प्राकृतासादननियोजनयोर्बाधः ।

वस्तुतस्तु—प्राकृतासादनादेरेवातिदेशतः पूर्वं प्रवृत्तेर्नानेन गुणविशिष्टस्य वाजिनाद्युद्देशेन विधानान्न कर्मान्तरत्वमपि । तत्त्वं तु वाजिनोदाहरणे आसादनोद्देशेनोत्करविधानेऽपि, 'वाजिनं निषिच्य अभिघार्य' इति वाजिनस्यैव पूर्वं प्रक्रान्ततया विषयत्वोपपत्तेरतिप्रसङ्गाभावान्न विशिष्टविधिस्वीकारोऽपि । अत उत्करपरिधिभ्यामेव वेदियूपयोर्बाधः ॥ ३ ॥

(४)—षड्भिर्दीक्षयतीति तासां मन्त्रविकारश्रुतिसंयोगात् ॥२३॥ अभ्यासात्तु प्रधानस्य॥ आवृत्त्या मन्त्रकर्म स्यात् ॥२५॥ अपि वा प्रतिमन्त्रत्वात् प्राकृतानामहानिः स्या-

दन्यायश्च कृतेऽभ्यासः ॥२६॥ पौर्वापर्यं चाभ्यासे नोपपद्यते नैमित्तिकत्वात् ॥२७ तत्पृथक्त्वं च दर्शयति ॥२८॥ न चाविशेषाद्व्यपदेशास्स्यात् ॥२९॥

सोमे 'आज्यस्थाल्यौ स्रुवेणोपघातं दीक्षाहुतीर्जुहोति' इति श्रुतम् । अत्र च बहुवचनात् सङ्घचया कर्मभेदः । मन्त्रषट्कस्नानाच्चोत्तरान्यायेन कर्मषट्कावगतेः न कपिञ्जलाधिकरणन्यायः । दीक्षाहुतिसमाख्यया चैषां दीक्षाङ्गत्वम् । चयनप्रकरणे च मन्त्रषट्कान्तरं पठित्वा 'पङ्क्तिर्दीक्षयति' इत्यनेन तेषां दीक्षार्थत्वं समाम्नातम् । स्वाहाकारान्तानां च तेषां साक्षात् दीक्षार्थत्वायोगात्तदङ्गभूतहोमद्वारैव तदित्यविवादम् । तदनन्तरं च 'द्वादश जुहोति' इत्यनेन पूर्वोपस्थितदीक्षाहुत्यनुवादेन द्वादशत्वविधानात्साग्निके ज्योतिष्टोमप्रयोगे प्रयाजैकादशत्ववत् तदभ्यासः । तत्र किं द्वादशस्वप्यभ्यासेषु अग्निप्रकरणाम्नाता विशेषविहिता एव मन्त्रा द्विरावृत्त्या सामान्यविहितमन्त्रषट्कबाधेन स्युः उतानावृत्ता एव समुच्चयेनेति चिन्तायां—

विशेषेण सामान्यबाधेऽवगते प्रतिप्रधानं गुणावृत्तिन्यायेन मन्त्रावृत्तिस्वीकारेऽपि न कश्चिद्दोष इति प्राप्ते—

दीक्षार्थत्वमात्रं तेषां श्रुतं न तु होमार्थत्वं तत्तु स्वाहाकारलिङ्गात्कल्पनीयं, तस्य चानावृत्त्याऽबाधेनाप्युपपत्तौ बाधावृत्त्योस्स्वीकारे प्रमाणाभावात् सामान्यविहितमन्त्रषट्केन समुच्चय एव । यदि हि दीक्षाहुत्यनुवादेनैते मन्त्रा विहितास्स्युः तदा 'अप्स्ववभृथेन चरन्ति' इत्यत्र प्राकृतसर्वहोमेष्वग्निबाधवत् स्याद-

पि सामान्यविहितमन्त्रबाधः, न त्वेतदस्ति दीक्षार्थत्वस्यैव श्रुतत्वात् ॥ ४ ॥

(५)–अग्न्याधेयस्य नैमित्तिके गुणविकारे दक्षिणादानमधिकं स्याद्वाक्यसंयोगात् ॥ ३० ॥ शिष्टत्वाच्चेतरासां यथास्थानम् ॥ ३१ ॥ विकारस्त्वप्रकरणे हि काम्यानि ॥ ३२ ॥ शङ्कते च निवृत्तेरुभयत्वं हि श्रूयते ॥ ३३ ॥

'भाग्ययशश्श्रीकामानां पुनरादधीत' इति श्रुतम्। तथा 'योग्नीनाधाय भाग्यजानिं पुत्रजानिं वा जीयेत स पुनरादधीत' इति च। अत्र प्रकरणात्पुनश्शब्द्योगाच्च नाधानान्तरं अपि तु तस्यैव पुनः प्रयोगः काम्यो नैमित्तिकश्च। तत्र काम्यवाक्ये द्वन्द्वोपात्तत्वात् 'अध्वर्युयजमानौ वाचं यच्छतः' इतिवन्नानेकोद्देश्यता। नैमित्तिकवाक्ये तु जानिशब्दो हानिपरः। जीयेत प्राप्नुयात् इत्यर्थः। अनुषङ्गेण वाक्यद्वयाङ्गीकारेऽपि न दोषः। पुनःप्रयोगावान्तरप्रकरणे च 'पुनरुत्स्यूतं वासो दक्षिणा पुनरुत्सृष्टोऽनड्वान्' इति श्रुतम्। अत्रापि प्राप्तदक्षिणानुवादेनानेकविधानानुपपत्तेर्वाक्यभेद इष्ट एव। पुनरुत्स्यूतं पाटितं सीवनेन कृतसन्धानं, पुनरुत्सृष्टः अग्नस्सन् कृतसन्धानः। अनयोश्च न्यायतो विकल्पे प्राप्ते वचनादिना समुच्चय इति ध्येयम् ॥

वस्तुतस्तु—अतिदेशप्राप्तेः पूर्वमेवानेकविशिष्टैकदक्षिणाविधानान्न कश्चिद्दोषः। आधाने च 'एका देया षट् देयाः' इत्यादिना दक्षिणान्तरमाम्नातम्। तदिह काम्यनैमित्तिकप्रयोगवि-

शेषपुरस्कारेण विहितया दक्षिणया सामान्यविहिताया एकादिदक्षिणाया बाधः। न च 'दशभिः क्रीणाति' इतिवत् 'उभयीर्ददाति अग्न्याधेयिकी. पुनराधेयिकीश्च' इति वचनेन समुच्चयविधानादबाधः, अस्य पुनरुत्स्यूतादिवाक्यशेषतया तत्स्तावकत्वेन समुच्चयविधायकत्वे वाक्यभेदात् ॥

न च 'उपरि हि देवेभ्यो धारयति' इतिवत्सिद्धवन्निर्देशान्यथानुपपत्त्यैव विध्यन्तरकल्पना। कथञ्चिदपि प्राप्तिस्तत्त्वे 'यज्ञोपवीती हि देवेभ्यो दोहयति' इतिवत्कल्पकत्वानुपपत्तेः। अस्ति हि आद्ये अग्न्याधेयप्रयोगे तासां नैमित्तिकादौ चान्यासां दानेनोभयोः प्रयोगभेदेन समुच्चयप्राप्तिः अतस्तदादायैव स्तुत्युपपत्तेर्विध्यन्तराकल्पनात् बाध एव युक्तः। 'दशभिः क्रीणाति' इत्यादौ तु नैवमिति विशेषः। अत एव 'यद्वैकृतीर्ददाति उभयीरपि तेन दक्षिणाः प्रत्ता भवन्ति' इति लिङ्गमप्युपपद्यते ॥ ५ ॥

(६)–वासो वत्सं च सामान्यात् ॥ ३ ४ ॥

श्यामाकाग्रयणे 'वासो दक्षिणा' इति श्रुतम्। व्रीह्याग्रयणे च 'वत्सः प्रथमजो दक्षिणा' इति। सा प्राकृतस्यान्वाहार्यस्य निवर्तिका इत्यविवादमेव। न च क्रयाणामिवानत्यतिरेकार्थत्वकल्पनया प्राकृतवैकृत्योः समुच्चयोपपत्तिः। ऋत्विक्सम्पत्तिफलकानतिरूपकार्यस्यैकेनैव सिद्धावानत्यतिरेकस्य निष्प्रयोजनत्वात् तस्या एवानतेरुभाभ्यां करणे व्रीहियवयोर्व्रीहिप्रियङ्वोश्च समुच्चयापत्तेः। क्रयेषु तु 'दशभिः क्रीणाति' इति वचनात्समुच्चयः। अतः प्राकृतदक्षिणा वैकृतदक्षणया बाध्यत इत्युत्तरविवक्षया ाप्यते ॥ ६ ॥

(७)—अर्थापत्तेस्तद्धर्मा स्यान्निमित्ताख्याभिसंयोगात् ॥ ३५ ॥

वैकृती दक्षिणा प्राकृतदक्षिणाकार्यापन्नत्वात्प्राकृतान्वाहार्यादिदक्षिणाधर्मान् लभते इत्यपि तथैव ॥ ७ ॥

(८)—दाने पाकोऽर्थलक्षणः ॥ ३६ ॥

वत्से स्थानापत्त्यतिदेशबललभ्यः पाको निवर्तत एव प्रकृतौ तस्य दक्षिणासाधनीभूतद्रव्यनिष्पादकतया वत्से अर्थलोपात्। न च वत्सस्यापि प्रकृतिद्रव्यत्वेन विधिः । साक्षाद्दक्षिणासाधनत्वसम्भवे परम्पराङ्गीकारे प्रमाणाभावात् । अतिदेशप्राप्तपाकानुरोधेन तदाश्रयणे अन्योन्याश्रयात् । अतश्श्रुतवत्सत्वविरोधान्न पाकः ॥ ८ ॥

(९)—पाकस्य चान्नकारित्वात् ॥ ३७ ॥

वाससि विरोधाभावेऽपि पाकस्य प्रकृतौ दक्षिणाद्रव्यनिष्पादकत्वादिह तदभावेऽपि निष्पत्तेः प्रयोजनाभावाच्चरौ पेषणवदकरणम् । सिद्धमपि चेदं शिष्यहितार्थमुच्यत इति द्रष्टव्यम् ॥ ९ ॥

(१०)—तथाऽभिघारणस्य ॥ ३८ ॥

अभिघारणस्य तु प्रकृतावदृष्टार्थत्वात् वासोवत्सादावपि करणे प्राप्ते—

ओदनस्वादिमार्थत्वेन दृष्टार्थत्वसम्भवे अदृष्टार्थत्वकल्पनानुपपत्तेः स्वादिम्नश्चेह प्रयोजनाभावादकरणमेव ॥ १० ॥

(११)—द्रव्यविधिसन्निधौ सङ्ख्या तेषां गुणत्वात्स्यात् ॥ ३९ ॥ समत्वात्तु गुणानामेकस्य श्रुतिसंयोगात् ॥ ४० ॥ यस्य वा सन्निधाने स्याद्वाक्यतो ह्यभिसम्बन्धः ॥ ४१ ॥ असंयुक्ता तु तुल्यवदितराभिर्विधीयन्ते तस्मात्सर्वाधिकारस्स्यात् ॥ ४२ ॥ असंयोगाद्विधिश्रुतावेकजाताधिकारस्स्याच्छ्रुत्याकोपात्क्रतोः ॥ ४३ ॥ शब्दार्थश्चापि लोकवत् ॥ ४४ सा पशूनामुत्पत्तितो विभागात् ॥ ४५ ॥ अनियमोऽविशेषात् ॥ ४६ ॥ भागित्वाद्वा गवां स्यात् ॥ ४७ ॥ प्रत्ययात् ॥ ४८ ॥ लिङ्गदर्शनाच्च ॥ ४९ ॥

ज्योतिष्टोमे 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहयश्च यवाश्च तिलाश्च माषाश्च तस्य द्वादशशतं दक्षिणा' इति श्रुतम् । तत्र द्वादशशतसङ्ख्या कुत्र निविशत इति चिन्तायां—

'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन विहितं दक्षिणादानमनूद्य तस्य 'द्वादशशतं' इत्यनेन तच्छब्दोपस्थापितगवादिसर्वद्रव्योद्देशेन 'पयो व्रतं ब्राह्मणस्य' इतिवत् द्वादशशतसङ्ख्याविधानात् उद्देश्यसाहित्यस्य चाविवक्षितत्वात् प्रत्येकं सर्वद्रव्येषु निवेशः । गवादिद्रव्याणां च दक्षिणात्वं 'गौश्चाश्वश्च' इतिवाक्ये दक्षिणापदानुषङ्गेण बोध्यम् । यद्यपि च तन्त्ररत्नकारोक्तरीत्या

छान्दोग्यस्थं 'गौश्चाश्वश्च' इति वाक्यं 'तस्य नवतिशतं स्तोत्रीयाः' इत्येतदर्थवादान्तर्गततयाऽन्यपरत्वावसायात् न गवादीनां दक्षिणात्वविधायकं, तथाऽपि आध्वर्यवे अनन्यशेषतया समाम्नातेन ईदृशेनैव षोडशद्रव्ययुक्तवाक्येन गवादिविधानं द्रष्टव्यम्। अथवाऽस्तु दक्षिणादानानुवादेनैव सङ्ख्याविधिः तस्याश्च सर्वेष्वेव 'वारणो यज्ञावचरः' इतिवद्दक्षिणाद्रव्येषु निवेशः। तस्येति प्रकरणप्राप्तक्रतुसम्बन्धानुवादकमिति प्रथमः पक्षः॥

द्वितीयस्तु न तावत् दक्षिणोद्देशेन सङ्ख्याविधिः, तस्येत्यस्य वैयर्थ्यापत्तेः। नापि द्रव्योद्देशेन, द्रव्याणां बहुत्वेन बहुवचनापत्तेः। पक्षद्वयेऽपि 'गौश्चाश्वश्च' इत्यनेन दक्षिणापदानुषङ्गेण गवादीनां दक्षिणात्वविधाने वाक्यभेदापत्तेश्च। तद्गरमेकवाक्यत्वाभ्युपगमेन गवादिद्रव्याणि द्वादशशतसङ्ख्या चेत्युभयविशिष्टदक्षिणादानविधानम्। 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन च ऋत्विगुद्देशेन विनियोगः। ततश्च सङ्ख्यायाः पार्ष्ठिकान्वयवेलायां द्रव्यवृत्तित्वबोधे समुच्चितानामेव द्रव्याणां चशब्दयोगेन दक्षिणादाने करणत्वप्रतीतेः समुच्चितद्रव्यवृत्तित्वावसायात् सर्वसम्पाद्या सङ्ख्येति पक्षः॥

एवं सति तस्येत्येकवचनान्तपदवैयर्थ्यापत्तेः एकद्रव्यवृत्तित्वविशिष्टा सङ्ख्या गवादिसमुच्चितद्रव्याणि चेत्युभयविशिष्टदक्षिणादानविधानावगतेरेकद्रव्यवृत्तित्वमेव तस्याः, अत एव तस्येत्येकवचनं गवादिद्रव्यसमाहाराभिप्रायमित्यप्यपास्तम्। समाहारवृत्तित्वस्य न्यायादेव प्राप्तौ तस्येत्यस्य वैयर्थ्यापत्तेः। समाहारस्याशाब्दत्वेन परामर्शानुपपत्तेश्च। षष्ठ्यन्तस्य प्राचां मते सुबन्तान्वयव्युत्पत्तेश्च न सङ्ख्यान्वयविरोधः। स्वमते तु पार्ष्ठिकः

पदद्वये लक्षणया वा सङ्ख्यान्वयो बोध्यः । तदपि चैकं द्रव्यं आनन्तर्यान्माषा एवेति तृतीयः ॥

माषादिधान्यानां लोके आढकादिपरिमाणान्तरापेक्षयैव सङ्ख्याव्यवहारदर्शनात् तावताऽपि भूतित्वाभावाच्च पशुरूपद्रव्यस्यैव तच्छब्देन परामर्शावगतेस्तत्रापि मौल्याधिक्यादश्वानामेवेति चतुर्थः ॥

सिद्धान्तस्तु—'न केसरिणो ददाति' इत्यनारभ्याधीतवचनेन लौकिकाश्वदानवत् सामान्यतो विहितेऽपि यत्राश्वविषये स्वेच्छाप्रवृत्तिस्तत्रापि निषेधावगतेरस्य चानिषिद्धगवादिविषयत्वेनाप्युपपत्तेरस्य महोपकारकमुख्यगोमात्रविषयत्वमेव । अत एवैकोश्वादिर्देय एव । अजादयस्तु कपिञ्जलाधिकरणन्यायेन त्रयः । माषादीनां परिमाणं प्रमाणान्तरात् स्वेच्छया वाऽवधेयम् । सर्वथा गवामेव द्वादशशतम् । अत एव विकृतौ तद्वाधिकायां सहस्रसङ्ख्यायां 'यावदृक्सहस्रस्य गौः' इति निर्देशोपि सङ्कुच्छते । अत एव सहस्रादीनां गोवृत्तिसङ्ख्याबाधकत्वस्यैव खिद्धेरध्यायसङ्गतिरपि सङ्कुच्छते ॥ ११ ॥

(१२)—तत्र दानं विभागेन प्रदानानां पृथक्त्वात् ॥५०॥ परिक्रयाच्च लोकवत् ॥५१॥ विभागं चापि दर्शयति ॥५२॥

सेयं दक्षिणा ऋत्विग्भ्यो दीयमाना विभज्य देया न वेति चिन्तायां—

'ऋत्विग्भ्यो दक्षिणां ददाति' इति दानाङ्गत्वेन ऋत्विग्बहुत्वस्य विवक्षितत्वात् समुदितेभ्योऽविभज्यैव देया । न चाविभज्यदाने परस्वत्वानुत्पत्तेर्दानपदार्थानापत्तिः 'धेनुर्दक्षिणा' इत्या-

दावविभाज्यद्रव्यैकत्वे संसृष्टपरस्वत्वोत्पत्तिवदिहापि तथोत्पत्तिसम्भवेन तदुपपत्तेः । अतस्तद्वदेव तत्कर्तृकविभागेनैव प्रत्येकस्वत्वोत्पत्तावपि न क्षतिः । वस्तुतस्तु ऋत्विजामिहोद्देश्यत्वेन तद्गतबहुत्वसाहित्ययोरविवक्षितत्वात् 'पृषदाज्येनानूयाजान् यजति' इतिवत् प्रतिप्रधानं गुणावृत्तिन्यायेन प्रत्येकमेकैकस्य समस्तदक्षिणासम्बन्धावगतेः न विभागप्रसक्तिरिति प्राप्ते—

नात्र ऋत्विजां चतुर्थ्या भाव्यत्वरूपोद्देश्यत्वावगतिः तस्यास्सम्प्रदानकारकवाचित्वेन लक्षणायां प्रमाणाभावात् । अतो 'वेदावदे गां ददाति' इत्यत्र गोसम्प्रदानोभयविशिष्टदानस्य स्वर्गार्थत्ववत् ऋत्विग्द्रव्योभयविशिष्टदक्षिणादानस्य वैमृथादिवत्पदान्तरकल्पनया ऋत्विगानमनार्थत्वप्रतीतेः ऋत्विग्गतबहुत्वसाहित्यादेर्विवक्षितत्वान्न प्रत्येकं समस्तदक्षिणावृत्तिः । अत एवोभयत्रापि गवादिद्रव्यस्य द्विकर्मकत्वभिया सक्तुवत् करणत्वलक्षणैव ॥

किञ्च—दक्षिणाया वाक्यान्तरे जौहवौपभृदादिवदुत्पन्नाया एकस्या एव प्रयाजाद्युद्देशेनैव ऋत्विगुद्देशेन विनियोगादवयवश एव प्रत्येकान्वय इति न प्रत्येकं समस्तदक्षिणावृत्तिः । अतस्समुदितेभ्य एव ऋत्विग्भ्यस्सर्वत्र दक्षिणादानम् । अत एवान्वाहार्योऽप्यविभज्यैव दीयते । न हि 'धेनुर्दक्षिणा' इत्यादावेकधेन्वादावविभाज्यत्ववदन्वाहार्यादौ तदस्ति । येनान्वाहार्यविभागे समुदितत्वयुक्तिर्न पुरस्क्रियेत । एवं च सर्वत्र बहुवचनबलात् समुदितेभ्य एव दाने प्रसक्ते 'तुथो वो विश्ववेदा विभजतु' इति मन्त्रवर्णबलात् 'अग्नीधे ददाति, होत्रे, उद्गात्रे' इत्यादिप्रमाणबलाच्च गमकसत्त्वे विभज्यैव दानम् ॥ १२ ॥

(१३)—समं स्यादश्रुतत्वात् ॥ ५३ ॥ अपि वा कर्मवैषम्यात् ॥ ५४ ॥ अतुल्यास्स्युः परिक्रये विषमाख्या विधिश्रुतौ परिक्रयान्न कर्मण्युपपद्यते दर्शनाद्विशेषस्य तथाऽभ्युदये ॥ ५५ ॥

विभागोऽप्यसति नियामके सर्वत्र समान एव । प्रयासानुरूप्यादिनियामकसत्त्वे तदानुरूप्येण । सोमे तु सत्रस्थदीक्षाक्रमविधायके वाक्ये 'अर्धिनस्तृतीयिनः पादिनः' इति श्रुतसमाख्याबलकल्प्यविध्यन्तरेण प्रतिप्रस्थात्रादिसाधारण्येन अर्ध्यादिसमाख्याया याज्ञिकप्रसिद्धत्वाच्च महर्त्विजां यो विभागस्तदर्धं प्रतिप्रस्थात्रादीनामर्धिनां तृतीयांशस्तृतीयिनां नेष्ट्रादीनां, तच्चतुर्थांशः पादिनामुन्नेत्रादीनां इत्येवं क्रमेण बोध्यः ॥

अयं च द्वादशशतादावेव, तत्रैव विभागविधानात् । अश्वादौ तु समुदितेभ्यो दानम्, तैस्स्वेच्छया साम्येन प्रयासानुरूप्येण वा विभागः कार्यः । एवमन्वाहार्यादावपि । अधिकरणद्वयेन विभागकथनं च वक्ष्यमाणाध्वर्यवादिभागबाधोपयोगितया ॥ १३ ॥

(१४)—तस्य धेनुरिति गवां प्रकृतौ विभक्तचोदितत्वात्सामान्यात्तद्विकारस्स्याद्यथेष्टिर्गुणशब्देन ॥ ५६ ॥ सर्वस्य वा क्रतुसंयोगादेकत्वं दक्षिणार्थस्य गुणानां कार्यैकत्वादर्थे

विकृतौ श्रुतिभूतं स्यात्तस्मात् समवायाद्धि कर्मभिः ॥५७॥ चोदनानामनाश्रयाल्लिङ्गेन नियमस्स्यात् ॥५८॥

'अथैष भूर्वैश्वदेवः' इत्यनेन विहिते भूसंज्ञके एकाहे 'धेनुर्दक्षिणा' इत्याम्नातं, सा किमश्वादीनां निवर्तिका न वेति चिन्तायां—यद्यपि न मूलोक्तरीत्या गवाद्युद्देशेन प्रकृतौ दक्षिणात्वस्य 'गौश्चाश्वश्च' इत्यनेन विहितत्वादुद्देश्यविशेषणस्य साहित्यस्याविवक्षितत्वेन प्रत्येकं गवादीनां दक्षिणात्वावगतेः धेनुर्गवामेव स्थानापत्त्या निवर्तिकेति शङ्कितुं शक्यं, गवादीनामप्राप्तत्वेनोद्देश्यत्वायोगात् । अनेकोद्देशे वाक्यभेदाच्च । दक्षिणात्वस्यानतिकरत्वातिरिक्तस्य दुर्वचत्वेनानतेः फलरूपतया विधेयत्वायोगाच्च । अत एव गवादिद्रव्यविशिष्टं गोवृत्तिसङ्ख्याविशिष्टं च दानमेव दक्षिणापदवाच्यानतिजनकत्वेन विधीयते । निरुक्तदानस्य च 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्यनेन ऋत्विगुद्देशेन विनियोगः । ऋत्विग्विशिष्टस्य वा तस्यानत्यर्थत्वेन विनियोगेनैव वाऽऽनत्यर्थत्वस्य प्राप्ततया दानानुवादेन ऋत्विङ्मात्रविधिरित्यादि पूर्वमुक्तम् ॥

तथाऽपि 'गौश्चाश्वश्च' इत्यत्र गवादीनामानतिजनकत्वं प्रत्येकमेव न तु व्यासज्यवृत्त्याग्नेयादिवत्, तथाकल्पने प्रमाणाभावात् । न च चशब्देनेतरेतरयोगप्रतीतेः परस्परसहितानां करणत्वावगतिः, तस्य समुच्चयप्रतिपादकत्वेनाप्युपपत्तौ इतरेतरयोगाप्रतिपादकत्वात् । अतश्च योग्यताबलेन प्रत्येकमेव गवादीनां प्रकृतौ दक्षिणात्वं तेन दक्षिणोद्देशेन विधीय-

मानं विकृतौ धेनुत्वं विधेयसामर्थ्यानुसारात् गोद्वारेणैव निविशत इति नात्र कस्यापि बाधः । धेनुशब्दस्य गोमात्रवृत्तिगुणविशेषे गुणविशिष्टगव्येव वा शक्तित्वस्य स्थापितत्वादिति प्राप्ते—

न तावत् गौरनुवादेन धेनुत्वविधिः, एकप्रसरताभङ्गापत्तेः । नापि दक्षिणानुवादेन धेनुत्वविधिः, तथात्वे एकत्वस्याप्यप्राप्ततया विधेयत्वे वाक्यभेदापत्तेः । अतोऽवश्यं दक्षिणादानोद्देशेन धेनुत्वैकत्वविशिष्टं गोद्रव्यमेव विधेयम् । तच्च यद्यपि प्रकृतौ गवादीनां प्रत्येकं दक्षिणादानसाधनता, तथाऽपि त्रिवत्सवत् धेनुसाधनतया प्राकृतसर्वसाधनतानां बाधात् सर्वद्रव्यबाधकं भवेदेव ॥

वस्तुतस्तु—गवादिद्रव्याणां न प्रकृतौ प्रत्येकसाधनता, समुच्चयस्य 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं त्वाष्ट्रं पाल्लीवतम्' इत्यादिवदेकवाक्योपादानादेव सिद्धेश्चशब्दवैयर्थ्यापातात् । अतश्च गवादीनां चशब्दबलेनेतरेतरयोगप्रतीतेर्व्यासज्यवृत्त्येकसाधनताकत्वाद्धेनुसाधनतया प्राकृतदक्षिणादानसाधनताबाधात् सर्वद्रव्यनिवृत्तिः ।

एतेन साधनताभेदपक्षे गोवृत्तिसाधनतैवातिदेशतः पूर्वप्रवृत्त्यङ्गीकारेण धेनुत्वादिविशिष्टा विधीयते इति नान्यासां बाध इत्यपास्तं, साधनताया अप्येकत्वेन गोद्रव्येण द्रव्यान्तरनिवृत्तेरावश्यकत्वात् ॥ १४ ॥

(१५)—एकां पश्चेति धेनुवत् ॥ ५१ ॥

ज्योतिष्टोमे दक्षिणादानं प्रक्रम्य 'यदि सोममपहरेयुरेकां

गां दक्षिणां दद्यात्, अग्निदग्धे पञ्च गाः' इति श्रुते नैमित्तिकेऽपि तृतीयविधिप्रकारलिप्सया दक्षिणादानोद्देशेन एकत्वगोत्वविशिष्टकारकविधानाद्धेनुवत् गोद्रव्येणाश्वादीनां सङ्ख्यया च द्वादशशतस्य निवृत्तिरिति प्राप्ते—

'गां दद्यात्' इत्येतावतैव विवक्षितार्थलाभादाद्यवाक्ये एकामित्यस्य वैयर्थ्यापत्तेः द्वितीयवाक्ये च पञ्चत्वस्याप्राप्ततया विधेयत्वाद्गोरपि विधाने वाक्यभेदापत्तेरगत्या चतुर्थविधिप्रकारमङ्गीकृत्य गोरुद्देशेन सङ्ख्यामात्रविधेः। अवान्तरप्रकरणादेव च दक्षिणादानस्याश्रयत्वोपपत्तेर्न दोहनाद्यर्थगोषु सङ्ख्यापत्तिः। अतश्च तत्र सङ्ख्यया द्वादशशतनिवृत्तावपि नाश्वादीनां निवृत्तिः॥

(१६)–त्रिवत्सश्च॥ ६०॥ तथा च लिङ्गदर्शनम्॥ ६१॥ एके तु श्रुतिभूतत्वात्सङ्ख्यया गवां लिङ्गविशेषेण॥ ६२॥

साद्यस्के—'त्रिवत्सस्साण्डस्सोमक्रयणः' इत्यत्र कर्तव्य इति क्रियापदाध्याहारावश्यम्भावे तदुपात्तभावनायामप्राप्तस्य त्रिवत्सत्वस्य तावद्विधेयत्वमावश्यकम्। तच्च यदि तावत्क्रियोद्देशेन विधीयते तदा ऋषभादिपुंसीवाजादिषु स्त्रीष्वपि प्रसक्तौ साण्डशब्दस्यावयुत्यानुवादत्वापत्तेर्विशिष्टोद्देशे च वाक्यभेदात् साण्डानुवादेनैव त्रिवत्सत्वविधिः। तस्य च 'ऋषभेण क्रीणाति' इत्यनेन क्रयेऽपि प्राप्तत्वात् सोमक्रयण इत्यनुवादमात्रम्। न च साण्डस्याग्नीषोमीयादावपि सत्त्वेन तत्र त्रिवत्सत्वप्रसक्तेस्तस्याप्यवयुत्यानुवादत्वापत्तिः, आवश्यकेऽन्यतरस्यावयुत्यानुवादत्वे जघ-

न्यस्यैव तदौचित्यात् । अतश्च सर्वत्रैव त्रिवत्सत्वविधानान्न कस्यापि द्रव्यस्यानिवृत्तिरिति प्राप्ते—

न क्रियोद्देशेन त्रिवत्सत्वमात्रं विधीयते येन साण्डादिपदस्यावयुत्यानुवादत्वापत्तिः, अपि तु त्रिवत्सत्वपुंस्त्वैकत्वविशिष्टद्रव्यान्तरस्यैव क्रयोद्देशेन विधिः त्रिवत्सत्वादिक्रयकरणत्वानामेव वा एकप्रथमालक्षितानां द्रव्यपरिच्छेदद्वारा विधानादवाक्यभेदः । अतश्च पुंस्त्वेन स्त्रीत्वस्यापि बाधात् साण्डपदं नित्यानुवादो न त्ववयुत्यानुवादः । अत एवैकत्वस्यापि विधानात् सर्वक्रयद्रव्येषु प्रत्येकं न त्रिवत्सत्वादेर्निवेशः । न चैकत्वस्यापि प्रतिक्रियं निवेशापत्तेर्न सर्वक्रयेष्वेकद्रव्यतासिद्धिः, तथात्वे द्रव्यबहुत्वात् बहुवचनप्रसङ्गेनैकत्वस्य क्रयसमुदाय एव प्रयाजैकादशत्वन्यायेन विधेयत्वादेकद्रव्यत्वसिद्धेः ।

अत एव पुंस्त्वानुरोधेन हिरण्यादिव्यावृत्तावपि गोत्वाजत्वयोर्द्वयोर्मध्ये गोत्वस्यानेकक्रयसाधनत्वेन भूयोऽनुग्रहस्य न्याय्यत्वात् तेनैव क्रयान्तरे प्रसङ्गसिद्धावजत्वस्यापि बाधात् 'गोत्वावच्छिन्न एव पुमान् त्रिवत्स एकस्सर्वक्रयेषु द्रष्टव्यम्' इति कौस्तुभे व्यक्तम् । अतो द्रव्यान्तरनिवृत्तिः । अत एव 'स्त्री गौस्सोमक्रयणी व्यावृत्ता ह्येषां स्पर्धता' इत्यादौ निकायभूतेऽग्रिमे यागे द्रव्यान्तराभावात् स्पर्धाभावानुवादोऽपि सङ्गच्छते ॥ १६ ॥

(१७)—प्राकाशौ तथेति चेत् ॥ ६३ ॥ अपि त्ववयवार्थत्वाद्विभक्तप्रकृतित्वात् गुणे दन्ताविकारस्स्यात् ॥ ६४ ॥

अश्वमेधे 'हिरण्मयौ प्राकाशावध्वर्यवे ददाति' इति श्रुतम्। तत्र तृतीयविधिप्रकारलिप्सया दानानुवादेनैव प्राकाशविधिः। न च हिरण्मयत्वस्यापि विधाने वाक्यभेदः, प्राकाशपदार्थस्यान्यद्रव्यकत्वाभावेन हिरण्मयत्वस्य नित्यप्राप्तत्वात्। उद्देश्यस्य च दानस्याध्वर्युणा विशेष्टुमशक्यत्वात्, 'अध्वरं युनक्ति' इति व्युत्पत्त्या अध्वर्युशब्दं ऋत्विङ्मात्रे कथञ्चिद्वचाख्याय प्राकृतदक्षिणामात्रस्य निवृत्तिरिति प्राप्ते--

अध्वर्युपदवैयर्थ्यापत्तिभिया तृतीयविधिप्रकारत्यागेनाध्वर्युसम्प्रदानत्वमुद्दिश्य प्राकाशविधानम्। सम्प्रदानत्वं च न दानातिरिक्तक्रियायामिति योग्यतयैव दानस्याश्रयत्वसिद्धिः। यत्तु 'प्राकाशाध्वर्युसम्बन्धो विधीयते' इति मूलं तस्याप्ययमेवार्थः, न त्वपदार्थस्याव्युत्पन्नस्य सम्बन्धस्य विधेयत्वमित्येवं यथा श्रुतः। अतश्च यथैव गोरुद्देशेनैकत्वविधिः इन्द्रियोद्देशेन वा दधिविधिस्तथाऽत्रापि सम्प्रदानत्वमुद्दिश्य प्राकाशविधानेऽप्युद्देश्यविधेययोरुभयोर्भावनायामेवान्वयान्नाव्युत्पन्नान्वयः॥

यदि तु विभक्त्यर्थकर्मत्वद्वारैव सर्वत्र प्रातिपदिकार्थस्यैव गवादेर्भावनायामुद्देश्यत्वम्, न तु कर्मत्वसंसर्गेण विभक्त्यर्थसम्प्रदानत्वस्येति विभाव्यते, अत एव न मैत्रावरुणादीनामपि सम्प्रदानत्वेनैवोद्देश्यत्वं अपि तु तत्त्वेन, गुणत्वेऽपि पदान्तरकल्पनया तदवष्टम्भस्यैव तदित्युक्तं तदाऽस्त्वत्र चतुर्थीविधिप्रकारस्यापि त्यागेन विशिष्टदानान्तरविधिरेव। न च तथाऽपि चतुर्थ्या कर्मत्वलक्षणयाऽध्वर्योरेवोद्देश्यत्वेन प्राकाशभावनां प्रत्यन्वयोपपत्तेर्न दानान्तरविधिकल्पना युक्तेति वाच्यं, तथात्वे दानस्यैव नित्यप्राप्त्यभावेनानुवादानुपपत्तेः। अतष्षष्ठीविधिप्रकारा-

ङ्गीकारेणापि दानान्तरमेव सम्प्रदानप्राकाशोभयविशिष्टं पदान्तरकल्पनया विधेयसामर्थ्यानुरोधेन अध्वर्व्यानतिजनकत्वेन विधीयते कार्यान्तरकल्पनायां प्रमाणाभावात्। अतश्च तज्जनकीभूतप्राकृतदानाभ्यासस्यैव निवृत्त्या तदीयभागस्यैव निवृतिः।

वस्तुतस्तु—लाघवादतिदेशप्रवृत्तेः पूर्वप्रवृत्त्यङ्गीकारेणोक्तदानाभ्यास एवोक्तविशेषणद्वयविशिष्टो विधीयते पूर्ववदध्वर्व्यानतिसिद्धयर्थमिति प्राकृतदानानिवृत्त्यभावेऽपि प्राकृततद्भागनिवृत्तिः। सर्वथा न प्राकृतकृत्स्नदक्षिणानिवृत्तिरिति सिद्धम॥

(१८)—धेनुवच्चाश्वदक्षिणा स ब्रह्मण इति पुरुषापनयो यथा हिरण्यस्य ॥ ६५ ॥ एके तु कर्तृसंयोगात् स्रग्वत्तस्य लिङ्गविशेषेण ॥ ६६ ॥ अपि वा तदधिकाराद्धिरण्यवद्विकारस्स्यात् ॥ ६७ ॥

'उपहव्योऽनिरुक्तः' इत्यनेनोपहव्यसंज्ञकमेकाहं विधाय 'अश्वश्यावो दक्षिणा स ह्यनिरुक्तः ब्रह्मणे देयः' इति श्रुतम्। अत्र दक्षिणावाक्यं ब्रह्मवाक्यात्तावद्भिन्नमेव, द्वयोः प्रथमान्ततच्छब्दयोरेकदेयपदान्वयानुपपत्तेः। अनिरुक्त इत्यर्थवादेन व्यवधानाच्च। तत्र दक्षिणावाक्ये तावत्पूर्ववदेव दानान्तरं, प्राकृतदानमेव वा पूर्वप्रवृत्त्यङ्गीकारेण गुणद्वयविशिष्टं विधीयते, इतरथा वाक्यभेदापत्तेः। अत एव प्राकृतसर्वद्रव्यनिवृत्तिरपि। उत्तरवाक्ये तु तस्य ब्रह्मानत्युद्देशेन विधानमित्यविवादम्।

दक्षिणावाक्ये परं प्राकृतब्रह्मसम्प्रदानकदानाभ्यासेऽश्वविधिः उत प्राकृतदान इति चिन्तायाम्—

यद्यपि पूर्ववाक्येऽविशेषेण दक्षिणामात्रश्रवणात् प्रकृतक्रतुसम्बन्धिसर्वर्त्विगानतिसाधनदान एवाश्वविधिरिति प्रतीयत तथाऽप्युत्तरवाक्ये तस्य ब्रह्मसम्बन्धावश्यंभावात् सर्वर्त्विगानतिजननानुपपत्तेः ब्रह्मानतिसाधनप्राकृतदानाभ्यास एवाश्वविधिप्रतीतेः न कृत्स्नदाक्षिण्यस्य निवृत्तिः, अपि तु ब्रह्मभाग स्यैव। न चैवं दक्षिणाशब्दस्य ऋत्विक्सम्बन्ध्यानतिसमुदायवाचिनो ब्रह्मानतिरूपावयवे लक्षणापत्तिः, दक्षिणाशब्दस्यानतिमात्रवाचित्वेन समुदायवाचित्वे प्रमाणाभावात्। अतो विशेषरूपोत्तरवाक्येन सामान्यवाक्यस्यास्योपसंहारात् ब्रह्मभागमात्रस्यैव प्राकृतस्य निवृत्तिरिति प्राप्ते—

ब्रह्मभागमात्रनिवृत्तौ 'प्राकाशावध्वर्यवे ददाति' इतिवत् अश्वश्यावो ब्रह्मणे देयः, इत्येतावतैव सिद्धेर्वाक्यद्वयकरणेन दक्षिणापदतच्छब्दयोर्वैयर्थ्यप्रसङ्गादवश्यं प्राकृतदानस्यैव पूर्वप्रवृत्त्यङ्गीकारेणाश्वविशिष्टस्य विधिः। अत एवात्र प्राकृतदानकार्यं दानान्तरविधिपक्षो नैव सम्भवी, तत्कार्यस्य ऋत्विगन्तरानतेरश्वेनासम्भवात्। अतश्च प्रकृतक्रतुसम्बन्धिविजातीयदान एवाश्वविधानात् सर्वस्यैव प्राकृतदाक्षिण्यस्य धेनुवन्निवृत्तिः। तस्य च तद्वदेव सर्वर्त्विग्भ्यो दाने प्रसक्ते उत्तरवाक्येन ब्रह्मसम्बन्धावगमात् पुरुषान्तरेभ्योऽपनयः। एवं च तेषामुपायान्तरेणानतिस्सम्पाद्या॥

(१९)—तथा च सोमचमसः॥ ६८॥ सर्वविकारो वा क्रत्वर्थं प्रतिषेधात्पशूनाम्॥

६९ ॥ ब्रह्मदानेऽविशिष्टमिति चेत् ॥७०॥ उत्सर्गस्य क्रत्वर्थत्वात् प्रतिषिद्धस्य कर्म स्यान्न च गौणः प्रयोजनमर्थः स दक्षिणानां स्यात् ॥ ७१ ॥

ऋतपेये 'औदुम्बरस्सोमचमसो दक्षिणा स प्रियाय सगोत्राय ब्रह्मणे देयः, इति श्रुतम्। तत्रापि पूर्ववद्दक्षिणातच्छब्दयोर्वैयर्थ्यापत्तेः पूर्ववाक्येन गुणद्वयविशिष्टप्राकृतविजातीयदानविधिः, तेन च प्राकृतकृत्स्नदाक्षिण्यनिवृत्तिः। उत्तरवाक्येन च द्रव्यसम्प्रदानोभयविशिष्टस्य ब्रह्मानत्यर्थत्वस्य पदान्तरकल्पनयाऽवगमात् पुरुषान्तरादपनयः। अत्र हि ब्रह्मोद्देशेन द्रव्यविधिपक्षो नैवोद्भावितुं शक्यः, सगोत्रत्वादेरविवक्षापत्तेः। अत एव ऋतपेये सगोत्र एव ब्रह्मा।

अधिकाशङ्का तु 'यत्पशून् दद्यात् सोऽनृतं कुर्यात्' इति पशुदानपर्युदासो नासत्यां पशुप्राप्तौ घटत इति ब्रह्मभागस्यैव निवृत्तिः। अतश्चाध्वर्य्वादिभागेषु पशुप्राप्तौ तत्पर्युदासात्तेषां माषादयो देया इति। साचास्य नित्यानुवादत्वेन सोमचमसविध्येकवाक्यतयाऽर्थवादत्वाद्गमकत्वानुपपत्तेः कृत्स्नक्रतुदाक्षिण्यस्यैव निवृत्तिरिति निराकर्तव्या॥

(२०)—यदि तु ब्रह्मणस्तदूनं तद्विकारस्स्यात् ॥ ७२ ॥ सर्वं वा पुरुषापनयात्तासां क्रतुप्रधानत्वात् ॥ ७३ ॥

पूर्वाधिकरणद्वयेऽपि भिन्नवाक्यत्वमभ्युपगम्य कृत्स्नदाक्षि-

ण्यनिवृत्तिरित्युक्तम्। यदातु कृत्वाचिन्तया एकवाक्यत्वमभ्युपगम्यते तदाऽपि किं कृत्स्नदाक्षिण्यनिवृत्तिरुत ब्रह्मभागस्यैवेति चिन्तायां दक्षिणापदतच्छब्दयोरश्रवणाविशेषात् भिन्नवाक्यत्व इवैकवाक्यत्वेऽपि कृत्स्नदाक्षिण्यनिवृत्तिः पुरुषान्तरादपनयश्चेति प्राप्ते—

एकवाक्यत्वे ब्रह्मानत्युद्देशेन द्रव्यसम्प्रदानोभयविशिष्टप्राकृतदानाभ्यासस्यैव विधेयत्वावगतेः ऋत्वुद्देशेन द्रव्यविशिष्टप्राकृतविजातीयदानविध्यनुपपत्तेः दक्षिणाशब्दस्य च ब्रह्मसम्बन्धिन्यामानतावपि शक्तत्वेनानुवादोपपत्तेर्ब्रह्मभागस्यैव निवृत्तिः॥

वस्तुतस्तु—अर्थवादव्यवधानात् तच्छब्ददक्षिणापदवैयर्थ्यप्रसङ्गात् भिन्नवाक्यत्वमेव युक्तमिति तदैव कृत्स्नक्रतुदाक्षिण्यस्य निवृत्तिः॥

(२१)—यजुर्युक्ते त्वध्वर्योर्दक्षिणाविकारस्स्यात् ॥ ७४ ॥ अपि वा श्रुतिभूतत्वात् सर्वासां तस्य भागो नियन्यते ॥ ७५ ॥

वाजपेये 'सप्तदश रथास्सप्तदश दास्यः सप्तदश निष्काः सप्तदश युग्यानि सप्तदश गवां शतानि सप्तदश वयसो वयस्य श्रेति सप्त सप्तदशकानि ददाति' इति श्रुतम्। तत्रापि प्राकृतमेव दानं पूर्वप्रवृत्त्यङ्गीकारेण निरुक्तद्रव्यविशिष्टं विधीयते इति प्राकृतद्रव्यनिवृत्तिः। तत्र च 'यजुर्युक्तं रथमध्वर्यवे ददाति' इत्यादि श्रुतम्। तत्रापि 'प्राकाशावध्वर्यवे ददाति' इतिवत् यजुर्युक्तरथोऽध्वर्युभागान्तरस्य दास्यादेर्निवर्तकः वैकृतद्रव्येण प्राकृतद्रव्यस्येव वैकृतविभागेन प्राकृताध्र्यादिविभागस्यापि बाधादिति प्राप्ते—

नात्र प्राकाशवदपूर्वो यजुर्युक्तो रथो विधीयते, येन भागान्तरनिवृत्तिराशङ्क्येत, पूर्ववाक्येन प्राप्त एव तु लाघवाद्यजुर्युक्तो रथोऽनियमेन यस्मै कस्मै चिदृत्विजे प्राप्तोऽध्वर्यवे नियम्यते। प्राप्तिश्च दास्यादिद्रव्यान्तरसाहित्येनैवेति तादृश एव नियम्यते। अत एवात्र नियमद्वयं। यथैव हि अनियमेन यस्मै कस्मैचिदृत्विजे प्राप्त इति शेषिरूपाध्वर्युनियमः तथैवाध्वर्योर्यजुर्युक्तः कदाचित्प्राप्तः कदाचिन्नेति शेषरूपयजुर्युक्तनियमोऽपि। नियमद्वयस्यापि च फलत्वान्न वाक्यभेदः। शाब्दबोधेतु सम्प्रदानत्वस्योद्देश्यत्वेनान्वयायोगमते चतुर्थ्या तस्य कर्मत्वं लक्षयित्वाऽध्वर्यूद्देशेन यजुर्युक्तो विधीयते। दानं तु सन्निधिप्राप्तमाश्रय इति प्राकाशवैषम्यम्।

अत एव नियमफलकत्वेनैवोपपत्तौ समुच्चित्य प्राप्तदास्यादिभागान्तरपरिसंख्याफलकत्वमप्यवघातादिविधेर्लघुभूतनियमफलकत्वेनैवोपपत्तौ यवादिपरिसंख्याफलकत्वानङ्गीकारवन्नाङ्गीकर्तुमुचितम्। अतो नात्र भागान्तरनिवृत्तिः॥

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
दशमस्याध्यायस्य तृतीयःपादः.

अथ दशमस्याध्यायस्य चतुर्थः पादः.

---

(१)–प्रकृतिलिङ्गसंयोगात्कर्मसंस्कारं विकृतावधिकं स्यात् ॥ १ ॥ चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ॥ २ ॥

'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इति नक्षत्रेष्टिं विधायोपहोमास्समाम्नाताः—'सोत्र जुहोति अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहाऽम्बायै स्वाहा दुलायै स्वाहा नितत्नयै स्वाहाऽभ्रयन्त्यै स्वाहा मेघयन्त्यै स्वाहा वर्षयन्त्यै स्वाहा चुपुणीकायै स्वाहा' इति। प्रकृतितश्च 'नारिष्टान् जुहोति' इति नारिष्टहोमाः प्राप्ताः। ते किमुपहोमैर्बाध्यन्ते उत समुच्चीयन्त इति चिन्तायां—

नारिष्टहोमानां प्रकृतौ प्रधानोत्तरत्वात् अत्र शब्दबलेन प्रधानोत्तरभाविनामेषां समानस्थानकत्वेनैककार्यजनकत्वावगतेरुपदिष्टैरुपहोमैर्नारिष्टहोमानामतिदिष्टानां शरवद्बाध इति प्राप्ते—

शरा हि बर्हिश्शब्दलक्षिते तत्कार्ये विहिताः युक्तं यत्तत्कार्यपृष्ठभावेन प्राप्स्यमानं बर्हिर्बाधन्ते, उपहोमास्तु नारिष्टहोमकार्यापन्ना इत्यत्र न किञ्चित्प्रमाणमस्ति प्रत्यक्षादेस्तावददृष्टार्थेष्वप्रवृत्तेः। न च समानस्थानकत्वादेककार्यत्वावगतिः, उप-

होमवाक्ये अतिदेशप्रापितनारिष्टकार्यस्योपस्थापकपदाभावेनानुद्देश्यत्वात् तदुद्देशेनोपहोमविध्यप्रतीतेरतिदेशेन कार्यपृष्ठभावेन नारिष्टानामपि प्राप्त्युपपत्तौ शरन्यायवैलक्षण्येन समानस्थानकत्वमात्रस्याप्रयोजकत्वात्। न चोपहोमवाक्ये कर्मान्तरविधावेव प्रमाणाभावः नारिष्टानुवादेनैव मन्त्रविधानोपपत्तेरिति वाच्यम्, प्राप्तकर्मानुवादेनानेकमन्त्रविधौ वाक्यभेदापादकगुणस्यैव भेदकत्वात्। एकं हीदं वाक्यं इतिकरणेन तैत्तिरीयशाखाम्नातेन मन्त्राणां जुहोतावेवान्वयप्रतीतेः।

अत एव स्वाहाकारान्तानां मन्त्राणां लिङ्गादेव नारिष्टहोमेषु विनियोगप्रसक्तौ पुनर्विनियोगान्तरवैयर्थ्यप्रसङ्गादपि कर्मान्तरं, तच्चैकवाक्योपादानावगतस्वाहाकारान्तमन्त्रसमुच्चयबलेनानेकं आवृत्तं वेत्यन्यदेतत्। न च तथाऽप्युपदिष्टोपहोमैरेव विकृतेः निराकाङ्क्षत्वादतिदेशकल्पकत्वाभावेन नारिष्टाप्राप्तिः। उपहोमानामक्लृप्तोपकारकतया उपकारकाकाङ्क्षिण्या विकृत्या प्रथममातिदेशिकस्यैव ग्रहणेन नारिष्टानां प्राप्त्युपपत्तेः।

अत एवोपहोमादीनां वैकृतानामन्यतराकाङ्क्षयैव ग्रहणं अनुपस्थितफलान्तरकल्पने गौरवात्। अत एव यत्र क्लृप्तोपकारकप्राकृताङ्गे पुनश्श्रवणं विकृतिप्रकरणे, यथा गृहमेधीयाज्यभागादौ तत्रैव विकृतेर्निराकाङ्क्षत्वापादनेनातिदेशलोपः, यत्र वा सन्निपत्योपकारकाङ्गसामग्रीपौष्कल्यं; न त्वत्र द्वयमप्यस्ति। अत उपहोमैर्नारिष्टानां बाधः।

यत्त्वत्र भाष्यकारेण इयेने 'निवीता ऋत्विजः प्रचरन्ति' इत्याम्नातेन प्रयोगाङ्गभूतकर्तृसंस्कारकेण निवीतेनातिदेशप्राप्तस्य सर्वकर्मार्थत्वेन विहितस्य चोपवीतस्य बाधमाशङ्क्याहदृष्टार्थत्वात्स-

मुच्चय इति सिद्धान्तितं, तदस्यादृष्टार्थत्वे श्राद्धादावपि प्राचीनावीतेन सहोपवीतस्य समुच्चयापत्तेर्यावज्जीविकत्रिसूत्रनवतन्तुकयज्ञोपवीतधारणाश्रितप्रकारविशेषस्योपवीतत्वनिवीतत्वादेस्तत्तत्कर्माङ्गतया विहितस्य समुच्चयासम्भवादुपेक्षितम्।

यदपि 'संस्थिते षडहे मध्वाशयेत्' इति विहितमध्वशनेन प्राकृतपयोव्रतस्य तस्मिन्नहनि निवृत्तिमाशङ्क्यादृष्टार्थत्वादेव समुच्चय इत्युक्तं, तत् मध्वशनस्य देहवृत्त्यनर्हत्वेन पयोव्रतकार्यकारित्वानुपपत्तेः पूर्वपक्षोत्थानाभावात् सुत्यायां पयोव्रताभावाच्चोपेक्षितम। अस्तु वा तदपीहोदाहरणम्॥

(२)—चोदनालिङ्गसंयोगे तद्विकारः प्रतीयेत प्रकृतिसन्निधानात् ॥ २ ॥

'सोमारौद्रं चरुं निर्वपेत् कृष्णानां व्रीहीणामभिचरन्' इति विहितेष्टौ 'शरमयं बर्हिः' इति श्रुताश्शरास्तु प्राकृतबर्हिर्बाधका एव। न च पाषाणमयी भूमिरितिवत् मयटा बहुशरसंयोगमात्रविधानात् कुशबाधानापत्तिः, अदृष्टार्थत्वप्रसङ्गेन शरणामेव बर्हिःकार्योद्देशेन विधानात्। न च तथाऽपि बर्हिःकार्यस्य स्तरणस्य शरविकारतानुपपत्तेर्विकारार्थमयडनुवादानुपपत्तिः। वस्तुतस्संस्कारविशिष्टस्य द्रव्यस्य प्रकृतौ कुशप्रकृतिकस्य विकृतौ शरप्रकृतिकत्वेन 'खादिरो यूपो भवति' इतिवत् विकारार्थमयडनुवादोपपत्तेः। शाब्दबोधे तु जघन्ये बर्हिश्शब्दे स्तरणादितत्कार्यलक्षणया तदुद्देशेन शरमात्रविधानाद्युक्त एव कुशबाधः॥

न च तथाऽपि चोदकेन कार्यस्य स्वजनकपदार्थविशिष्टस्यैव पूर्वं प्राप्ततया पश्चाद्वैयर्थ्यभियाऽन्यतराकाङ्क्षयाऽन्वीय-

मानानां शराणां कुशाविरोधेनैवान्वयात् कुशाभावे प्रतिनिधित्वेनैवान्वयोपपत्तेर्न कुशबाधकत्वमिति वाच्यं, आकाङ्क्षाक्रमेण कार्योपस्थित्यनन्तरं तज्जनकपदार्थापेक्षायामेव शरविधिप्रवृत्त्यङ्गीकाराच्छरैरेव तदाकाङ्क्षाशान्तौ तत्कार्ये कुशवैशिष्ट्याकल्पनेन कुशानामतिदेशेन वस्तुतः प्राप्त्यभावात्। अत एव तार्किकीं प्राप्तिमादायैवायं प्राप्तबाधः। शराणां च विकृत्याकाङ्क्षायां अनिवृत्तायामेव ग्रहणम्।

अस्तु वा—कार्याणामेव प्रथममतिदेशेन जनकापेक्षायां पदार्थानां पृथगतिदेशः, ततश्चातिदेशप्राप्तिकार्योद्देशेन शरविधेर्न कुशांशेऽतिदेशकल्पनेति निरूपितरूपाणामेव च पदार्थानां पृथगतिदेशान्नोहबाधानुपपत्तिः। अतस्तस्य युक्तो बाध इति प्रत्युदाहरणमात्रमिदम्।

एवं वा—वाजपेये 'रथघोषेण माहेन्द्रस्य स्तोत्रमुपाकरोति' इति श्रुतम्। तत्रातिदेशप्रवृत्तेः पूर्वप्रवृत्तेनानेन रथघोषकरणकमुपाकरणमेव माहेन्द्रोद्देशेन विधीयते। प्राकृतोपाकरणस्य च स्तोत्रद्वारकत्वमेव कल्प्यमिति नान्यद्वारकत्वप्रसङ्गः। अस्तु वा पदत्रयेण लक्षणया माहेन्द्रस्तोत्रापूर्वसाधनीभूतोपाकरणानुवादेन रथघोषमात्रविधिः, प्रकृतौ चाज्ञादानाख्योपाकरणे दर्भौ 'उपावर्तध्वं' इति मन्त्रश्च साधनम्। तत्रौपदेशिकेन रथघोषेणातिदेशिकस्य बाधेऽवश्यंभाविनि किं रथो द्रव्यत्वसामान्यात् दर्भयोर्निवर्तकः, घोषश्च शब्दत्वसामान्यात् मन्त्रस्य किं वा रथस्य घोष एव द्वयोर्निवर्तक इति चिन्तायां—

पूर्वपदे लक्षणाप्रसङ्गेन तत्पुरुषसमासानुपपत्तेर्द्वन्द्व एवायम्। न च द्वन्द्वेऽपीतरेतरयोगद्वन्द्वाश्रयणे द्विवचनापत्तेरेकवचनानुरोधेन समाहारद्वन्द्वो वाच्यः। तत्र च बहुव्रीहिवत् समाहारे पदद्व

यस्य लक्षणापत्तेर्वरं तत्पुरुषाङ्गीकरणमेवेति वाच्यं, समाहारद्वन्द्वेऽपि पदद्वये लक्षणानङ्गीकारात्। न हि 'पाणिपादं वादय' इत्यादौसमाहारो नाम विषेष्यतया काश्चित्प्रतीयते, अन्यथा पाणिपादयोस्समाहारविशेषणत्वे वादनकर्मत्वानुपपत्तेः । अत एवैकविध एव द्वन्द्वः। तत्र च 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इति वचनेनैकवचनं वैकल्पिकम् । अत एवैकवचनान्तद्वन्द्वे 'समाहारद्वन्द्वः' इति संज्ञाकरणमपि परिभाषामात्रमेव। अतश्च द्वन्द्वे कस्यापि लक्षणीयत्वाभावात् तत्पुरुषापेक्षया तस्य प्रबलत्वमेव । यदि परमेकवचनस्य द्वित्वादौ लक्षणोद्भाव्येत तथाऽपि तस्या जघन्यैकवचननिष्ठत्वात्पाशाधिकरणन्यायेनादोषतया तत्पुरुषापेक्षया प्रबलत्वमेव ॥

न चोभयविधाने वाक्यभेदः, द्वन्द्वेन परस्परसहितयोरेव करणत्वविधानात् । न च तथाऽपि इतरेतरयोगद्वन्द्वे परस्परसाहित्यांशे पदद्वयलक्षणाया आवश्यकत्वात् कथं तत्स्वीकारः। तत्र तस्य धवखदिरसंसर्गविधयाऽपि बोधोपपत्तौ लक्षणायां प्रमाणाभावात्। धवस्य हि स्वसहितखदिरवृत्तित्वसंसर्गेण कर्मत्वेऽन्वयः, खदिरस्यापि तत्सहितधववृत्तित्वसम्बन्धेनेति क्व लक्षणा। अतश्च रथो दर्भनिवर्तकः घोषश्च मन्त्रनिवर्तक इति सिद्धम् । एवं च घोषो नावश्यं रथस्यैवेति प्रयोजनम्।

न च द्वन्द्वेन तयोः परस्परसाहित्यावगतेररुणैकहायनीन्यायेन परस्परनियमात् कथं न घोषो रथस्यैवेति वाच्यं, यादृशोपपदद्वयसमभिव्याहारे हि आगोपालाङ्गनं तदर्थयोर्यादृशोऽन्वयोऽवगम्यते तादृशस्यैव तदर्थयोरन्यान्वयव्युत्पत्तौ पार्ष्ठिकबोधविषयत्वम् ॥

अत एवारुणैकहायनीस्थले परिच्छेद्यपरिच्छेदकभाव एव पार्ष्टिकबोधविषयः। 'अग्नये कृत्तिकाभ्यः' इत्यादौ समुच्चय एव अत एव 'पाणिपादं पश्य' इत्यादौ सिद्धान्ते द्वन्द्वे इतरेतरयोगस्य परस्परसापेक्ष्येणैकान्वयरूपस्य शाब्दबोध एव भासमानत्वात् नैव कश्चित्पार्ष्टिकान्वयः, न वा निरूप्यनिरूपकभावस्य बोधविषयता। अतो यस्य कस्य चिद्घोष एव मन्त्रनिवर्तक इति प्राप्ते—

नायं द्वन्द्वः, स हि न तावदितरेतरयोगः तथात्वे द्विवचनापत्तेः। नापि समाहारद्वन्द्वः तस्य वाचकपदाभावेन पदद्वयस्यापि समाहारे लक्षणापत्तेः। न चेतरेतरयोगद्वन्द्व एव 'सर्वो द्वन्द्वो विभाषयैकवद्भवति' इत्यनेन वचनेनैकवचनस्य वैकल्पिकत्वमात्रविधानात् समाहारद्वन्द्वे प्रमाणाभाव इति वाच्यं, 'द्वन्द्वैकवद्भावो न पठितव्यो भवति समाहारैकत्वादेव तत्सिद्धेः;' इति महाभाष्यस्यैव ज्ञापकविधया प्रमाणत्वात्।

इदं हि भाष्यं 'सर्वो द्वन्द्वः' इत्यस्य प्रत्याख्यानार्थं सत्समाहारस्य एकवचनान्तद्वन्द्वसमासेऽभिधानं गमयति। अतश्चानुशासनबलादेव समाहारस्य समुदायापरपर्यायस्य पदद्वये लक्षणा बहुव्रीहिवत्। न च तत्र क्रियान्वयानुपपत्तेः। 'पाणिपादं पश्य' इत्यादौ तदुपपत्तेः। 'पाणिपादं वादय' इत्यादौ तु समाहार एव सामानाधिकरण्येनान्वयः समाहियमाणयोर्वा पुनर्लक्षणेति ध्येयम्। अतश्च समाहारद्वन्द्वस्यात्यन्तजघन्यत्वात् वरमेकलक्षणाङ्गीकारेण तत्पुरुषाश्रयणात् रथस्यैव घोषः।

वस्तुतस्तु—यद्यपि इतरेतरयोगद्वन्द्व एवैकवचनस्य वैकल्पिकता, न तु कापि द्वन्द्वे समाहारस्य भानमित्याश्रीयते त-

थाऽपि प्रकृते न द्वन्द्वः, एकवचनस्य द्वित्वादौ लक्षणायाः द्वन्द्वपक्षेऽपि तुल्यत्वात् । न च जघन्यवृत्तित्वात्तस्या अदोषत्वं, घोषस्य निरूपकसापेक्षत्वेनापेक्षितविधानलाभाय मुख्यलक्षणापादकतत्पुरुषस्यैवाश्रयणीयत्वात् । यदा हि श्रौतार्थत्यागोऽप्यपेक्षितविधानलाभाय प्रयाजशेषादावङ्गीकृतस्तदा किमु वक्तव्यमुभयतो लक्षणासत्त्वेऽपेक्षितविधानानुग्रह इति ॥

किञ्च इतरेतरयोगद्वन्द्वेऽपि साहित्यलक्षणायाः पदद्वयेऽप्यावश्यकत्वात् तत्पुरुष एव युक्तः । न च तस्य संसर्गविधया भानं, तथात्वेऽनुशासनवैयर्थ्यापत्तेः । इतरथा कर्मत्वादीनामपि तत्त्वेन बोधापत्तेः । अतश्च रथस्य घोषः उभयोर्दर्भमन्त्रयोर्निवर्तकः । न च शब्दत्वसामान्यात् मन्त्रस्यैव निवर्तकोऽस्त्विति वाच्यं, साद्दश्यस्य हि नियामकापेक्षायामेव नियामकता, प्रकृत चोपाकरणसम्बन्ध्याज्ञाज्ञापनरूपकार्यजनकत्वेन विहितो रथघोषो यथैवार्थाभिधानद्वारा ज्ञापकस्य मन्त्रस्य निवर्तकस्तथैव करपल्लववत् ज्ञापकस्य दर्भस्यापि निवर्तकः ज्ञापनरूपस्य कार्यस्यौपदेशिकजनकलाभे जनकान्तरातिदेशस्यैवाकल्पनात् । अत एव 'धेनुर्दक्षिणा' इत्यादावपि न साद्दश्यस्य नियामकता । तस्माद्रथस्य घोषेणोभयोर्बाधः ॥२॥

(३)–सर्वत्र तु ग्रहाभ्रानमधिकं स्यात्प्रकृतिवत् ॥ ३ ॥ अधिकैश्चैकवाक्यत्वात् ॥ ४ ॥ लिङ्गदर्शना च ॥ ५ ॥

बृहस्पतिसवे 'बार्हस्पत्यं ग्रहं गृह्णाति' इति, विषुवति 'अर्कं

गृह्णाति' इति, अश्वमेधे 'सौवर्णराजताभ्यां महिमानौ गृह्णाति' इति श्रुतम्। तदत्र वैकृतग्रहणानां दृष्टार्थत्वात् प्राकृतैन्द्रवायवादिग्रहणबाधकत्वे प्राप्ते, पशुसोमाधिकरणव्युत्पादितकौस्तुभोक्तरीत्या सत्यपि ग्रहणानां तदीयदेवतासंयोगस्य च दृष्टार्थत्वे 'ऐन्द्रवायवं गृह्णाति' इत्यादिवाक्यवैयर्थ्याभया ग्रहणानामदृष्टार्थतया आरादुपकारकत्वस्यापि स्थापितत्वात्तस्य च वैकृतेन ग्रहणेनोत्पत्तौ प्रमाणाभावादुपहोमादिवदेव समुच्चयः। न च 'अर्कं गृह्णाति' इत्यादौ संज्ञयाऽभ्यासाद्वा ग्रहणान्तरत्वेऽपि 'बार्हस्पत्यं गृह्णाति' इत्यादौ 'आग्नेया ग्रहा भवन्ति' इतिवत् प्राकृतग्रहणानुवादेन देवतामात्रविधिसम्भवात् न ग्रहणान्तरविधिसम्भवः। तद्धितोपात्तद्रव्यस्य द्वितीयया कर्मत्वावगमेन देवताविधौ ग्रहणस्य कर्मत्वानुपपत्तेः। तद्धितोपात्तद्रव्योद्देशेनैव देवताविधौ ग्रहणाश्रितत्वे प्रमाणाभावः। 'एकां गाम्' इत्यादौ दक्षिणादानं प्रकृम्यैवाम्नानात् दानाश्रितत्वलाभ इत्युक्तो विशेषः। द्रव्योद्देशेन देवताविधावेकप्रसरताभङ्गापत्तेश्च। अतोऽवश्यं द्रव्योद्देशेन देवताविशिष्टं ग्रहणमेव 'ऐन्द्रवायवं गृह्णाति' इतिवद्विधीयते॥

तच्च न प्राकृतमेव ग्रहणं तथात्वे प्राप्तग्रहणोत्पत्त्यनुवादेन देवताविधिः द्रव्योद्देशेन तद्विनियोगविधिश्चेति वाक्यभेदात्। अतोऽत्रापि गुणाद्ग्रहणान्तरमेवेति अदृष्टार्थत्वात् न तेन प्राकृतग्रहणबाधः॥

वस्तुतस्तु 'बृहस्पते जुषस्व नः' इत्यादिग्रहणे मन्त्राम्नानादेव मान्त्रवर्णिकदेवताकल्पनया प्राकृतमन्त्रतद्देवतयोर्बाधोपपत्तेरेतद्विधिवैयर्थ्यापत्तेरेव ग्रहणान्तरत्वम्। 'आग्नेया ग्रहाः' इत्यत्र तु ग्रहोद्देशेनैव देवताविधानान्न ग्रहणान्तरत्वशङ्का। अत

एव ग्रहणानां बहुत्वात् तत्र बहुवचनं प्रकृते चैकवचनं स्वारसिकतया सङ्गच्छते । अत एव तत्र प्राकृतदेवताबाध एव । प्रकृते तु ग्रहणान्तरत्वात् न कस्य चिद्बाधः । उपपादकीभूतप्रकृतयागाभ्यासस्तु प्रकृतिवच्चैव विरुध्यते ॥ ३ ॥

(४)–प्राजापत्येषु चाम्नानात् ॥ ६ ॥

वाजपेये 'सप्तदश प्राजापत्यान् पशून्' इति श्रुताः यागाः पूर्ववदेव न प्राकृतानां क्रतुपशूनां सुत्याकालीनपशुयागत्वसामान्यान्निवर्तकाः । सत्यपि सादृश्ये अदृष्टार्थत्वेनैककार्यत्वानवगतेः सादृश्यस्य कार्यकल्पनोत्तरकालीनप्रतीतिकत्वाच्च । न चात्रातिदेशप्राप्तपशुयागाश्रयेण पशूद्देशेन देवतामात्रविधानाशङ्का । सङ्ख्याया अपि विधाने वाक्यभेदापत्तेः कर्मान्तरावश्यकत्वात् । अतोत्र समुच्चय एव । अत एव वाजपेये 'यदाग्नेयं पशुमालभते तेनाग्निष्टोममवरुन्धे' इत्यादिक्रतुपशुज्ञापकं लिङ्गमप्युपपद्यते ॥ ४ ॥

(५)–आमने लिङ्गदर्शनात् ॥ ७ ॥

साङ्गहण्येष्टयां 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इत्यत्रापि मन्त्रसङ्ख्योभयविधाने वाक्यभेदापत्तेः । कर्मान्तरविधानावश्यंभावे तेषामदृष्टार्थत्वान्न त्रित्ववत्त्वमात्रेणानूयाजकार्यापन्नत्वं; यागहोमयोरत्यन्तवैसादृश्याच्च । अतश्चात्रापि नानुयाजानां बाधः । 'यत्प्रयाजानुयाजानां पुरस्तादुपरिष्टाज्जुहुयादात्मानमेव सजातानामादधीत मध्ये जुहोति' इति लिङ्गान्तरप्रदर्शनार्थं त्वधिकरणान्तरम् ॥ ५ ॥

(६)—उपगेषु शरवत्स्यात्प्रकृतिलिङ्गसंयोगात्॥ ८॥ आनर्थक्यात्त्वधिकं स्यात् ॥ ९॥

गवामयनान्तर्गते महाव्रते 'दिक्षु दुन्दुभयो नदन्ति' इति प्रकृत्य 'पत्नय उपगायन्ति' इति श्रुतम् । अत्र पत्नय इति पत्न्य इत्यर्थे छान्दसम् । प्रकृतौ चोद्गात्रादिभिर्गाने क्रियमाणे 'ऋत्विज उपगायन्ति' इत्यनेन ऋत्विक्कर्तृकमुपचयात्मकं गानं विहितम् । तदिह किं पत्न्यः प्राकृतोपगानानुवादेन विधीयमाना ऋत्विजां निवर्तिकाः उताप्राकृतोपगानसम्बन्धित्वादनिवर्तिका इति चिन्तायां—

प्रकृतावुपगानस्य विहितत्वादिहातिदेशेन प्राप्तेस्तदनुवादेन विधीयमानाः पत्न्यो ऋत्विजां निवर्तिकाः । न च गानस्योद्देश्यत्वे तद्विशेषणस्योपचयस्याविवक्षाशङ्का । उपसर्गाणां परस्परान्वयव्युत्पत्त्या विशिष्टोद्देशोपपत्तेः ॥

न च तथाऽपि 'दिक्षु दुन्दुभयो नदन्ति' इति प्रत्यक्षोपदिष्टगानस्यैवानन्तरविपरिवर्तमानस्य पत्नीकर्तृकोपचयविध्युपपत्तेस्तादृशोपचये च 'काण्डवीणादिभिरुपगायन्ति' इत्यनेन साधनविधानादप्राकृतकार्यत्वप्रतीतेर्न ऋत्विजां बाध इति वाच्यम् । गानशब्दस्य शारीर्यामेव गीतौ प्रसिद्धत्वेन दुन्दुभिनादपरामर्शकत्वानुपपत्तेः प्राप्तगानानुवादेनोपसर्गार्थस्योपचयस्य पत्नीनां च परस्परवैशिष्ट्यासम्भवेनानेकविधाने वाक्यभेदाच्च । अतश्च प्राकृतोपगानक्रियायां कर्तृत्वेन विधीयमानाः पत्न्यो ऋत्विजां निवर्तिकाः । न च प्रकृतौ शारीरगीत्यात्मकगानस्योपचयश्शारीरगीत्यात्मक एवेति कथं तत्र काण्डवीणादिविधानमिति वा-

च्यं, शारीरगीतेइशारीर एवोपचय इत्यत्र प्रमाणाभावात्। अत एव प्रकृतौ साधनान्तरविधानाभावादुपचयस्य शारीरत्वऽपीह काण्डवीणादिविधानादशारीरत्वेऽपि न क्षतिः।

अस्तु वा इहापि तस्य शारीरत्वं काण्डवीणादीनां तु साहित्यमात्रमधिकं विधीयते, तच्च योग्यताबलेन वादनद्वारैवेति काण्डवीणादिवादनं कुर्वन्तीभिर्मुखेन प्राकृतमुपगानं कार्यमिति प्राप्ते—

प्रकृतौ तावत् 'ऋत्विज उपगायन्ति' इत्यत्र नोद्गात्रादिकर्तृकसामगानानुवादेन ऋत्विक्कर्तृकोपचयमात्रं विधीयते। उपसर्गार्थे उपचये ऋत्विजां वैशिष्ट्याव्युत्पत्तेः। अत उपचयात्मकगानभावनैव ऋत्विक्कर्तृका विधीयते। उपचयश्च कस्येत्यपेक्षायां प्रकृतत्वात्सामगानस्येति सम्बध्यते। उपचयात्मके च गाने साधनान्तरस्याविधानात् तस्य च प्रकृतसामगानरूपतैवेति निश्चीयते। अतश्च ध्वनिविशेषानुकूलताल्वादिव्यापारस्य तादृशसामगानस्य सामगानरूपमेवोपगानमित्यविवादम्। न च तत्र काण्डवीणादीनां निवेशस्सम्भवति, सामगानरूपत्वानुपपत्तेः। अतोऽत्र गुणादुपगानान्तरमेव काण्डवीणादिसाधनकं विधीयते। सम्भवति च तन्त्रीगानेऽपि गानशब्दप्रयोगात् काण्डवीणादिसाधनकमप्युपगानम्॥

तदपि न प्राकृतस्य सामगानस्योपचयः, अपि तु प्रकृतोपदिष्टदुन्दुभिनादस्यैव। यद्यपि च दुन्दुभिनादो न गानात्मकः दुन्दुभेर्वाद्यरूपतया तन्नादस्य तालाभिव्यञ्जकस्य षड्जादिस्वरसमाहारात्मकगानरूपत्वाभावात्। तथाऽप्यगानरूपस्यैव तस्य काण्डवीणागानात्मक उपचयः पुष्टिसाधनत्वान्न विरुध्यते। अत

एवेदमप्राकृतमुपगानान्तरमारादुपकारकतया क्रत्वङ्गं दुन्दुभिनादाङ्गमेव वेत्यपि बोध्यम् ॥

अतश्च तादृशोपदिष्टोपगानान्तरानुवादेन विधीयमानाः पत्न्यः न प्राकृतोपगाने ऋत्विङ्निवर्तिकाः । अत एवाप्राकृतोपगानान्तरविधिः काण्डवीणावाक्य एव तस्यैव भेदकत्वात् । पत्नीवाक्ये तु तदनुवादेन पत्नीमात्रविधानमित्यवधेयम् ॥ ६ ॥

(७)—संस्कारे चान्यसंयोगात् ॥ १० ॥ प्रयाजादिवदिति चेत् ॥ ११ ॥ नार्थान्यत्वात् ॥

अञ्जनाभ्यञ्जनाख्ये सत्रे 'गौगुलवेन प्रातस्सवनेऽभ्यञ्जते' इति श्रुतम् । तत्र प्रकृतिप्राप्ताभ्यञ्जनानुवादेन कालद्रव्यरूपानेकगुणविधाने वाक्यभेदादवश्यं विधातव्येनाभ्यञ्जनान्तरेण प्राकाशाध्वर्युदानवत् प्राकृतकार्यनिष्पत्तेः प्राकृताभ्यञ्जनस्य तदीयकालद्रव्ययोश्च बाध इति प्राप्ते—

यदि तावत्प्रकृतावभ्यञ्जनस्य दीक्षाङ्गत्वादीक्षायाश्च फलाधानयोग्यतासम्पत्त्यनुकूलादृष्टजनकत्वेनाभ्यञ्जनस्याप्यदृष्टार्थत्वं तदोपहोमन्यायेनैतदभ्यञ्जनस्य तत्कार्यापन्नत्वे नैव किञ्चित्प्रमाणम् । अथ त्वस्य दीक्षारूपत्वेऽपि शरीरश्लक्ष्णीकरणद्वारा कर्तृसंस्कारकत्वंस्याभ्युपगमादेककार्यत्वमुच्येत ततो नवनीतेन प्रकृतौ श्लक्ष्णीभावकरणेऽपि गौगुलवेन रूक्षीकरणात् न तस्य तत्कार्यापन्नत्वम् ॥

अस्तु वा तत्तथाऽपि कर्तृसंस्कारस्य तदुत्तरभाविकरिष्यमाणसर्वपदार्थोपकारकत्वात् प्रातस्सवनपूर्वभाविपदार्थेषु नवनीताभ्यञ्जने बाधकाभावाद्युक्त एव समुच्चयः ॥ ७ ॥

(८)—आच्छादने त्वैकार्थ्यात्प्राकृतस्य विकारस्स्यात् ॥ १३ ॥ अधिकं वाऽन्यार्थत्वात् ॥ १४ ॥ समुच्चयं च दर्शयति ॥ १५ ॥

स्वतन्त्रे महाव्रते 'तार्प्यं यजमानः परिधत्ते दर्भमयं पत्नी' इति श्रुतम् । तत्र तार्प्यं घृताक्तकम्बळ इति माधवः । अत्रापि परिधानोद्देशेन तार्प्यादिविधौ पत्न्यादिपरिधानेऽपि तदापत्तेः यजमानोद्देशेन तद्विधौ शयनादावपि तदापत्तेरवश्यं तार्प्यादिविशिष्टं परिधानमेव यजमानाद्युद्देशेन विधीयते, तच्च प्राकृतमेवातिदेशतः प्राप्तेः पूर्वं विधीयते, कर्मान्तरमेव वेत्यन्यदेतत् । तस्य च प्राकृतकार्यापन्नत्वेनैव विधानात्प्राकृतस्याहतस्य निवृत्तिः ॥

न च प्रकृतावहतस्य कौपीनपदवाच्यभगलिङ्गाच्छादने विनियुक्तत्वात्तत्र च तार्प्यादीनामयोग्यत्वात् योग्यतयैवोपरिधारण एव तन्निवेशप्रतीतेर्भिन्नकार्यत्वेन नाहतनिवृत्तिरिति वाच्यं, कौपीनाच्छादन एव परिदधातिप्रयोगेणोपरिधारणे तार्प्यादिविधाने लक्षणापत्तेः । तार्प्यादिना कौपीनाच्छादनस्यापि कर्तुं शक्यत्वाच्च ॥

वस्तुतस्तु—अन्याच्छादनेऽपि 'परिस्तृणीत परिधत्त वेदिम्' इत्यादौ परिदधातिपदप्रयोगात् यद्यपि न कौपीनाच्छादन एव तद्विधानं, तथाऽपि प्रकृतावपि 'अहतं वासः परिधत्ते' इत्यनेन कौपीनाच्छादन इवाचारप्राप्तोपरिभागाच्छादनेऽप्यहतविधानाद्विकृतावपि तार्प्यादेरुभयत्रैव विधानादुभयत्रैवाहतनिवृत्तिरिति प्राप्ते—

कौपीनाच्छादने गृहस्थस्य कच्छाद्यसम्भवेन तार्प्यादीनामयोग्यत्वात् उपरिधारण एव तार्प्यादिविधिप्रतीतेर्न कौपीनाच्छादने अहतनिवृत्तिः । अत एव न्यायेनाचारप्राप्तोपरिधारण एव प्राकृताहतनिवृत्तिप्रसक्तौ 'वासांसि विस्रंसयति' इति प्रतिपत्तिविशेषविधायके वाक्ये वासोबहुत्वानुवादलिङ्गेन समुच्चयप्रतीतेर्न तत्राप्यहतनिवृत्तिः । एवं च यद्यपि तार्प्ये कौपीनाच्छादनेऽपि कथञ्चिद्योग्यं, तथाऽपि वासोबहुत्वानुवादबलेनैव तस्याहतेन समुच्चयः । दर्भमयस्य तु कथमप्ययोग्यत्वादुपरिधारण एव विधिप्रतीतेर्वासोबहुत्वानुरोधेन तत्रापि समुच्चयः ॥

अत एव यत्र न वासोबहुत्वानुवादः यथा—विश्वजिति 'अवभृथादुदेत्य वत्सत्वचं परिधत्ते' इति श्रुते तत्रैकस्या वत्सत्वचः कौपीनाच्छादनेऽयोग्यत्वात्तत्राहतस्यातिदेशप्राप्तस्यानिवृत्तावपि उपरिधारणे तन्निवृत्तिरिष्टैव । विशिष्य चेदं द्वादशे वक्ष्यते ॥ ८ ॥

(९)—सामस्वर्थान्तरश्रुतेरविकारः प्रतीयेत ॥ १६ ॥ अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारस्स्यात् ॥ १७ ॥

तत्रैव 'श्लोकेन पुरस्तात् सदसस्स्तुवीत' इत्यादिना प्राकृतस्तोत्रानुवादेन श्लोकाख्यसाममात्रविधेर्देशाख्यगुणान्तरस्यापि विधेयत्वानुपपत्तेर्वाक्यभेदापादकगुणादेव कर्मान्तरत्वप्रतीतेस्तस्य चोपहोमन्यायेनादृष्टार्थत्वात्समुच्चयः स्तोत्रान्तरैः । न च प्राकृतस्तोत्राण्येवातिदेशतः पूर्वप्रवृत्त्यङ्गीकारेण गुणद्वयविशिष्टा-

नि विधीयन्तां तेन प्राकृतसाम्नः प्राकृतदेशस्य च निवृत्तिरिति वाच्यं, स्तौतिधातोः पूर्वविहिताविहितसाधारणस्तोत्रमात्रवाचित्वेनातिदेशतः पूर्वं प्राकृतस्तोत्राणामेव विशिष्योपस्थापकाभावेन विधिवशात्कर्मान्तरत्वप्रतीतेः । गृहमेधीये 'आज्यभागौ यजति' इत्यत्र तु आज्यभागपदमेव पूर्वकर्मणो विशिष्योपस्थापकमिति विशेषः ॥ ९ ॥

(१०)—अर्थे त्वश्रूयमाणे शेषत्वात्प्राकृतस्य विकारस्स्यात् ॥ १७ ॥ सर्वेषामविशेषात् ॥ १८ ॥ एकस्य वा श्रुतिसामर्थ्यात्प्रकृतेश्चाविकारात् ॥ १९ ॥

तत्तद्विकृतिविशेषे 'कौत्सं भवति, काण्वं भवति, वासिष्ठस्य जनित्रे भवतः, क्रौञ्चानि भवन्ति' इत्यप्राकृतानि सामानि विहितानि । तेषां चोपहोमन्यायेन सान्निध्यात्क्रत्वङ्गत्वेऽवगते दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात्प्राकृतऋगक्षराभिव्यक्तिद्वारकत्वावगतेः प्राकृतसाम्नां निवृत्तिः । न च कौत्साद्याधारभूतयोनिऋगक्षराभिव्यक्त्यर्थत्वेनैव कण्वरथन्तरवत् कौत्सादेरङ्गत्वावगतेस्तदनुरोधेन च ऋचामप्यर्थप्रकाशनद्वारा क्रतूपकारकत्वोपपत्तेर्न प्राकृतसामबाधकत्वमिति वाच्यं, कण्वरथन्तरयोनिवत् कौत्सादियोनेः क्रतुप्रकरणे पाठाभावेन पृथगाम्नातस्य कौत्सादेः प्रकरणे विनियोगमात्रकरणेन यावत्तदाधारभूताया ऋचोपि तदन्यथाऽनुपपत्त्या क्रत्वङ्गत्वमाक्षिप्यते तावदतिदेशप्रमाणावगताङ्गभावानामेव ऋचां कौत्साद्याधारत्वमात्रकल्पनेन प्राकृतसामबाधोपपत्तेः ॥

"अत एव 'उद्वपन्ति' इत्युद्वापश्रवणानुरोधेनापि तस्यावश्यकत्वाच्च । अत एव न कौत्सादीनि सर्वेषां प्राकृतसाम्नां निवर्तकानि । यदि ह्यत्र प्राकृतस्तोत्रानुवादेन तानि विधीयेरन्, ततश्शरन्यायेनोपदिष्टसाम्नैव निराकाङ्क्षत्वात् तद्विषयेऽतिदेशस्यैवाकल्पनेन भवेत्सर्वसामबाधः । इह तु अतिदेशकल्पनोत्तरमुपहोमन्यायेन कौत्सादिविधिवैयर्थ्यान्यथानुपपत्त्याऽन्यतराकाक्षयैव कौत्सादिविधानात्तस्य च तावत्समसङ्ख्यप्राकृतसामबाधेनापि परिहारोपपत्तौ सर्वबाधे प्रमाणाभावः । अत एव यत्र प्राकृताङ्गानुवादेन वैकृतविधिः यथा 'आग्नेया ग्रहा भवन्ति आग्नेयीषु स्तुवते' इत्यादौ तत्र प्रायशस्सर्वत्रैव वैकृतविधिरिष्टः ॥ १० ॥

(११)–स्तोमविवृद्धौ त्वधिकं स्यादविवृद्धौ द्रव्यविकारस्स्यादितरस्याश्रुतित्वाच्च ॥२०॥

यत्र यथाप्रकृत्येव स्तोमः यत्र वा न्यूनः यथा 'त्रिवृदग्निष्टुदग्निष्टोमः' इत्यादौ तत्रोपदिष्टैः कौत्सादिभिः प्राकृतानां तावत्समसङ्ख्याकानां बाध इत्युक्तम् । यत्र तु प्रकृत्यपेक्षया विवृद्धस्तोमकता, यथा 'एकविंशेनातिरात्रेण प्रजाकामं याजयेत्, त्रिणवेनौजस्कामम्' इत्यादौ । तत्रोपदिष्टानां राजसामादीनां न प्राकृतसामनिवर्तकता श्रुतसङ्ख्यासम्पत्तेरुपदिष्टातिदिष्टसामविशिष्टमन्त्रैरेवोपपत्तेः । अत एवागमेन सङ्ख्यापूरणमप्युपदिष्टातिदिष्टैस्समुच्चितैरपि तदपूरण इति वक्ष्यते ॥ ११ ॥

(१२)–पवमाने स्यातां तस्मिन्नावापोद्वापदर्शनात् ॥ २१ ॥ वचनानि त्वपूर्वत्वात्॥२२॥

विवृद्धौ प्रत्यक्षश्रुतानां राजसामादीनां सङ्ख्यासम्पत्त्यर्थमागम्यमानानां च प्रतिप्रधानं गुणावृत्तेर्न्याय्यत्वात् सङ्ख्यासम्पत्तये च सर्वस्तोत्रेषु समुच्चित्यावापे प्राप्ते 'त्रीणि ह वै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप्, अत्र ह्येवावपन्ति अत एवोद्वपन्ति' इति वचनेनाप्राप्तिबललब्धविधिशक्तिकेनेतरस्तोत्रेषु आवापपरिसङ्ख्यानात् पवमानस्तोत्रयोरेव सः। न चानेन पवमानस्तोत्रयोरेव गायत्र्यादिऋग्भिन्नऋक्ष्वेव सामावापपरिसङ्ख्यानेऽपि स्तोत्रान्तरे तत्परिसङ्ख्यायां मानाभाव इति वाच्यं, अत्र पवमानपदानुपादानात् प्रत्युत यज्ञपदोपादानेन यज्ञसम्बन्धिगायत्र्यादिभिन्नऋक्ष्वेव सामावापपरिसङ्ख्यावगतेः स्तोत्रान्तरेऽपि तत्परिसङ्ख्यावश्यकत्वात्। अत्र हि ऋगधिकरणकत्वश्रवणादावापस्साममात्रविषयोऽन्यस्याप्रसक्तेः। अत एव गायत्र्यादयोऽपि पवमानस्तोत्रसम्बन्धिन्य एव, स्तोत्रान्तरे तासामभावात्; न तु सामिधेन्यादिसम्बन्धिन्य इत्यपि ध्येयम्॥

इयं च प्राप्तपरिसङ्ख्याऽपि श्रौती, एवकारेणान्ययोगव्यावृत्तेरुक्तत्वात्। अत एव नास्यां त्रैदोष्यमपि। न चैवकारार्थस्यान्ययोगव्यावृत्तिरूपस्येतरपदार्थेष्वन्वयानुपपत्तिः, भूतल एव घटोऽस्तीत्यादौ एवकारार्थस्यान्ययोगव्यावृत्तिरूपस्य प्रतियोगितासम्बन्धेन घटेऽन्वयाङ्गीकारात्, भूतलस्य च प्रथमतः क्रियायामन्वितस्यापि पार्ष्ठिकोऽन्यपदार्थेऽन्वय इति भूतलभिन्नाधिकरणे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगी घटः इत्यर्थबोधोपपत्तेः। भूतलपदस्य च पार्ष्ठिकस्सम्बन्धो घटपदेनापि, अन्यथा भूतल एवाकाश इत्यस्याप्यापत्तेः। अत एव भूतलवृत्तिर्घट उक्तविधाभावप्रतियोगीति वाक्यार्थः॥

अतश्चात्रापि गायत्र्यादिषु तद्भिन्नऋगधिकरणकाभावप्रति-

योगी सामावापः कार्य इति शाब्दबोधेऽपि प्राप्ताप्राप्तविवेकेन तद्विन्नक्षु सामावापाभाव एव विधीयत इति युक्तेयं श्रौती परिसङ्ख्या त्रैदोष्यरहिता च ॥

अतश्च राजसामादीनां प्रत्यक्षश्रुतानां सङ्ख्यासम्पत्त्यथमागम्यमानानां च साम्नामावापः पवमानविषय एवेति सिद्धम्। अत एव स्तोत्रान्तरे सङ्ख्यासम्पत्तिरभ्यासेनैव ॥

वस्तुतस्तु नात्र प्राप्तपरिसङ्ख्या, तथात्वे 'न तौ पशौ करोति' इतिवन्नयायप्राप्तस्यापि शास्त्रीयत्वेन तदभावबोधने विकल्पापत्तेः । एकस्मिन्नेवकारपदे उद्देश्यविधेययोर्द्वयोरप्यङ्गीकारेणैकप्रसरताभङ्गापत्तेश्च । अपि तु न्यायप्रवृत्तेः पूर्वप्रवृत्त्यङ्गीकारेण गायत्र्यादिषु सामावापविधिरेवायं परिसङ्ख्याफलकः। अत एव एवकारार्थोऽप्यनुवाद एव ॥

न च गायत्र्यादीनामुद्देश्यत्वेऽनेकोद्देशः। अत्रेत्यस्यैकस्योद्देश्यपरत्वेन तदभावात् । सप्तम्याश्च प्राधान्यपरत्वेऽप्याधेयत्वसम्बन्धतात्पर्यग्राहकत्वान्नान्यसम्बन्धेन सामावापविधिः ॥

यद्यपि च गायत्र्यादिषु सामावापे विहितेऽपि न स्तोत्रान्तरे तदाकाङ्क्षाशान्तिरिति नात्राश्वाभिधानीन्यायेन फलतः परिसङ्ख्यात्वं, तथाऽप्यावापविधेः प्रयोजनजिज्ञासायां प्रयोजनान्तरासम्भवे गमकविधयैव स्तोत्रान्तरेष्वभ्यासविधिकल्पनेन परिसङ्ख्याफलकत्वोपपत्तेः ॥

अत एवाविवृद्धस्तोमके क्रतौ उपदिष्टकौत्सादिनिवेशार्थं यत्र कुत्र चित्स्तोत्रे प्राकृतसामोद्गापेऽनियमेन प्राप्ते 'अत एवोद्गपन्ति' इत्यनेन गायत्र्यादिभ्यो उद्गापस्य श्रुत्या फलतो वा नियमकरणात् स नियमविधिरेवेत्युक्तं कौस्तुभे ॥

तत्त्वं तु आवापविधिबलादेवोद्वापस्यार्थसिद्धत्वात् अयमनुवाद एव तत्स्तुत्यर्थः । अत एवावापविधेरपि विवृद्धस्तोमांशे परिसङ्ख्याफलकत्वं अविवृद्धस्तोमांशे नियमफलकत्वमित्यपि बोध्यम् ॥

वस्तुतस्तु--आवापविधिरयमनारभ्याधीतोपि न प्रकृतौ निविशते, तत्र कस्मिन्नपि स्तोत्रे आवापाभावात् । तथाहि—बहिष्पवमाने तावत् साम्नोऽभ्यास एव । ऋचां तु नवानामेव पाठ इति न तत्र कस्याप्यागमः । एवमितरयोः पवमानयोः यावत्सङ्ख्यं ऋचां साम्नां च विधानादेव नावापः । आज्यपृष्ठाग्निष्टोमस्तोत्रेषु तु साम्नां ऋचां चाभ्यासादेव स्तोमसम्पत्तिरिति न कोप्यावापविधेर्विषयः ॥

अत एव प्रकृतौ आज्यादिस्तोत्रेषु एकैकसामविशिष्टैकैक तृचाम्नानात् स्तोमसम्पत्त्यर्थं सामान्तराणां ऋगन्तराणां चागमे प्राप्तेऽपि नानेन वचनेन तत्परिसङ्ख्या, पवमानयोरावापप्रसक्त्यभावेन तत्रावापविधिमुखेनेतरस्तोत्रेषु तत्परिसङ्ख्यापकस्यास्य प्राकृताज्यादिविषयत्वानुपपत्तेः । अत एव प्रकृतावाज्यादिस्तोत्रेषु न्यायप्राप्तोऽप्यागमः 'त्रिच्छन्दा आवापो माध्यन्दिनः पवमानः पञ्चसामा, पञ्चच्छन्दा आवाप आर्भवः पवमानस्सप्तसामा' इति पवमानद्वयविधावावापपदश्रवणात् परिसङ्ख्यायते ॥

अत्र हि प्रकृतौ पवमानद्वये आवापाभावेऽप्यावापसमाख्या प्रकृतौ विकृतौ वा यत्र यत्रावापप्रसक्तिः साऽत्रैव, न स्तोत्रान्तरेत्येवंपरा सती प्रकृतावपि स्तोत्रान्तरेऽभ्यासविध्यापादनद्वारा आगमपरिसङ्ख्यार्था विज्ञायते । अतो विकृतावपि तत एव

स्तोत्रान्तरेष्वभ्यासविधिसम्भवात् 'न त्रीणि ह वा' इत्यादिवचनं श्रुत्या फलतो वा तत्रावापपरिसङ्ख्यार्थम् । अपि तु विवृद्धस्तोमके क्रतौ पवमानद्वये सङ्ख्या सम्पत्त्यर्थं ऋक्सामयोरुभयोरागमे प्राप्ते, गायत्र्याद्यधिकरणकसामावापविधिस्तादृशऋगभ्यासासम्पादनद्वारा ऋगन्तरागमपरिसङ्ख्यार्थः; पवमानवृत्तित्रिष्टुभाद्यधिकरणत्वपरिसङ्ख्यार्थो वा ॥

एवं चाविवृद्धस्तोमके कौत्सादीनां न्यायादेव पवमानद्वय एव प्राकृतऋगधिकरणकावापसिद्धौ 'अत्र ह्येवावपन्ति' इत्ययं पवमानवृत्तित्रिष्टुभाद्यधिकरणत्वव्यावृत्तिफलको गायत्र्याद्यधिकरणनियम इति ध्येयम् । अत एव 'उद्वपन्ति' इत्ययं तदंशे त्वनुवाद एव । सर्वथा राजसामादीनां पवमानयोरेव निवेश इति सिद्धम् ॥ १२ ॥

(१३)–विधिशब्दस्य मन्त्रत्वे भावस्स्यात् तेन चोदना ॥ २३ ॥ शेषाणां चोदनकत्वात्तस्मात्सर्वत्र श्रूयते ॥ २४ ॥

सर्वत्र 'आग्नेयोऽष्टाकपालः' इत्यादौ किं विधिगत एव देवताशब्दस्त्यागादावुच्चारणीयः, अथवा नायं नियम इति चिन्तायां—

न तावच्छब्दस्यैव देवतात्वं; तद्धि अर्थमनङ्गीकृत्याङ्गीकृत्य वोच्यते ? न तावदाद्यः, अग्न्यादिशब्दानामर्थपरत्वस्य लोकवेदयोः प्रसिद्धत्वात् अर्थपरत्वाभावे अग्न्यादिशब्दानां प्रातिपदिकसंज्ञाभावेन विभक्त्याद्यनापत्तेश्च ॥

नान्त्यः । अर्थवाचित्वे तस्यैव देवतात्वोपपत्तौ अग्न्यादिपदे शब्दलक्षणायां प्रमाणाभावात् । न च तत्र त्यज्यमा-

नद्रव्योद्देश्यत्वरूपदेवतात्वासम्भवः, द्रव्यत्यागकालीनोच्चारणकर्मत्वरूपस्य तस्य शब्दधर्मत्वादिति वाच्यं, उद्देश्यत्वस्योच्चारणघटितत्वे प्रमाणाभावेन द्रव्यत्यागकालीनज्ञानकर्मत्वरूपस्य तस्यार्थेऽप्युपपत्तेः । न च ज्ञानस्यापि शब्दोच्चारणाधीनत्वमेवेत्येवं नियमोऽस्ति । द्रव्यादिसम्बन्धिदर्शनादिनाऽपि स्मरणोपपत्तेः । अतश्शब्दोच्चारण एव प्रमाणाभावे विधिगतशब्दनियमस्य दूरापास्तत्वमेव ॥

अस्तु वोद्देश्यत्वस्योच्चारणघटितत्वं, तथाऽप्युच्चार्यमाणशब्दप्रतिपाद्यत्वमेव देवतात्वमिति न तस्यार्थेऽसम्भवः । न च तथाऽप्युच्चार्यमाणशब्दविशेषापेक्षायां श्रुतत्वाद्विधिगतशब्दस्यैव नियमो भविष्यतीति वाच्यं, श्रुतशब्दस्यार्थं विधाय चरितार्थस्य शब्दनियामकत्वानुपपत्तेः । आकाङ्क्षायाः वाचकपदमात्रग्रहणेनापि शान्तेः । इतरथा द्रव्यवाचिपदस्थलेऽपि यत्र—'व्रीहीणां मेध सुमनस्यमानः' इत्यादौ विकृतौ प्रैयङ्गवादिचरावृहप्रसक्तिः तत्र विधिगतशब्दनियमापत्तेः । यद्यपि च द्रव्यस्य स्वरूपेणैव कर्मणि समवायः, देवतायास्तु शब्दद्वारेणेत्येतावानस्ति तयोर्भेदः, तथाऽपि श्रुतशब्दस्यार्थं विधाय चरितार्थस्य शब्दविशेषापेक्षायामुपस्थितत्वात्तस्यैव नियमे तुल्यत्वमेव ॥

किञ्चैवं यत्र पर्यायशब्दद्वयप्रयोगः, यथा—'अग्नये पावकाय' इत्यादौ, तत्र पदद्वयप्रयोगो भवतः कथं सिद्धचेत् । तत्र ह्यपेक्षायामेकशब्दनियमस्यैवोपपत्तौ शब्दद्वयनियमे प्रमाणाभावः । अतो न क्वापि त्यागादौ विधिगतशब्दनियम इति प्राप्ते—

न तावदुच्चारणमन्तरेणैव ज्ञानमात्रेणार्थस्य देवतात्वं, तथात्वे 'अग्नये पावकाय' इत्यादावर्थस्यैकेनापि पदेन विधानस-

म्भवे पदद्वयवैयर्थ्यापत्तेः । अत एव यद्यपि पुराणादिपर्यालोचनया पावकपदमग्निविशेषवाचि, तथाऽपि तेनैवाग्नित्वसमानाधिकरणविशेषधर्मोपस्थित्युपपत्तेरग्निपदवैयर्थ्यापत्तिः । अतश्शिष्टाचारानुरोधेन च शब्दोच्चारणमावश्यकमेव । अत एव 'प्रजापतिं मनसा ध्यायेत्' इत्यादावेव तदभावो वाचनिकः ॥

नामगोत्रे समुच्चार्य सम्यक्श्रद्धान्वितो वदेत् ।
सङ्कीर्त्य देशकालादि तुभ्यं सम्प्रददे इति ॥
न ममेति स्वसत्ताया निवृत्तिमपि कीर्तयेत् ।
दानहोमादिकं कुर्यादेवं श्रद्धासमन्वितः ॥

इति हेमाद्रिधृतवृद्धवसिष्ठवचनाच्चायमर्थो निर्णीयते । अतश्च लाघवाद्धविस्त्यागकालीनविहितशब्दोच्चारणकर्मत्वमेव देवतात्वं, न तु निरुक्तज्ञानकर्मत्वं, न वा त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वं गौरवात् । अत्र यादृच्छिकयत्किञ्चिच्छब्दोच्चारणमादायातिप्रसङ्गवारणार्थं विहितेति । इदमेव च तद्धितार्थः । अतः प्रधानभूततदर्थानुरोधेनाग्न्यादिप्रातिपदिके शब्दलक्षणामप्यङ्गीकृत्य तस्यैव देवतात्वं विधिना विधीयते । एवं च पदद्वयस्थले उभयोरपि समुच्चयेन देवतात्वं समुच्चयश्चैकवाक्योपादानादिना बोध्यः । अर्थस्य तु आनुषङ्गिकतया प्रतीतेरावश्यकत्वात् तादृशशब्दप्रतिपाद्यत्वरूपं भाक्तं देवतात्वमप्यर्थसिद्धमिति न तच्छास्त्रेण विधीयते ॥

एतेन शुद्धस्यार्थस्यैव देवतात्वं, देवतात्वं च त्यागकालीनोच्चारणकर्मीभूतशब्दप्रतिपाद्यत्वम्, तच्च 'अग्नये पावकाय' इत्यादौ एकस्मिन्नेवार्थे तत्तच्छब्दघटितं देवतात्वद्वयं तच्चैकवाक्योपादानात्समुच्चितं, तेन न तत्रैकपदोच्चारणापत्तिरित्यपास्तं,

गुरुभूतदेवतात्वे तद्धितादिशक्तिकल्पनायां गौरवात् । उक्तार्थस्यान्यलभ्यत्वाच्च ॥

एतेनैव 'शब्दविशिष्टार्थे एव प्रातिपदिकलक्षणामङ्गीकृत्य तस्यैव निरुक्तदेवतात्वेऽन्वयः' इति न्यायसुधाकृत्स्वारस्यमप्यपास्तं. तद्धितादिपदशक्यतावच्छेदके गौरवात्। अतश्शब्द एव वाक्यार्थान्वयीति नान्यशब्दप्रयोगप्रसक्तिस्त्यागकाले । आवाहनादिमन्त्रेषु तु पठितत्वादेव नान्यशब्दप्रयोग इति निर्विवादमेव । तत्रत्याग्निपदे परं न शब्दलक्षणा शब्दवदर्थस्यापि तत्प्रतिपाद्यत्वसम्बन्धेन यागसम्बन्धात्तस्यैव शक्त्याऽग्न्यादिपदेन स्मरणोपपत्तेः । अस्य चाधिकरणस्य लक्षणोपयोग्यग्निमाधिकरणोपोद्घाततया लक्षणसङ्गतिः ॥१३॥

(१४)–तथोत्तरस्यां ततौ तत्प्रकृतित्वात् ॥२५

विकृतौ 'सौर्यं चरुम्' इत्यादिना यागे सूर्यशब्दस्यैव पूर्वाधिकरणवद्विधानेऽपि आवाहनादिमन्त्रेष्वग्न्यादिपदैस्तदर्थस्यैव प्रकाशनादिहापि तस्यैव कर्तव्यत्वात् तत्र च प्रकृतिप्राप्ताग्निपदे निवृत्ते तत्प्रकाशकसूर्यपदोहवत् तत्पर्यायादित्यादिपदोहेऽपि बाधकाभावः । न चानेकपदप्राप्तावुपस्थितत्वात् सूर्यपदस्यैव नियम इति शङ्क्यं, तथात्वे प्रैयङ्गवे पुरोडाशे धानासु वा 'व्रीहीणां मेध' इति मन्त्रे यवप्रियङ्ग्वादिपदस्यैव नियमेनोहापत्तेः ॥

न च विधिवाक्ये सूर्यदेवताया भावनायामेव सप्तम्यनुवाद्यन्यायेनान्वयाद्यागमात्रे तस्या विधानाभावेन प्रयोगान्वयित्वावगतेस्साङ्गप्रधाने तत्प्राप्तावावाहनादौ प्राकृततत्पदोपनीतदेवतासु

तत्परिसङ्ख्यार्थत्वेऽपि प्रकृतावावाहनादिमन्त्रेषु अग्निपदनियमवत् विकृतावपि तेषु सूर्यपदनियमोपपत्तिरिति मूलोक्तं शङ्क्यम्। द्रव्यवद्देवतायास्सत्यपि प्राथमिके भावनान्वये अरुणान्यायेनोत्तरकालिकान्वयस्य यागमात्र एवाङ्गीकारादावाहनादौ तदप्राप्तेः। इतरथा द्रव्यस्यापि साङ्गप्रधानसम्बन्धापत्तेः देशकालकर्तृभिन्नानां द्रव्यदेवतादीनामुत्पत्त्यन्वयित्वस्य वक्ष्यमाणत्वाच्च ॥

किञ्च—साङ्गयागभावनायां गुणत्वेन देवतान्वयेऽप्यावाहनादेर्देवतासंस्कारार्थत्वान्न आग्नेयं, सौर्यमित्यादितद्धितेनावाहनादौ तद्विनियोगश्शक्यते कर्तुम् । अतः आवाहनादिमन्त्रस्य लिङ्गादेव देवतासंस्कारार्थत्वप्रतीतेर्विकृतौ चाग्निपदनिवृत्तौ जातायां सूर्यवाचियावत्पदप्राप्तौ न किञ्चिद्बाधकमिति प्राप्ते—

नावाहनादिमन्त्रेषु प्रकृतौ लिङ्गकल्प्या श्रुतिः तत्तत्प्रकृतापूर्वसम्बन्धिनीं देवतां तत्तदग्न्यादिपदैः प्रकाशयेदिति एवंविधा, येन विकृतावग्निपदस्य लोपे सूर्यप्रकाशकयावत्पदप्राप्तिर्भवेत्। न त्वेतदस्ति, अनेकश्रुतिकल्पनापत्तेः। किन्तु प्रकृतापूर्वसम्बन्धिनीं देवतां विधिगतशब्देन प्रकाशयेदित्येवंविधा एकैव। अतश्च तदर्थं विकृतावपि विधिगतशब्दप्रयोग एवावश्यक इति न सूर्यपर्यायाणां प्रयोगः । अत एव द्रव्ये नैवंविधश्रुतिकल्पनासम्भवः। तथात्वे 'व्रीहीणां मेध्य' इत्यादौ प्रकृतावेव यवपदप्रयोगापत्तेः। अपि तु प्रकृतापूर्वसाधनीभूतं द्रव्यं व्रीहिपदेन प्रकाशयेदित्येवंविधा। ततश्च धानादिषु व्रीहिपदे निवृत्ते यवप्रतिपादकसकलपर्यायपदप्राप्तिरविरुद्धा।

अस्तु वा प्रकृतावेव नान्तरीयकसिद्धस्याप्यर्थस्य यागाङ्गतया तत्प्रकाशनस्यानुपयोगात् यागाङ्गभूतस्य शब्दस्यैव वि-

नाऽपि लक्षणाभावाहनादिमन्त्रगताग्न्यादिपदेनार्थस्मरणद्वारा स्मरणम्। तथा चैवं लिङ्गकल्प्या श्रुतिः विधिगतशब्देन स्वनिष्ठशक्तिप्रयोज्यशाब्दबोधोपधायकशक्त्याश्रयत्वरूपसम्बन्धप्रयोज्यस्मृतिद्वाराऽपूर्वसाधनीभूतदेवतात्वाश्रयत्वावच्छिन्नं संस्कुर्यादिति।

सम्भवति ह्युक्तविधशाब्दबोधविषयस्यार्थरूपस्यैकस्य सम्बन्धिनः शाब्दबोधात्मकेन दर्शनेन तादृशबोधोपधायकशक्त्याश्रयत्वसम्बन्धेनापरसम्बन्धिनः शब्दस्य स्मरणम्। एवंचोद्देश्यतावच्छेदके लाघवमपि। ततश्च विकृतावपि पर्यायाणामप्रसक्तिरेव। न वा 'अग्नये पावकाय' इत्यादिविकृतौ शब्दद्वयस्य आवाहनादिमन्त्रेष्वप्रयोगप्रसङ्गः। अर्थस्यैवोद्देश्यतामङ्गीकृत्य प्रकाशकत्वपक्षे हि तस्यैकेनैव स्मरणसिद्धेरितरवैयर्थ्यमित्यपि शङ्कचेत ॥ १४॥

(१५)—प्राकृतस्य गुणश्रुतौ सगुणेनाभिधानं स्यात् ॥२६॥ अविकारो वाऽर्थशब्दानपायात्स्याद्द्रव्यवत् ॥ २७॥ तथाऽऽरम्भासमवायाद्वा चोदितेनाभिधानं स्यादर्थस्य श्रुतिसमवायित्वादवचने च गुणशास्त्रमनर्थकं स्यात् ॥ २८॥ द्रव्येष्वारम्भगामित्वादर्थे विकारस्सामर्थ्यात् ॥ २९॥

अर्थस्य देवतात्वपक्षे शब्दस्य वा देवतात्वपक्षे यत्रार्थद्वयं शब्दद्वयेनोच्यते, यथा—'अग्नये कृत्तिकाभ्यः' इत्यादौ, तत्र

द्वयोरेकवाक्योपादानेन समुच्चयप्रतीतेरुभयोरपि त्यागे आवाहनादिमन्त्रेषु वोच्चारणं निर्विवादमेव । यत्र तु प्राकृत्यां तत्स्थानापन्नायां वा कश्चिद्गुणश्रुतः 'अग्नये दात्रे, अग्नये पवमानाय' इत्यादौ तत्र किं गुणवाचकं पदमपि त्यागकाले आवाहनादिनिगमेषु च प्रयोक्तव्यं न वेति चिन्तायां—

'सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामालभेत' इत्यत्र प्रकृतिप्राप्तद्रव्ये वशात्वगुणविधानेऽपि न तस्य छागस्य वपायाम्' इति मन्त्रे वशात्वगुणप्रकाशनार्थं तत्पदप्रयोगः । एवमिहापि विहितेऽप्यर्थरूपदेवतागुणे तत्प्रकाशस्य प्रयोजनाभावात् न तद्वाचकं पदं त्यागकाले आवहनादिमन्त्रेषु वोच्चारणीयमिति प्राप्ते—

वशात्वगुणस्य स्वरूपेण क्रियान्वयवदिह देवतागुणस्य स्वरूपेण क्रियान्वयाभावात्तद्वाचकशब्दस्याप्यप्रयोगे विधिवैयर्थ्यापत्तेरर्थदेवतापक्षेऽपि तद्वाचकपदप्रयोग आवश्यक एव । शब्दस्य देवतात्वपक्षे तु सुतराम् ।

यत्र तु द्वयोः पर्यायता पुराणादिपर्यालोचनया एकस्यैव विशिष्टार्थवाचकत्वं पदान्तरं तु सामान्यवाचि, यथा—'अग्नये पावकाय' इत्यादौ, पावकशब्दस्याग्निविशेषरूपाग्निसन्ततिवाचित्वस्य पुराणादौ प्रसिद्धत्वात्, तत्र पावकपदेनैव विशिष्टार्थप्रतीतिसिद्धौ अग्निपदप्रयोगो यद्यप्यर्थस्य देवतात्वपक्षे तथा नोपपादयितुं शक्यस्तथाऽपि शब्ददेवतात्वस्यैव पूर्वं साधितत्वात् तत्रापि पदद्वयप्रयोगो नायुक्तः ॥ १५ ॥

(१६)—वृधन्वान्पवमानवद्विशेषानिर्देशात् ॥

३० ॥ मन्त्रविशेषनिर्देशान्न देवताविकारस्स्यात् ॥ ३१ ॥

पवमानेष्टिषु आज्यभागौ प्रकृत्य 'वृधन्वानाग्नेयः कार्यः, पावकवान् सौम्यः' इति श्रुतम् । तत्र नकारश्छान्दसः । वृधवानित्यर्थः । तत्र किमियं वृधवत्ता पावकवत्ता च देवताविशेषणत्वेन विधीयते? उत मन्त्रविशेषणत्वेन वा इति चिन्तायां—

वृधशब्दोपेतमन्त्रविशेषपरत्वे वृधशब्दस्य शब्दलक्षकत्वापत्तेर्वृधरूपार्थ एव लाघवाद्विधीयते । स च यद्यपि नाग्निविशेषणत्वेन विधातुं शक्यते तद्धितार्थे वृत्तस्याग्निपदस्य विशेषणान्तरासहत्वात् । तथाऽप्याग्नेयपदोक्तयागोद्देशेनैव वृधाख्यगुणो विधीयमानोऽपरित्यक्ताग्निसम्बन्धोद्देशेन विहितत्वान्नाग्निबाधकत्वेन विधीयते, अपि तु तद्विशेषणत्वेनैव । एवं पावकवाक्येऽपि । अतश्च त्यागे आवाहनादिनिगमेषु च वृधादिगुणस्याप्युल्लेख इति प्राप्ते –

नाग्नेयादिदेवतातद्धितेन यागग्रहणं 'सूक्तहविषोः' इति स्मृत्या सूक्तहविषोरेव नियमात् । नाप्याज्यग्रहणं पुंस्त्वानुपपत्तेः। वृधादिदेवतायास्समुच्चयेन बाधेन वा विधाने आज्यभागस्याग्नेयत्वादिनिर्देशानुपपत्तेश्च । अतस्सूक्तद्धितमङ्गीकृत्य मन्त्रमेवाग्नेयशब्देनानूद्य तदुद्देशेन वृधवत्ता विधीयते । न तु यागमुद्दिश्य । तद्धितस्य यागे 'वैश्वदेवेन यजेत' इतिवल्लक्षणापत्तेः । न च वृधादिशब्दस्य तवापि शब्दपरत्वे लक्षणापत्तिः, वृधा दिरूपार्थस्यैव प्रतिपाद्यतासम्बन्धेन मन्त्रसम्बन्धित्वात्

वृधादिरूपार्थवत्त्वस्यैव मन्त्रोद्देशेन विधानोपपत्तेः । प्रत्युत देवताविशेषणत्वपक्षे पूर्वोक्तरीत्या शब्दस्यैव विधेयत्वेन शब्दलक्षणापत्तिः ॥

न चैवं प्राकृतस्यैव मन्त्रस्य लक्षणादिना वृधादिरूपार्थप्रकाशकत्वापत्तेर्न वृधादिपदोपेतमन्त्रविशेषविधिरूपसिद्धान्तसिद्ध्यापत्तिः । भाष्यकारलिखनस्वारस्यात् पवमानेष्ट्यङ्गभूताज्यभागक्रमेऽनेकेषामग्निसोमदेवत्यमन्त्राणामाम्नानावगतेस्तैः प्राकृतमन्त्राणां बाधात् । अत एव वैकल्पिकानेकमन्त्रप्राप्तौ तत्तदाज्यभागाङ्गभूतमन्त्रोद्देशेन वृधादिप्रकाशकत्वविधानात् 'अग्निस्तोमेन वर्धय' इत्यादिमन्त्रयोरेव नियमसिद्धिः । एवं च मन्त्रान्तराणामुत्कर्ष इत्यादि बोध्यम् । यदि त्वत्रानाश्वासस्तदा वृधपावकवन्मन्त्रयोरेव आज्यभागक्रमे समाम्नानेन प्राकृतमन्त्रबाधो द्रष्टव्यः ॥

अत एव लिङ्गादेव तत्तन्मन्त्रयोस्तत्तदाज्यभागाङ्गत्वसिद्धेरिदं वचनद्वयमनुवाद एव पवमानेष्टिस्तुत्यर्थः । अभ्युदयशिरस्कत्वसिद्ध्यर्थं वा विधिः । न तु वृधादेर्देवतात्वविधायकं समुच्चयेन बाधेन वा, तत्र देवताविधावाग्नेयत्वादिनिर्देशानुपपत्तेः । यत्र तु तत्पदोपेतमन्त्रा दाशतयीष्वेव प्रसिद्धाः केवलं विकृतिप्रकरणे एवंविधवचनाम्नानं तत्र गमकान्तरबलेनैव प्राकृतबाधेन मन्त्रान्तरविधिः । गमकाभावे तु प्राकृतमन्त्र एव लक्षणादिना तदर्थप्रकाशनं; प्राकृतमन्त्रस्यैव प्रकाशकत्वसम्बन्धेन तदर्थवत्त्वविध्युपपत्तौ तद्वाचकपदोपेतमन्त्रान्तरविधौ गौरवादिति ध्येयम् ॥ १६ ॥

(१७)–विधिनिगमभेदात् प्रकृतौ तत्प्रकृतित्वा-

द्विकृतावपि भेदस्स्यात् ॥ ३२ ॥ यथोक्तं वा विप्रतिपत्तेर्न चोदना ॥ ३३ ॥

यत्र प्रकृतावेव द्रव्यवाचकपदं व्रीहिपश्वादिरूपं श्रुतम्, तत्र तस्य कर्मणि द्रव्यविधायकत्वेन चरितार्थत्वात् न देवतापदवच्छब्दविधायकता। अत एव त्यागलाले चतुर्थ्यन्तदेवतापदशाब्दबोधपर्यवसानार्थं प्रत्यक्षानिर्दिष्टा सा व्यक्तिरिदंपदेनैव परामर्ष्टव्या न तु विधिगतपुरोडाशादिपदेनेत्यपि व्यक्तम्। पुरोडाशत्वावच्छिन्नस्य त्यागासम्भवात्। निगमेषु तु यत्र यः पठितः स एव तत्रेत्यपि निर्विवादमेव। यथा 'व्रीहीणां मेध, छागस्य वपाया मेदसः' इत्यादौ। विकृतावपि व्रीहिच्छागादिसत्त्वे स एवेत्यपि तथा। यत्र तु 'गौरनुबन्ध्या' इत्यादौ प्राकृतद्रव्यबाधेन द्रव्यान्तरविधिः तत्र छागपदलोपेन पदान्तरप्रक्षेपे प्राप्ते न तावद्गोपदमेवेति नियन्तुं शक्यं, गोपदस्य विधिस्थस्य द्रव्यविधानेन चरितार्थत्वात्। न चोपस्थितत्वाद्विधिगतस्यैव पदस्य नियमः, अर्थोपस्थित्या तद्वाचकपदमात्रोपस्थितेः विधिगतपदस्यैव प्रयोगे विध्यन्तरकल्पनागौरवाच्च। अतश्च गोशब्दोऽन्यो वा यः कश्चित्तद्वाची प्रयोक्तव्य इति प्राप्तम्।

न च प्रकृतौ विधिगतपशुपदापेक्षया अन्यस्यैव छागशब्दस्य निगमेषु दर्शनात् विधिनिगमभेदप्रतीतेरिहापि तद्वशेन गोपदभिन्नमेव पदं प्रयोक्तव्यमिति वाच्यं, विधिनिगमभेदस्य प्रकृतावार्थिकत्वेनेहानतिदेशात्। न हि प्रकृतौ विधिगतपदभिन्नं पदं प्रयोक्तव्यमिति विवक्षा। अजादिपदप्रयोगे वैगुण्यानापत्तेः। अपि तु छागपदस्यैवेति तद्विधौ विधिनिगमभेद आर्थिकः प्रकृताविति विकृतौ तल्लोपे तस्यापि लोपः। एवं च यत्र पद-

विशेषप्रापकाभावस्तत्रानियम एव। यत्र तु तत्, यथा अनुबन्ध्यायामेव 'उस्रायै वपायै मेदसः' इति मन्त्रपाठस्तत्र नैव पदान्तरप्रक्षेप इति सिद्धम्।

एवं प्रकृतौ स्विष्टकृति अग्निस्स्विष्टकृद्देवता। निगमेषु च केवलस्याग्नेरेव विधानं न स्विष्टकृद्गुणस्य। पशौ च वनस्पतियागस्समाम्नातः स च स्विष्टकृद्यागविकार इति सङ्कर्षे वक्ष्यते। तत्रापि विधिनिगमभेदस्य प्रकृतावार्थिकत्वान्नेहातिदेशः। वस्तुतस्तु तत्र गुणमात्रस्य निगमेष्वप्रकाशनं विशेष्यभूतोऽग्निस्तु विधिगतशब्दप्रतिपाद्य एवेति विकृतावपि वनस्पतिर्विधिगतशब्देनैव प्रकाशनीयः॥ १७॥

(१८)-स्विष्टकृद्देवतान्यत्वे तच्छब्दत्वान्निवर्तेत॥ ३४॥ संयोगो वाऽर्थापत्तेरभिधानस्य कर्मजत्वात्॥ ३५॥

अवभृथे 'अग्नीवरुणौ स्विष्टकृतौ यजति' इति श्रुतम्। तत्र किं त्यागे शुद्धयोरेवाग्नीवरुणयोर्देवतात्वं किं वा स्विष्टकृद्गुणकयोरिति चिन्तायां—

न तावदत्र यजिपदापात्तस्विष्टकृद्यागानुवादेन देवताविधिस्सम्भवी, विधेयानेकत्वनिमित्तकवाक्यभेदापत्तेः। यजिपदेनावभृथाङ्गभूतयागमात्रोद्देशेन विधानापत्तेश्च। अवभृथस्यापूर्वत्वेन तत्र स्विष्टकृद्यागस्याप्राप्तेश्च। अतस्स्विष्टकृत्पदेन स्विष्टकृत्कार्यकारिणावग्नीवरुणावित्येवं स्विष्टकृद्देवताकार्यकारित्वं लक्षयित्वा तत्कार्योद्देशेनाग्नीवरुणयोर्विधिः अग्नीवरुणविशिष्टस्विष्टकृत्कार्यविधिर्वा। स्विष्टकृद्देवताकार्यं च स्विष्टकृद्याग एवेति तत्र वैशेषि-

कदेवताविधानात् तदीयप्राकृतदेवताबाधः। अतश्च यद्यपि प्रकृतौ स्विष्टकृच्छब्द अग्नौ यौगिकः, तथाऽपि शब्दस्यैव प्रकृतौ विध्यन्वयाच्छब्दद्वयकार्ये यागे देवतान्तरविधानेन प्राकृतदेवताद्वयस्यापि निवृत्तिः।

वस्तुतस्तु सुष्ठु इष्टं साङ्गं कृतवानिति भूतार्थक्विप्प्रत्ययान्तस्विष्टकृच्छब्दार्थप्रतीतेस्तस्य च भूतत्वाभावेन बाधात् स्विष्टकृच्छब्दस्याग्निपदसामानाधिकरण्येनाग्नौ रूढत्वप्रतीतेः पर्यायद्वयस्यापि समुच्चितस्यैकयागार्थत्वात् स्विष्टकृच्छब्दकार्ये विहितदेवतान्तरेणापि शब्दद्वयबाधो नानुपपन्नः। अनयैव च रीत्या यत्र यत्र प्रकृतौ गुणविशिष्टदेवताविधिः विकृतौ च वनस्पतियागादौ विशेष्यान्तरस्यैव देवतात्वविधिस्तत्र वैकृतदेवतया प्राकृतदेवताद्वयस्यापि बाधः। अर्थस्य देवतात्वपक्षे हि स दुरुपपादस्स्यात् विशेष्यान्तरस्य प्राकृतविशेष्यस्थान एव विहितत्वात्, शब्दस्य देवतात्वपक्षे। अतोत्रास्विष्टकृच्छब्दस्यैव त्यागवेलायामभिधानम्।

निगमेष्वप्याध्वर्यवेषु 'अनुब्रूहि यज' इत्यादिषु अस्विष्टकृच्छब्दस्याभिधानम्। हौत्रेष्वपि याज्याया आदौ; याज्यानुवाक्ययोस्तु प्रकृतितोऽपि शुद्धाभिधानस्यैवातिदेशादुपदिष्टक्रक्ष्वपि शुद्धयोरेवाग्नीवरुणयोरभिधानादस्विष्टकृच्छब्दस्याभिधानं सिद्धान्तेऽप्यविशिष्टमेव। आवाहनसूक्तवाक्ययोस्तु खण्डेष्टित्वादेवाभावः। उत्तमप्रयाजे तु प्रकृतावेव स्विष्टकृद्यागदेवताया अप्रकाशनादिहाप्यप्रकाशनं निर्विवादमेवेति प्राप्ते—

स्विष्टकृत्पदे स्विष्टकृत्कार्यकारित्वलक्षणार्थां प्रमाणाभावात् देवताद्वयविशिष्टयागविधिरेवायम्। स्विष्टकृत्पदं च रूढत्वेऽपि

प्रकृताविव देवताविशेषणम्। वस्तुतस्तु भूतकालत्वासम्भवेऽपि वर्तमानक्रिये देवदत्ते यागकृदिति प्रयोगदर्शनाद्यौगिकमेव।

यागश्चायमतिदेशाभावेऽप्याज्यभागन्यायेन प्राकृत एव स्विष्टकृद्यागान्तरं वा, स्विष्टकृद्देवताकत्वात्, तत्कार्यापन्नं, अप्राकृतकार्यमेव वा, प्राकृतस्विष्टकृद्विकाररूपं वनस्पतिवत्। सर्वथा सगुणयोरग्नीवरुणयोस्तत्र देवतात्वात् त्यागकाले त्वदुक्तनिगमेषु च स्विष्टकृच्छब्दकयोरग्नीवरणयोरभिधानम्॥ १८॥

(१९)—सगुणस्य गुणलोपे निगमेषु यावदुक्तं स्यात्॥ ३६॥ सर्वस्य वैककर्म्यात्॥ ३७॥

दैक्षे पशुपुरोडाशावान्तरप्रकरणे 'अग्निं यजति' इति श्रुतम्। तत्र भेदकप्रमाणाभावे यागानुवादेन देवतामात्रविधावावश्यके न तावत्प्राकृततदङ्गयागमात्रोद्देशेन विधानम्, आग्नेयाज्यभागे तस्याः प्राप्तत्वात्, सौम्ये तस्या विधौ अपूर्वविधित्वापत्तेः, तद्वरं गुणमात्रपरिसङ्ख्याफलकप्राप्स्यमानाग्निविधिरेव स्विष्टकृद्यागे लाघवादवसीयते।

सोऽपि च देवताया द्रव्यवदुत्पत्त्यन्वयित्वात्—यद्यपि याग एव न तु निगमेष्वपि, तेषु तस्य संस्कार्यतया गुणत्वेन विध्ययोगात्। तथाऽपि याग एव विहितायास्तस्याः प्राकृतकार्यापन्नतया विकृतावपि स्मर्तव्यत्वात् निर्गुणस्यैवाग्नेरभिधानम्। यद्यपि च प्रकृतावावाहनादिनिगमेषु निर्गुणस्यैवाग्नेरभिधानं, तथाऽप्याध्वर्यवेषु हौत्रेष्वपि च याज्याया आदौ सगुणस्यैवाभिधानात्, इह तु तत्रापि निर्गुणस्यैवाभिधानम्। सिद्ध एव चायमर्थोऽशिष्यहितार्थमुक्त इति वेदितव्यम्॥ १९॥

(२०)–स्विष्टकृदावापिकोऽनूयाजे स्यात्प्रयोजनवदङ्गानामर्थसंयोगात् ॥ ३८ ॥

दर्शपूर्णमासयोरनूयाजेषु तृतीयोऽनूयाजोऽग्निस्विष्टकृद्देवत्यः स किं शेषप्रतिपत्त्यर्थस्यावापिकस्विष्टकृद्यागस्य देवतासंस्कारार्थः उतानूयाजान्तरवदारादुपकारक इति चिन्तायां—उभयोः प्रकरणेन दर्शाङ्गत्वावगमात् न परस्पराङ्गत्वे प्रमाणमस्तीति आरादुपकारक एवेति प्राप्ते –

दृष्टे सम्भवत्यदृष्टस्यान्याय्यत्वात् तदीयदेवतासंस्कारार्थत्वमेव। न च विनिगमनाविरहः, प्रक्षेपस्य वाक्यादेव शेषप्रतिपत्त्यर्थत्वेन कृतार्थत्वात् त्यागांशस्यापि प्रधानप्रयुक्तद्रव्योपजीवित्वेन प्रधानाङ्गत्वस्य प्रकरणं विनैवावगमसम्भवाच्च।

यत्तु शास्त्रदीपिकायां तस्येष्टदेवताप्रकाशनेन कृतार्थत्वमुक्तं तत् मन्त्रस्येष्टदेवताप्रकाशकत्वेऽपि यागे अपूर्वाया एवाग्निस्विष्टकृद्देवताया विधानादुद्देशांशस्येष्टदेवतास्मरणार्थत्वाभावादुपेक्षितम्।

न चैवमप्युत्तमानुयाजे मान्त्रवार्णिकस्य देवस्यापि देवतात्वप्रतीतेस्तस्य चावापिकस्विष्टकृति देवतात्वाभावात् कथं तदीयदेवतासंस्कारार्थत्वमिति वाच्यं, भाष्यकारलिखिताग्नि स्विष्टकृतं यजतीति वचनेन 'विष्णुं यजति' इति वद्देवताविधानेन मान्त्रवर्णिकस्य देवस्य देवतात्वाकल्पनात्।

याज्ञिकाचारस्तु—एतद्वचनादर्शनमूलकः। उक्तं ह्येतत् देवताप्रमाणेषु न द्वितीयाया मन्त्रवर्णापेक्षया दौर्बल्यं कौस्तुभे। तस्मादुत्तमानुयाजस्यावापिकस्विष्टकृद्देवतासंस्कारार्थत्वात् यत्रै-

कपालमात्रहविष्केष्टौ आवापिकस्विष्टकृल्लोपस्तत्रोक्तमानूयाजस्यापि लोपः। यत्र वा पित्र्यादौ अग्निः कव्यवाहनः स्विष्टकृद्देवता आवापिकस्विष्टकृति तत्रोक्तमानूयाजेऽपि 'देवो अग्निः कव्यवाहनः स्विष्टकृत्सुद्रविणा मन्द्रः कविः' इत्यादि मन्त्रे ऊहः त्यागे च तद्देवतोल्लेखः। याज्ञिकास्तु एवं न कुर्वन्ति तत्र मूलं चिन्त्यम् ॥ २० ॥

(२१)—अन्वाहेति च शास्त्रवत्कर्म स्याच्चोदनान्तरात् ॥ ३९ ॥ संस्कारो वा चोदितस्य शब्दवचनार्थत्वात् ॥ ४० ॥ स्याद्गुणार्थत्वात् ॥ ४१ ॥

याज्यानुवाक्ययोर्लिङ्गात् देवताप्रकाशनार्थत्वसम्भवेऽपि 'तिष्ठन् याज्यामन्वाहासीनः पुरोनुवाक्याम्' इत्यादिवचनानर्थक्यप्रसङ्गात् स्तोत्रशस्त्राणामिवानुवचनस्यादृष्टार्थत्वम्। न ह्यनुवचनानुवादेनात्र गुणविधिस्सम्भवति, अतिप्रसङ्गतोऽङ्गार्थापत्तेः। याज्यानुवाक्ययोर्विशेषणत्वे विशिष्टोद्देशापत्तेश्च। याज्यायुद्देशेनैव तद्विधौ याज्यादिकर्मकाध्वर्यवप्रेषेऽपि तदापत्तेः। 'अन्वाह' इत्यनुवादानुपपत्तेश्च। दृष्टार्थत्वे द्वयोर्विकल्पापत्तेः 'आसीनः पुरोनुवाक्याम्' इत्यत्र याज्यापुरोवृत्तित्वस्यापि विधौ वाक्यभेदापत्तेश्च। अतो गुणविशिष्टानुवचनस्यादृष्टार्थत्वात् न देवतान्यत्वे विकृतौ प्राकृतयाज्यानुवाक्ययोर्बाधः। अपि तु वैकृतयाज्यानुवाक्यापाठसत्त्वे तेन समुच्चय एवेति प्राप्ते—

यद्यपि लिङ्गकल्प्यविधिप्रवृत्तेः पूर्वमेतद्विधिप्रवृत्तिमङ्गीकृत्य विशिष्टानुवचनविधिस्स्यात्। तथाऽपि दृष्टे सम्भवत्यदृष्टकल्पन-

स्यान्याय्यत्वादेवतास्मरणार्थत्वमेवानुवचनस्य भवेत्. न त्वदृष्टार्थत्वम् ।

वस्तुतस्तु याज्योद्देशेनात्र गुणमात्रविधानमेव । न च याज्याकर्मकप्रैषे तदापत्तिः, 'होतारं प्रेष्यति' इति होतुरेव प्रैषे कर्मत्वेन याज्यायास्तत्कर्मत्वाभावात् अतोऽनुवचनस्य नित्यप्राप्ततया याज्योद्देशेनैव गुणमात्रविधिः । 'पुरोनुवाक्यामनूच्य याज्यया यजति' इति वाक्यान्तरेणैव समुच्चयप्रतीतेर्नासीनवाक्ये पुरःपदार्थविध्याशङ्का । अतो दृष्टार्थत्वाद्युक्त एव विकृतौ बाधः ॥

(२२)—मनोतायां तु वचनादविकारस्स्यात् ॥ ४२ ॥

अग्नीषोमदेवत्ये पशौ मनोतामन्त्रस्समाम्नातः केवलाग्निप्रकाशकः । स किं विकृतौ ऊहितव्यो न वेति चिन्तायां—

प्रकृतावग्नीषोमयोर्देवतात्वेऽपि देवतात्वप्रथमाधिष्ठानप्रकाशकत्वेन मनोतास्थाग्निपदस्य समवेतार्थत्वाद्विकृतावपि तत्प्रकाशनार्थमूहः । स च यत्रानेकदेवत्यः पशुस्तत्र स्पष्ट एव । यत्राप्येकदेवत्यः, यथा वायव्यादौ, तत्रापि स एव तत्र प्रथमाधिष्ठानमिति भवत्येवोहः ॥

मास्तु वा तत्र । अत एव प्रकृतौ मनोतामन्त्रो नाग्नीषोमयोर्लाक्षणिकः प्रमाणाभावात् । यदि तु मनोताशब्दस्य 'मनोतायै हविषोऽवदीयमानस्य' इति मन्त्रे चतुर्थ्यन्ततया अवदीयमानहविस्सम्बन्धिदेवतावाचित्वावगमात् प्रकृतमन्त्रे चाग्निशब्दस्य 'त्वं ह्यग्ने प्रथमो मनोता' इति मनोतापदसामानाधिकरण्येन देवतापरत्वावगतेरग्न्यधिष्ठानकत्वसम्बन्धेन प्रकृतदेवताभूताग्नीषोमलक्षकत्वमाश्रीयते, तदा 'अग्निवरुणदेवत्ये पशौ ऊहाप्रस-

क्तावपि वायव्यादिपशौ निरुक्तसम्बन्धासम्भवेनाग्निपदनिवृत्तौ देवताप्रकाशनरूपकार्यानुरोधेन 'धान्यमसि' इत्यत्रैव वायव्यादिपदोहे बाधकाभावः ।

न चैवमपि 'पूयति वा एतद्यज्ञोऽक्षरं यदेनदूहति तस्माद्यज्ञं नोहेत्' इति ऋगूहपर्युदासादूहानुपपत्तिः, उपक्रमस्थार्थवादे ऋगक्षरोहनिन्दया पर्युदासस्य पदोहविषयत्वेऽपि प्रकृते प्राकृतऋग्बाधे वृत्तिलोपेन सिद्धे प्रयोजनानुरोधेन ऋगन्तरागमरूपभाक्तोहे बाधकाभावात् । अत एव बाधमात्रस्यैवेह विचार्यत्वादध्यायसङ्गतिः ।

न चैवमपि यद्यप्यन्यदेवत्यः पशुराग्नेय्येव मनोता कार्येति बाधपर्युदासोपपत्तेर्नेष्टसिद्धिरिति वाच्यं, अस्य दैक्षप्रकरणस्थत्वेन विकृतिविषयत्वे उत्कर्षापत्तेः । मनोतामन्त्रस्याग्नेये पशौ उत्कर्षप्रसक्तौ तन्निवृत्त्यर्थत्वेन प्रकृतावेवोपपत्तेश्चेति प्राप्ते—

दैक्षसन्निधौ पठितस्य मनोतामन्त्रस्याग्नेयपश्वन्तरे सामान्यसम्बन्धबोधकप्रमाणाभावेनोत्कर्षानुपपत्तेरस्य वचनस्य प्रकृतावुत्कर्षनिवृत्त्यर्थत्वायोगात् तत उत्कृष्टस्य वायव्यादिपशावूहनिवृत्त्यर्थत्वावगतेर्न तत्र मनोतामन्त्रस्य बाधः । इदं च ज्योतिष्टोमे सवनीयाभावं कृत्वाचिन्तया । यदा त्वाग्नेयस्सवनीयः पशुर्ज्योतिष्टोमेऽस्ति तदा मनोतामन्त्रस्य महाप्रकरणाज्ज्योतिष्टोमसम्बन्धेऽवगते अवदीयमानहृदयादिसम्बन्धावगमाच्च तत्रानर्थक्यप्रसक्तौ आनर्थक्यतदङ्गन्यायसहकृतप्रकरणेन सवनीये सामान्यसम्बन्धबोधकप्रमाणेन तत्रैव निवेशोपपत्तेरस्य वचनस्य प्रकृतावेवोत्कर्षनिवृत्त्यर्थत्वेन सार्थक्यं, तदाऽस्य विकृतावूहनिवृत्त्यर्थत्वे प्रमाणाभावात् वायव्यादिपशौ ऋगन्तरोह इष्ट एव ।

याज्ञिकास्तु नैवोहमाचरन्ति । तेषामयमभिप्रायः—प्रकृतौ नाग्न्यधिष्ठानकत्वसम्बन्धेनाग्नीषोमलक्षणा, व्याप्यवृत्तिसम्बन्धेन लक्षणोपपत्तौ अव्याप्यवृत्तिशक्यसम्बन्धेन तदयोगात् । अपि त्वग्न्यधिकरणकहविरुद्देश्यत्वसम्बन्धेन । अतश्च वायव्यादिपशौ तेनैव सम्बन्धेन लक्षणोपपत्तेर्न बाधोहाविति । वस्तुतस्तु देवतात्वे अग्न्यधिष्ठानकत्वस्याव्याप्यवृत्तित्वे प्रमाणाभावादिष्येते एवोहबाधौ ॥ २२ ॥

(२३)—पृष्ठार्थेऽन्यद्रथन्तरात्तद्योनिपूर्वत्वात्स्यादृचां प्रविभक्तत्वात् ॥ ४३ ॥ स्वयोनौ वा सर्वाख्यत्वात् ॥ ४४ ॥ यूपवदिति चेत् ॥ ४५ ॥ न कर्मसंयोगात् ॥ ४६ ॥ कार्यत्वादुत्तरयोर्यथाप्रकृति ॥ ४७ ॥ समानदेवते वा तृचस्याविभागात् ॥ ४८ ॥

वैश्यस्तोमे 'कण्वरथन्तरं पृष्ठं भवति' इति श्रुतम् । तच्च यद्यपि ज्योतिष्टोमे बहूनि पृष्ठस्तोत्राणि, तथाऽपि होतुः पृष्ठ एव विधीयत इति वक्ष्यते । अतश्च तत्पृष्ठसाधनीभूतबृहद्रथन्तरयोन्योरेवानियमेन गेयं, उत रथन्तरयोनावेव उत स्वयोनौ, ततश्च प्राकृतयोनिबाध इति चिन्तायां—

साममात्रोपदेशेन तदाश्रयभूताया अपि तदनङ्गभूतायाः ऋचो वैश्यस्तोमाङ्गत्वे प्रमाणाभावादतिदेशप्राप्तऋग्बाधानुपपत्तेः कौत्सादेरिवास्यापि बृहद्योनौ रथन्तरयोनौ वा गानम् । अथवा कण्वानां रथन्तरमिव रथन्तरमित्येवं अरथन्तरेऽस्मिन्सामनि

रथन्तरशब्दो रथन्तरकार्यापन्नत्वप्राप्तयर्थ इति तत्कार्यऋगक्षराभिव्यक्त्यर्थत्वावगतेस्तद्योनावेव गेयमिति प्राप्ते—

न तावत् कण्वानां रथन्तरमित्येवं यौगिकः कण्वरथन्तरशब्दः। कण्वसम्बन्धे प्रमाणाभावेनाश्वकर्णादिवत् रूढेरावश्यकत्वात् । नापि कौत्सादिवत् प्राकृतर्क्षु गानं, कौत्सादिकं हि अनारभ्य स्वयोनौ पठितं वचनेन तत्तत्क्रतावङ्गत्वेन विहितमपि तदाश्रयभूताया ऋचः क्रतुप्रकरणे पाठाभावेन क्रत्वङ्गत्वानवगतेरतिदेशप्राप्तऋग्बाधायोगे तावत्स्वेव गानम् । तदाश्रयभूतायाः ऋचस्तु वाचस्तोमादौ निवेशादर्थवत्ता । कौत्सादेः प्राकृतगायत्र्यादिष्वेवावापविधानादप्येवम् । प्रकृते तु वैश्यस्तोमक्रमे कण्वरथन्तरयोनेस्तदुत्तरयोश्चोत्तराग्रन्थे पाठात् तासामपि वैश्यस्तोमाङ्गत्वावगतेरौपदेशिकर्ग्भिरातिदेशिकर्चां बाधात्स्वयोनावेव गेयं तदुत्तरयोश्च पाठस्याविशेषात् ॥

उत्तराग्रन्थे हि तत्तद्योनौ पठितस्यापि साम्नस्तत्र क्रतुक्रमेण योनिरुत्तरे च पठ्येते तासां च पाठादेव तत्तत्क्रत्वङ्गत्वम् । अतस्तदनुरोधेन तास्वेव गानम् । एवं विश्वाजिदादावपि पाउहिकसाम्नां वाचनिके सर्वपृष्ठशब्देन विधौ पाठबलादेव ऋगन्ताराधिकरणत्वं तदभावे तु प्राकृतऋगधिकरणकत्वमेव ॥ २३ ॥

२४—ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारस्स्यात् ॥ ४९ ॥

अग्निष्टुति 'आग्नेया ग्रहा भवन्ति' इत्यनेन प्राकृतग्रहानुवादेन देवतान्तरविधौ स्तोत्रशस्त्रयोरर्थकर्मत्वस्य द्वितीये साधि-

तत्वात् प्राकृत्यो नानादेवत्या एव ऋचस्स्तोत्रशस्त्रयोः पठनीयाः । न त्वाग्नेदेवत्य ऋगन्तरागमः । तदेतद्वितीयसिद्धस्य प्रयोजनकथनमात्रम् । इदं च 'आग्नेयीषु स्तुवते' इत्येतद्वचनाभावं कृत्वाचिन्तया स्थलान्तरविषयं वा ॥ २४॥

(२५)—उभयपानात्पृषदाज्ये दध्नस्स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ॥५०॥ न वा परार्थत्वात् यज्ञपतिवत् ॥ ५१ ॥ स्याद्वाऽऽवाहनस्य तादर्थ्यात् ॥ ५२ ॥ न वा संस्कारशब्दत्वात् ॥५३॥ स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥ दध्नस्तु गुणभूतत्वादाज्यपा निगमास्स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५५ ॥ दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ॥ ५६ ॥ अपि वाऽऽज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दस्स्यात् ॥ ५७ ॥ अपि वाऽऽख्या विकारत्वात्तेन स्यादुपलक्षणम् ॥ ५८ ॥ न वा स्याद्गुणशास्त्रत्वात् ॥५९॥

पश्वादौ 'पृषदाज्येनानूयाजान् यजति' इति श्रुतं, पृषदाज्यं प्राकृतस्य द्रव्यस्य तद्गतनैरपेक्षस्य वा निवर्तकं न वेति चिन्तायां—

रथन्तरशब्दो रथन्तरकार्यापन्नत्वप्राप्तयर्थ इति तत्कार्यऋगक्षराभिव्यक्त्यर्थत्वावगतेस्तद्योनावेव गेयमिति प्राप्ते—

न तावत् कण्वानां रथन्तरमित्येवं यौगिकः कण्वरथन्तरशब्दः। कण्वसम्बन्धे प्रमाणाभावेनाश्वकर्णादिवत् रूढेरावश्यकत्वात्। नापि कौत्सादिवत् प्राकृतर्क्षु गानं, कौत्सादिकं हि अनारभ्य स्वयोनौ पठितं वचनेन तत्तत्क्रतावङ्गत्वेन विहितमपि तदाश्रयभूताया ऋचः क्रतुप्रकरणे पाठाभावेन क्रत्वङ्गत्वानवगतेरतिदेशप्राप्तऋग्बाधायोगे तावत्स्वेव गानम्। तदाश्रयभूतायाः ऋचस्तु वाचस्स्तोमादौ निवेशादर्थवत्ता। कौत्सादेः प्राकृतगायत्र्यादिष्वेवावापविधानादप्येवम्। प्रकृते तु वैश्यस्तोमक्रमे कण्वरथन्तरयोनेस्तदुत्तरयोश्चोत्तराग्रन्थे पाठात् तासामपि वैश्यस्तोमाङ्गत्वावगतेरौपदेशिकर्ग्भिरातिदेशिकर्चां बाधात्स्वयोनावेव गेयं तदुत्तरयोश्च पाठस्याविशेषात्॥

उत्तराग्रन्थे हि तत्तद्योनौ पठितस्यापि साम्नस्तत्र क्रतुक्रमेण योनिरुत्तरे च पठ्येते तासां च पाठादेव तत्तत्क्रत्वङ्गत्वम्। अतस्तदनुरोधेन तास्वेव गानम्। एवं विश्वजिदादावपि पाउहिकसाम्नां वाचनिके सर्वपृष्ठशब्देन विधौ पाठबलादेव ऋगन्ताधिकरणत्वं तदभावे तु प्राकृतऋगधिकरणकत्वमेव॥ २३॥

२४—ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारस्स्यात्॥ ४९॥

अग्निष्टुति 'आग्नेया ग्रहा भवन्ति' इत्यनेन प्राकृतग्रहानुवादेन देवतान्तरविधौ स्तोत्रशस्त्रयोरर्थकर्मत्वस्य द्वितीये साधि-

तत्वात् प्राकृत्यो नानादेवत्या एव ऋचस्स्तोत्रशस्त्रयोः पठनीयाः । न त्वाग्नेदेवत्य ऋगन्तरागमः । तदेतद्वितीयसिद्धस्य प्रयोजनकथनमात्रम् । इदं च 'आग्नेयीषु स्तुवते' इत्येतद्वचनाभावं कृत्वाचिन्तया स्थलान्तरविषयं वा ॥ २४॥

(२५)—उभयथानात्पृषदाज्ये दध्नस्स्यादुपलक्षणं निगमेषु पातव्यस्योपलक्षणात् ॥५०॥ न वा परार्थत्वात् यज्ञपतिवत् ॥ ५१ ॥ स्याद्वाऽऽवाहनस्य तादर्थ्यात् ॥ ५२ ॥ न वा संस्कारशब्दत्वात् ॥५३॥ स्याद्वा द्रव्याभिधानात् ॥ ५४ ॥ दध्नस्तु गुणभूतत्वादाज्यपा निगमास्स्युर्गुणत्वं श्रुतेराज्यप्रधानत्वात् ॥ ५५ ॥ दधि वा स्यात्प्रधानमाज्ये प्रथमान्त्यसंयोगात् ॥ ५६ ॥ अपि वाऽऽज्यप्रधानत्वाद्गुणार्थे व्यपदेशे भक्त्या संस्कारशब्दस्स्यात् ॥ ५७ ॥ अपि वाऽऽख्या विकारत्वात्तेन स्यादुपलक्षणम् ॥ ५८ ॥ न वा स्याद्गुणशास्त्रत्वात् ॥५९॥

पश्वादौ 'पृषदाज्येनानूयाजान् यजति' इति श्रुतं, पृषदाज्यं प्राकृतस्य द्रव्यस्य तद्गतनैरपेक्षस्य वा निवर्तकं न वेति चिन्तायां—

पृषदाज्यशब्दस्याज्यदधिभ्यामारब्धे द्रव्यान्तर एव शक्तेरनूयाजोद्देशेन विधीयमानं द्रव्यान्तरं प्राकृताज्यस्य निवर्तकं ततश्चावाहनादिमन्त्रेषु 'देवानाज्यपानावह' इत्यादिषु 'देवानाज्यपृषदाज्यपानावह' इत्यूहोऽपि।

अथ वा पृषदाज्यशब्दस्य कृत्स्नावयवयोगेनोपपत्तौ द्रव्यान्तरस्य तत्र चातिरिक्तपदशक्तेश्च कल्पनायां प्रमाणाभावात् पृषत्पदस्य पृषद्रज्जुरित्यादिप्रयोगानुसारेण चित्रत्व एव शक्तिः, आज्यपदस्य त्वाज्य एव। तथाऽपि तु 'द्विरुपस्तृणाति, द्विरभिघारयति, बर्हिषी अन्तर्धाय दधि गृह्णाति' इति पृषदाज्यग्रहणे आज्यस्य दधिसंस्कारकोपस्तरणाभिघारणार्थत्वेन श्रवणात् विधावपि पृषदाज्यपदं लक्षणया दध्येव विधत्त इति प्रदानार्थस्य प्राकृताज्यस्य निवर्तकम्। ततश्च 'देवान् आज्यदधिपान्' इत्यूहः। पक्षद्वयेऽप्याज्यशब्दः प्रयाजाद्यर्थाज्यपर इति।

अथवा 'पृषदाज्यं गृह्णाति द्वयं वा इदं सर्पिश्च दधि च' इति वाक्यशेषानुसारात् विधिस्थपृषत्पदस्यैव दधिलक्षणावगतेरेकवचनस्यापि समाहाराभिप्रायत्वेनोपपत्तेरुपस्तरणाभिघारणवादस्य चोपस्तणाभिघारणसम्बन्धिप्रथमोत्तमस्थानविधिपरत्वेन संस्कारविधिपरत्वाभावादाज्यं दधि चोभयमनूयाजाङ्गम्। ततश्च प्राकृतस्याप्याज्यगतनैरपेक्ष्यस्यैव बाधो न त्वाज्यस्य। ऊहश्चानन्तरोक्तपक्षवदेव।

न चास्मिन् पक्षे यज्ञपतिशब्दवदेकेनैव द्रव्येणोपलक्षणसम्भवे दधिपदप्रयोगे प्रमाणाभावः। अस्य मन्त्रस्य देवताप्रकाशनार्थत्ववद्द्रव्यप्रकाशनार्थत्वस्याप्यविशेषेण तद्वदिह पारार्थ्या-

भावात् । आज्यधर्माश्च पक्षद्वयेऽपि दध्नयविशिष्टाः, प्रथमपक्षे पृषदाज्ये उत्पवनादय इति विशेष इति प्राप्ते—

पृषच्छब्दस्य चित्रत्ववाचिनो दधिलक्षणापत्तेः समाहारलक्षणाविधेयानेकत्वकृतगौरवापादकपक्षाङ्गीकरणं न युक्तम् । अत आज्योद्देशेन पृषत्तामात्रं विधीयते । एकप्रसरताभङ्गभिया वा पृषत्ताविशिष्टाज्यस्यैवातिदेशप्रवृत्तितः पूर्वप्रवृत्तौ पृषत्तामात्रफलको विधिः । पृषत्ता चोक्तवाक्यशेषानुरोधेन दध्नेति न क्वापि लक्षणा । उपस्तरणाभिघारणवादस्तु उपर्यधोभावमात्रेण नानुपपन्नः । न ह्युपस्तरणादिशब्दः संस्कारकक्रियाया एव वाचक इत्यत्र प्रमाणमस्ति, अवघातादिवत् संस्कारकत्वस्य प्रमाणाधीनत्वात् । पृक्ते च तदभावात् । अतो लौकिकस्यैव दध्नस्संस्कारकमात्रत्वादाज्यमेव हविरिति न कस्यापि बाधः ऊहो वा ।

इति श्रीखण्डदेवविरचितायां भाट्टदीपिकायां
दशमस्याध्यायस्य चतुर्थः पादः
इति दशमाध्याये पूर्वभागः.